पत्रकाव्यम्

या: संस्कृतरसिका:,
प्रणतिपुरस्सरं निवेद्यते यदिदं काव्यम् —
उद्घाटयन् मम मनोगतसूक्ष्मभावान्
स्नेहातिरेकसुभगं मयका भवद्भ्यः।
नानादिशाद्रुमलताञ्चितपत्रजालं
हृन्मञ्जुलमिव सङ्ग्रथितं स्नेहेन॥
सत्यव्रतेन शास्त्रिणा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

THE BOOK.......

The volume comprises letters written in Sanskrit verse by the author to his Sanskritist friends and acquaintances during the last three decades, 1963-1993. Apart from exchanging pleasantries and providing the information asked for, he has touched in them some topic or the other of general interest — the season, the weather, the place of his posting, its historic and cultural importance, its institutions of Sanskrit and Indology, the scholars in them, his journeys through different lands — as a matter of fact anything that may interest a general reader and add significantly to his knowledge.

The volume also includes messages the author sent and the versified addresses he delivered on different occasions.

Through this volume the author has sought to enrich the Sanskrit literature in an area in which it is markedly deficient. This collection, in verse form, is the very first in Sanskrit literature.

The uniqueness of this is further enhanced by the fact that it has in it a letter in 137 stanzas which can surely lay claim to being one of the longest letters of the Sanskrit literature.

Since most of the letters are descriptive in nature, they are very poetic in form embellished as they are with Rasas, figures of speech of all kinds and a variety of meters and should be expected to provide aesthetic joy in full to connoisseurs.

Rs. : 300.00

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पत्रकाव्यम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पत्रकाव्यम्

प्रणेता
सत्यव्रतशास्त्री
दिल्लीविश्वविद्यालयसंस्कृतविभागाचार्यः
पुरीस्थश्रीजगन्नाथसंस्कृतविश्वविद्यालयप्राक्तनकुलपतिः

(दिल्ली संस्कृताकादम्या आर्थिकेन सहयोगेन प्रकाशितम्)

ईस्टर्न बुक लिंकर्स
दिल्ली : : (भारत)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ईस्टर्न बुक लिंकर्स
५८२५, न्यू चन्द्रावल, जवाहर नगर,
दिल्ली-११०००७
फोन : २५२ ०२८७

© डा० सत्यव्रत शास्त्री

मूल्यम् : रु० ३००.००

प्रथमं संस्करणम् १९९४ ई०

ISBN : 81-85133-89-1

अक्षरयोजक तथा मुद्रक
अमर प्रिंटिंग प्रैस
विजय नगर दिल्ली-९
फोन : ७२५ २३६२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

PATRAKĀVYAM

Satya Vrat Shastri
Pandit Manmohan Nath Dar Professor of Sanskrit
University of Delhi
Ex-Vice-Chancellor
Shri Jagannath Sanskrit University
Puri (Orissa)

(Published with the financial assistance of
the Delhi Sanskrit Academy)

Eastern Book Linkers
Delhi : : (India)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

Published by :
EASTERN BOOK LINKERS
5825, New Chandrawal, Jawahar Nagar,
Delhi-110007
Phone : 2520287

© Author

First Edition : 1994

Price : Rs. 300-00

ISBN : 81—85133-89-1

Typesetting & printing by :
Amar Printing Press
8/25, Vijay Nagar, Delhi-9
Phone : 7252362

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३/५४, रूपनगरम्,
दिल्ली-११०००७

प्रियाः संस्कृतरसिकाः,

प्रणतिपुरस्सरं निवेदये यदिदं काव्यम्—

उद्घाटयन् मम मनोगतसूक्ष्मभावान्
स्नेहातिरेकसुभगं मयका भवद्भ्यः ।
नानादिशाद्रुमलताचितपत्रजालं
हृत्तन्तुजालमिव सङ्ग्रथितं रसेन ॥

सत्यव्रतेन शास्त्रिणा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

आत्मनिवेदनम्

विगतायामर्धशताब्द्यां परःशतानि पत्राणि मया स्वमित्रेभ्योऽन्येभ्यो वा बन्धुजनेभ्यः प्रेषितानि स्युः । तेषु ये संस्कृतप्रतिवचोनिबन्धनक्षमास्तेभ्यः संस्कृतेनैव मया तानि प्रहितानि । तेष्वपि ये संस्कृतपद्यैर्मां पत्राणि प्रहिण्वन्ति संस्कृतपद्य-रचनायां च ये लब्ध-यशसो येषां वा सकाशात्संस्कृतपद्यैः प्रतिवचः सम्भाव्यते तान् संस्कृतपद्यबद्धान्येव पत्राणि प्रहिणोमि । १९५५ ईसवीये संवत्सरे यदा मयाऽध्यापकवृत्तिरङ्गीकृता ततः १९६३ ईसवीयं संवत्सरं यावत् प्रहितानां पद्यबद्धानां संस्कृतपत्राणां प्रतिलिपिर्मयि नास्ति । तदनन्तरं प्रतिलिपिर्मय्यस्ति, न सर्वेषां संस्कृतभाषोपनिबद्धानां पत्राणामपि तु केवलं संस्कृतपद्यबद्धानामेव । तदर्थमेव मया कृतः प्रयत्नः । सैषा प्रक्रियाद्यापि प्रवर्तते । अस्ति मयि सम्प्रति महान् पत्रराशिर्यत्र परःसहस्रैः पद्यैः काले काले प्रहितैः कुशलपरिप्रश्नादिकं विहायापि नाना विषयाः स्पृष्टाः । अतीतेषु संवत्सरेषु नाना देशा मया गमिकर्मीकृताः, नाना पुराण्यध्युषितानि, नाना विश्वविद्यालयेष्वध्यापितं नाना विद्वांसश्च दृष्टाः शास्त्रविषयिणी चर्चा च तैः सह प्रवर्तिता । तत्सर्वमपि मया पद्यबद्धैः स्वपत्रैः स्वबन्धुजना निवेदिताः । एतेन पत्राण्येतानि सुतरां ज्ञानवर्धकानि । सोऽयं ज्ञानराशिर्मय्येव न केवलं तिष्ठत्वन्येषामपि तेन लाभः स्यादिति भावनैव तत्प्रकाशनोद्यमे प्रयोजको हेतुः ।

अयमेवाशयो मया २०.५.१९९१ दिनाङ्के (१५५ पृष्ठाङ्के) स्वप्रियशिष्यं पुरीस्थं डा० सदानन्ददीक्षितं प्रति प्रहिते पत्रे कतिपयैः पद्यैरित्थमाविष्कृतः —

प्राकाश्यं नेतुमिच्छामि स्वकीयं पत्रसङ्ग्रहम् ।
यो मया रचितः पद्यैः काले काले मनोहरैः ॥१३॥

प्रहितानि मया पत्राण्यनेकानि सुहृज्जनान् ।
पद्यबद्धानि वर्षेषु नैकेषु विगतेषु भोः ॥ १४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सहस्रादधिका सङ्ख्या पद्यानां तात! वर्तते ।
येषु स्पृष्टा मया नैके विषया ज्ञानवर्धकाः ॥१५॥
यत्र यत्र मया यातं यद्वा यद्वा च वीक्षितम् ।
यच्च यच्चानुभूतं तत् सर्वं तेषूपवर्णितम् ॥१६॥
सेयं विचित्रा सामग्री परेषामपि हस्तगा ।
भवेदिति धिया तस्याः प्राकाश्यमभिरोचये ॥१७॥
एवं कृते सुरक्षा स्यादस्याः सार्थकता च मे ।
परिश्रमस्येति मतिस्तदर्थं तत्रचोदिका ॥१८॥

सन्त्यस्मिन् पत्रसमुदाये नानापत्राणि नानावृत्तोपनिबद्धानि विविधालङ्कार-विभूषितानि यानि मन्ये रसिकेभ्यः सुतरां स्वदेरन् ।

भाषान्तरेषु पत्रसाहित्यस्य प्राचुर्यं न तु सुरगिरीति तद्दृष्ट्यापि पत्राणामेषां किञ्चन वैशिष्ट्यमिति नापेक्ष्यते बहु वचः ।

काले काले नाना पद्यबद्धाः शुभाशंसा अपि मया तत्तत्प्रवृत्त्यर्थं प्रेषिताः । तत्तदभिभाषणार्थं निमन्त्रितेनाङ्गलभाषामयेऽभिभाषणेऽपि प्रारम्भिकाणि पद्यानि संस्कृतेनैवोपन्यस्तानि । क्वचित्क्वचित्सम्पूर्णमप्यभिभाषणं संस्कृतपद्यैरेव प्रस्तुतम् । तानि पद्यान्यप्यत्र संनिवेशितानि । भूयानंशोऽत्र संस्कृतपद्योपनिबद्ध-पत्राणामेव । अतः प्राधान्येन व्यपदेशा भवन्तीति न्यायेन पत्रकाव्यमिति ग्रन्थो व्यपदिष्टः ।

ग्रन्थोऽयं मातृकास्थ एव पदवाक्यप्रमाणज्ञैर्वैद्यभीमसेनशास्त्रिभि-रामूलचूलमालोचितः । तदर्थं तेषां सुतरामधमर्णोऽस्मि । प्रूफसंशोधने ग्रन्थ-परिष्करणे च यत्साहाय्यं सुहृद्वर्यैः शास्त्रमर्मज्ञैर्डा० सत्यदेवचौधरीमहाभागैः, प्रियशिष्यैर्विद्वन्मूर्धन्यैः पण्डितशिवनारायणशास्त्रिमहाभागैश्च व्यधायि तदर्थं तान् धन्यान् वदामि । ममात्मजकल्पेनायुष्मता डा० कमलेशदत्तपाण्डेयेन गाज़ियाबादस्थ एम्. एम्. एच्. महाविद्यालयकलाविभागाध्यक्षेण काव्यस्या-स्यावरणपृष्ठाङ्कने यत्सौष्ठवं प्रादर्शि तदर्थं तं नैकाभिराशीर्भिर्वर्धयामि । काव्याक्षराणां सम्यग्योजनायाम् 'अमर प्रिण्टिंग प्रेस' इत्यस्य स्वामिना श्रीहीरालालेन तत्सहयोगिभिश्च यत् परिश्रान्तं तदर्थं तेषां कृतज्ञोऽस्मि । दिल्ली

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

संस्कृताकादम्या पञ्चसहस्रमुद्रापरिमितं राशिं प्रदाय काव्यप्रकाशने सहयोगो विहितः। तस्यायपि कृतज्ञतां वहामि।

बन्धुजनान् प्रति प्रेषितेषु पत्रेषु भावोद्रेकः स्वाभाविक एव । देवगिरा, तत्रापि तदुपनिबद्धैः पद्यैर्, यथा तदुन्मेषो न तथाऽन्यथा । तत्साक्षात्कारोऽत्र पदे-पदे सहृदयानां भवेदिति दृढं प्रत्येमि । पितृचरणेषु ब्रह्मभूयं गतेषु यानि पत्राणि मया प्रहितानि तेषु मे मानसी व्यथा बाढं व्यक्तिमिता सहृदयहृदयानि सुतरां समुद्वेल्लयेत्। एवमेव ट्यूबिंगनविश्वविद्यालये शर्मण्यदेशीये सौप्रस्थानिकावसरे पठितानि सप्तवृत्तैरुपनिबद्धान्येकादश पद्यानि मम तत्रत्यविद्वज्जनवियोगपीडां सूक्ष्मतयाऽभिव्यञ्जन्ति । पत्रेष्वेतेषु सुहृद्वर्यान् डा० रमाकान्त शुक्लमहाभागान् बैंकाकनगरात् प्रेषितं १३७ पद्यात्मकं पत्रमप्यस्ति (पृष्ठाङ्काः १२८-१४९) यन्मन्ये संस्कृतवाङ्मयस्यातिदीर्घेषु प्रकाशितेषु पत्रेष्वेकं स्याद्यत्र च नानादेशीयरामकथाप्रसङ्गा अतिविचित्रा भरतदेशजानामतीवासंस्तुता वर्णिताः। एवमेव पुरीस्थश्रीजगन्नाथप्रतिमेतिहासवर्णनं, वर्षर्तौ बैंकाकनगरावस्थावर्णनं, थाईदेशीयविविधरुच्यरस्यफलवर्णनं, चांग्माइनगरे सौङ्क्रानोत्सवे (वैशाखसङ्क्रान्त्युत्सवे) जलक्रीडावर्णनं, नगरश्रीधर्मराजस्थहिन्दूमन्दिरवर्णनमित्यादीनि नाना वर्णनानि रुचिरया शैल्यात्रोपन्यस्तानि सहृदयेभ्यो रोचेरन्कृत्या च ममैतया संस्कृतवाङ्मयस्याद्यावध्यसमृद्धोंऽशः समृद्धिमुपेयादिति प्रतियन्नत्र स्मृतान् विद्वत्प्रवरांश्च प्रणामाञ्जलिं समर्पयन् विरमाम्यहं—

सुरसरस्वतीसमाराधनैकव्रतः
सत्यव्रतः शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

विषयानुक्रमः

(क) पत्राणि	पृष्ठाङ्कः
आत्मनिवेदनम्	vii
(१) तिथिसङ्केतरहितं पितृचरणाञ्श्रीचारुदेवशास्त्रिणः प्रति प्रेषितं पत्रम्। कस्याप्यात्मकृतस्य चापलस्य कृते तत्र क्षमाप्रार्थना।	३
(२) तिथिसङ्केतरहितं पितृचरणानेव प्रेषितमपरं पत्रम्। तत्पत्रप्राप्ति-सूचनाऽऽचार्यविश्वबन्धुभ्यश्च प्रणामनिवेदनमत्र निर्दिष्टम्।	४
(३) आचार्यविद्यानिधिशास्त्रिणः प्रति प्रेषितं पत्रम्। अत्र तेषां तत्कु-टुम्बिजनानां च कुशलवृत्तजिज्ञासा। तिथिनिर्देशोऽत्रापि नास्ति।	५
(४) तिथिसङ्केतरहितं डा० सुनीतिकुमारचाटुर्ज्यामहाभागान्प्रति प्रेषितं पत्रम्। निबन्धः कश्चन मया तेभ्यः प्रेषणीयोऽभूत्। तत्प्रेषणेऽ-स्वास्थ्यवशाज्जातो विलम्बस्तदर्थमात्मनः क्षमापणं द्वित्रैरेव दिनै-स्तत्प्रहेतास्मीति च सूचनम्।	६
(५) शिमलानगरस्थश्रीसच्चिदानन्दकाण्डपालमहाभागान् प्रति प्रेषितं तिथिविरहितं पत्रम्। (दिल्लीविश्वविद्यालये) पीएच्.डी.प्रवेशार्थं किञ्चिद्वैधानिकं बन्धनमिति सूचयित्वैतद्विषये साक्षात्सम्भाषणार्थं तेषां निमन्त्रणम्।	८
(६) १.१.१९६४ दिनाङ्के डा० कृष्णलालमहाभागान् तत्काव्यग्रन्थ-प्राप्तिसूचकं पत्रम्।	९
(७) २३.८.१९६७ दिनाङ्के खन्नास्थाचार्यश्रीविश्वनाथशास्त्रिभिर्मत्कृतेः श्रीगुरुगोविन्दसिंहचरितस्याध्ययनेन य आनन्दोऽधिगतस्तस्य स्व-पत्रमाध्यमेन या सूचना मह्यं प्रदत्ता तदर्थं तत्कृतज्ञताज्ञापनम्।	१०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(८) २७.६.१९७० दिने राज्ञीक्षेत्रात् (रानीखेत इत्यतः) दिल्लीं प्रत्यावृत्तेन मया पटियालास्थडा० धर्मेन्द्रकुमारगुप्तमहाभागान् प्रति प्रेषितं पत्रम्। अत्र दिल्ल्यां ग्रीष्मसन्तापो वर्णितः। १२

(९) २०.८.१९७० दिने गुरुकुलकांगड़ीस्थशिष्यश्रीबुद्धदेवशर्माणं प्रति प्रेषितं पत्रम् । तच्च दिल्लीविश्वविद्यालयविभागाध्यक्षपद-प्राप्तिहेतुकतद्वर्धापनप्रतिवचोरूपम्। १३

(१०) तादृशमेव १.९.१९७० दिनाङ्के डा० धर्मेन्द्रकुमारगुप्तमहा-भागान् प्रति प्रेषितं पत्रम्। १५

(११) तादृशमेव च तस्मिन्नेव दिने श्रीबटुकनाथशास्त्रिखिस्तेमहा-भागान् प्रति प्रेषितं पत्रम्। १७

(१२) ५.९.१९७० दिने तादृशमेव सहाध्यायिनो रोहतकस्थान् प्रो० रणजीतसिंहमहोदयान् प्रति प्रेषितं पत्रम्। १८

(१३) ३०.९.१९७० दिनाङ्के श्रीदुर्गादत्तशास्त्रिणः प्रति तत्काव्यद्वय-प्राप्तिसूचकं तद्वैशिष्ट्यनिरूपणात्मकं च पत्रम्। २०

(१४) २७.१०.१९७० दिनाङ्के श्रीविरामपुर(बदायूं)स्थ ज्योतिःस्वरूप-मिश्रमहाभागांस्तत्कृतेर्बालसिद्धान्तकौमुद्याः पाठ्यपुस्तकरूपेण नियोजनाय पाठ्यसमितेः पुरस्तात्प्रस्तावस्य समुपस्थापनाया-श्वासनम्। २१

(१५) १९.५.१९७१ दिनाङ्के बुलन्दशहरस्थश्रीरामकिशोरमिश्रान् प्रति तत्प्रणीतनानासंस्कृतग्रन्थप्रणयनार्थं स्वकीयसन्तोषनिवेदनम्। २२

(१६) ११.११.१९७३ दिनाङ्के दिल्लीस्थकिरोड़ीमलकालेजे संस्कृत-प्राध्यापकं पण्डितशिवनारायणशास्त्रिणं प्रति भ्रान्तिवशान् नि-र्धारिते समयेऽपि साक्षात्कारासम्भवेन तदुपालम्भसूचकपत्रप्रति-वचोरूपेण स्पष्टीकरणार्थं प्रेषितं पत्रम्। समागमार्थमपरस्य दिवसस्य कालस्य च तत्र सूचना। २४

(१७-२१) *बैंककतो दिल्लीविश्वविद्यालयसंस्कृतप्राध्यापकान् डा० कृष्णलालमहाभागान् प्रति प्रेषितानि पञ्च पत्राणि—*

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(क) २४.८.१९७५ दिनाङ्के प्रेषिते पत्रे तैर्वैदिकशब्दकोशो निर्मीयत इति सूचनार्थं स्वसन्तोषप्रदर्शनम्। तदर्थमवकाशायावश्यं प्रयत्नो विधेय इति स्वमताविष्करणम्। २६

(ख) २५.९.१९७८ दिनाङ्के प्रेषिते पत्रे दिल्ल्यां वृत्तपत्रेभ्यो जलाप्लाववृत्तमवगत्य चिन्ताविष्करणम्। २९

(ग) बैंकाकेऽमेरिकाकनाडाजापानदेशेभ्यः प्रत्यावृत्त्यनन्तरं २३.१२.१९७८ दिनाङ्के प्रेषिते पत्रे देशेष्वमीषु भाषणविषयोल्लेखपुरस्सरं तत्र साक्षात्कृतविद्वन्नामनिर्देशः। ३१

(घ) ४.३.१९७९ दिने प्रेषिते पत्रे थाइदेशस्थेन मया किं कीदृशं वा कार्यं क्रियत इत्यस्योल्लेखः। ३३

(ङ) २४.४.१९७९ दिनाङ्के थाइदेशे विशेषतश्च तदीयोत्तरभागस्थचांग्माइनगरे सौङ्क्रानुत्सवाङ्गरूपेण या जलक्रीडा प्रवर्तते तस्या विशदं वर्णनम्। ३५

(२२) २६.१२.१९७९ दिनाङ्के मुज़फ्फ़रपुरस्थान् डा० ब्रह्मचारिसुरेन्द्रकुमारमहाभागान् प्रति प्रेषितं पत्रम्। तेषामाचार्यपदे नियुक्त्या प्रहर्षाविष्करणम्, थाइदेशे कृतस्य क्रियमाणस्य च कार्यस्य विवरणोपस्थापनम्। ३८

(२३) ३.५.१९८२ दिनाङ्के रोहतकस्थश्रीहज़ारीलालविद्यालङ्कारान् प्रति प्रेषितं पत्रम्। तेषामिन्द्रप्रस्थागमनव्ययवहनप्रतिश्रवः। ४०

(२४)२८.९.१९८३ दिनाङ्के मलेरकोटलास्थप्रो०देवदत्तभट्टिमहाभागान् प्रति प्रेषितं पत्रम्। इराकाव्यप्रणयनार्थं तेषां वर्धापना। ४१

(२५-२६) शर्मण्यदेशस्थपायरमहोदयान्प्रेषिते द्वे पत्रे—

(क) ३.१०.१९८३ दिनाङ्के पुरीक्षेत्रात् प्रेषिते संक्षिप्ते पत्रे ट्यूबिंगननगरे तत्सन्निधौ यापितस्य कालस्य स्मृतिर्मनस्युदेतीति सूचनम्। ४२

(ख) १.२.१९८४ दिनाङ्के बेल्जियमदेशीयल्यूवननगरात्प्रेषिते पत्रे ल्यूवननगरे कीदृशो मम प्रवासः के च तत्रत्याः प्राच्यविद्याविशारदाः येषां सङ्गमसुखं मयाऽनुभूयत इति सर्वेषां नामोल्लेखपूर्वकं विवरणम्। ४३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(२७) २८.४.१९८४ दिनाङ्के पुरीतो डा० कृष्णलालमहाभागान् प्रेषितं पत्रम्। तत्र श्रीजगन्नाथमन्दिरस्थप्रतिमेतिहासवर्णनम्। ४५

(२८) ५.७.१९८४ दिनाङ्के श्रीपायरमहोदयान् प्रेषितं पत्रम्। तत्र पुरीक्षेत्रीयरथयात्रोत्सवे पूर्वतनवर्षीये तेषामुपस्थितेः स्मृतिरुदेति, तैः सह पुरीक्षेत्रे यापितस्य कालस्य चेतीत्युल्लेखः। ४९

(२९) २८.६.१९८४ दिनाङ्के प्रेषितं दानापुरस्थ डा० नोदनाथमिश्रमहाभागांस्तदीयकार्यविधानाश्वासनात्मकं पत्रम्। ५२

(३०) १६.७.१९८४ दिनाङ्के शर्मण्यदेशीयप्रो० श्तीतनक्रॅनमहाभागान् पूर्वसंवित्स्मारणपुरःसरं संस्कृतेनैव पत्रं प्रेषणीयमित्याग्रहप्रदर्शकमभ्यासेन च तत्सिध्येदिति निवेदकं पत्रम्। ५३

(३१) ११.११.१९८४ दिनाङ्के श्रीपायरमहोदयाञ्शर्मण्यदेशप्रत्यावर्तनानन्तरं शर्मण्यदेशप्रवासस्मृतिसमुद्भूतस्वकीयभावोद्रेकाभिव्यञ्जकं पत्रम्। श्रीमत्या इन्दिरागान्धीमहाभागाया हत्यायास्तज्जनितस्य भारतदेशीयशोकस्य चापि तत्रोल्लेखः। ५५

(३२) १२.११.१९८४ दिनाङ्के पुरीतो डा०कृष्णलालमहोदयान् प्रेषितं पत्रम्। तत्र श्रीमत्या इन्दिरागान्धीमहाभागाया हत्यानन्तरं यदौत्तराधर्यं देशे प्रावर्तत तस्यापि संक्षेपेणोल्लेखस्तद्विषये चिन्ताप्रदर्शनं च। ५७

(३३) ७.३.१९८५ दिनाङ्के शर्मण्यदेशस्थट्यूबिंगनविश्वविद्यालये भारतीयविद्यासंस्थानाध्यापकान् प्रो० श्तीतनक्रॅनान् प्रेषितं पत्रम्। अत्र यदि तैः संस्कृतेन मयि पत्रं प्रेष्यते मम महान्मोदो भवितेत्युक्त्वा तेषु संस्कृतरचनाक्षमताऽस्तीति सूचितम्। अभ्यासमात्रं तदर्थमपेक्ष्यत इति च निवेदितम्। ५८

(३४) राष्ट्रपतिसम्मानसंवर्धनप्रतिवचोरूपेणाचार्यमणिनाथझामहाभागान् २८.८.१९८५ दिनाङ्के प्रेषितं पत्रम्। ६०

(३५) भारतशिक्षामन्त्रालये तदानीन्तनविशेषसचिवान् श्रीकिरीटजोशिमहाभागांस्तत्पत्रप्रतिवचोरूपेण १.९.१९८५ दिनाङ्के प्रेषितं पत्रम्। अत्र तान्प्रति स्वकीयः समादरो भूयस्तरां प्रकटीकृतः। ६१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(३६) १५.८.१९८६ दिनाङ्के शिमलातः प्रकाश्यमानाया दिव्यज्योतिः-संस्कृतपत्रिकायाः सम्पादकाञ्श्रीकेशवशर्मणः प्रेषितं पत्रम्। अत्र तेषां संस्कृतसेवाया भुवनेश्वरे च प्रवर्त्स्यन्त्यां सौन्दर्यशास्त्र-विषयिण्यां चर्चागोष्ठ्यां निमन्त्रणमित्युल्लेखः। ६२

(३७) १८.११.१९८६ दिनाङ्के पुरीस्थपण्डितपुण्डरीकाक्षमिश्रमहा-भागांस्तत्पत्रप्रतिवचोरूपेण प्रेषितं पत्रम्। मम पुरीनिवासस्य स्मृतिः सदा मे मनसि स्थास्यतीति तत्रोक्तम्। पण्डितमिश्र-महाभागानां तनूजं कमलेशं प्रति च स्नेहभावः प्रदर्शितः। ६३

(३८-४२)२४.४.१९८७ दिनाङ्के शिमलास्थानाचार्यदिवाकरदत्त- ६५
शास्त्रिणः, श्रीगङ्गानगरस्थान् डा० सत्यव्रतान्, ११.५.१९८७ ६६
दिनाङ्के ज्ञानपुरस्थान् डा०कपिलदेवद्विवेदिनः, खुर्जास्थानाचार्य- ६७
रामकिशोरमिश्रान्, ११.६.१९८७ दिनाङ्के डा० रामकरणशर्मणः ६८
(ट्यूबिंगननगराच्छर्मण्यदेशीयात्) पूज्यानां पितृचरणानां ६९
श्रीचारुदेवशास्त्रिणां महाप्रयाणशोकसन्देशप्रतिवचोरूपेण प्रेषि-तानि पत्राणि। पितृचरणानां गुणग्रामोऽत्र न्यक्षेण कीर्तितः स्वकीयो वेदनाभरश्चाभिव्यञ्जितः।

(४३-४४) बैल्जियमदेशतो डा०कृष्णलालमहाभागान् प्रेषिते द्वे पत्रे—

(क) ३०.६.१९८७ दिने प्रेषिते पत्रे तत्कृतिश्चमत्काराख्या निपुणं समीक्षिता तद्गुणगणश्च विस्तरेण प्रकाशितः स्वकीये निबन्ध इति सूचितम्। ७१

(ख) १८.१९८७ दिने प्रेषिते पत्रे बैल्जियमदेशे मम निवासः, तत्रत्यः कैथोलिकाख्यविश्वविद्यालयस्तत्र चाध्यर्धशत्या नियमेन संस्कृताध्ययनाध्यापनपरम्परा, तत्रत्याः संस्कृतविद्वांस इत्यादि चर्चितम्। मासचतुष्टयं तत्र व्यतियाप्य स्वदेशं प्रतिनिवर्तिताह इति चोक्तम्। ७२

(४५) ८.५.१९८८ दिनाङ्के कुरुक्षेत्रस्थश्रीपिनाकपाणिमाध्यन्दिनमहा-भागांस्तदीयपितृचरणपण्डितस्थाणुदत्तशर्ममहाप्रयाणवृत्तसूचक-तदीयपत्रप्रतिवचोरूपेण प्रेषितं शोकाभिव्यञ्जकं पत्रम्। ७४

(४६) इन्दौरस्थान् डा० प्रभाकरनारायणकवठेकरमहाभागांस्तदीय-पुत्रविवाहोपलक्ष्ये १६.६.१९८८ दिनाङ्के प्रेषितं वर्धापनपत्रम्। ७६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(४७) ३.६.१९८८ दिनाङ्के पटनास्थडा० मिथिलेशकुमारीमिश्रामहाभागां प्रेषितं पत्रम्। अस्वास्थ्यवशात्पटनानगरं नागन्तुमहमशकं यात्रानिरोधश्चान्तिमे क्षणे मे वित्तहानिकृज्जात इति तामहमसूसुचम्। कालेन कियताऽपि मे पुनः स्वास्थ्यलाभः स्यात्पूर्ववच्च तत्तत्कार्यव्यापृतिरित्याशामहं तत्र पत्रे प्राचीकटम्। ७७

(४८) १.७.१९८८ दिनाङ्के श्रीपायरमहोदयान् प्रेषितं पत्रम्। तत्रोत्तरप्रदेश-शासनेनाहं पुरस्कृतः, पुरस्कारश्च भारतोपराष्ट्रपतिभिः समर्पित इति वृत्तं न्यवीविदे। ७८

(४९-५४) डा० कृष्णलालमहोदयान् प्रति प्रेषितानि षट् पत्राणि—

(क) १०.१.१९८९ दिने बैंकाकस्य कृते थाइभाषायां प्रयुज्यमानस्य क्रुङ्थेवशब्दस्य व्याख्या, तन्नगरस्य वर्तमानचक्रिवंशमूलपुरुषेण निवेशनं, तेनैव महापुरुषेण रामकथाया नानासहस्रपद्यैः स्वभाषया रचितैर्गानमित्यादि वर्णितम्। ८०

(ख) ४.३.१९८९ दिनाङ्के प्रेषिते पत्रे तेषां दुहित्रोर्व्या कवितापाठे चतुर्थस्थानप्राप्त्यर्थं वर्धापना, शक्त्यादिः काव्यशास्त्रकारैरुदाहृतः काव्यहेतुर्विशेषतश्च तत्राभियोग उर्वीकृत उपयोगीति प्रतिपाद्य थाइदेशीयानां रामकथां प्रत्यात्मीयभाव उल्लिखितो यद्वशादेव तैस्तत्र संयोजितानि नाना कथानकानि तस्यायन्यदेव स्वरूपं प्रददति। अयमेवास्याः कथाया मूलकथातो भेद इति तद्विषये प्रतिपादितम्। ८३

(ग) २०.३.१९८९ दिनाङ्के प्रेषिते पत्रे तान् रुग्णान् विज्ञाय खेदः प्रकटीकृतः। स्वस्यापि स्कन्धदेशे मेरुदण्डे च पीडेति सङ्केतपुरस्सरं वार्धक्यकृता इमे दोषास्तदागमनसूचका इति प्रतिपादितम्। व्यायाम एवात्र शरणमिति चोक्तम्। तदनन्तरं थाइरामायणतोऽनोमतन्नुपाख्यानं बेञ्जकय्युपाख्यानञ्चेत्युपाख्यानद्वयं वर्णितम्। ८६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(घ) ३.६.१९८९ दिनाङ्के प्रेषिते पत्रे बैंकाकनगरे मम प्राप्तिः, थाइरामायणमाश्रित्य काव्यप्रणयनं, तत्र पद्यानां शतचतुष्टयस्य तावत्पर्यन्तं रचना, बृहत्कथामञ्जरीत्यनुकृत्या थाइरामायणकथामञ्जरीति तन्नामनिर्वचनं, तस्यौचित्यविषये डा० कृष्णलालमतजिज्ञासा, अन्यत्किमपि नाम यदि प्रस्तूयते तैस्तर्हि तदङ्गीकरणसम्भवः, मदीये काव्ये वाल्मीकिना गोस्वामितुलसीदासेन चापरिगृहीतानां थाइरामायण एव च विशेषत उपलभ्यमानानामुपाख्यानानां वर्णनमित्यादयो विषयाः परामृष्टाः। नवीनोपाख्यानानां थाइदेशे कुतः सम्भव इत्यस्यात्रत्यजनासंवेद्यत्वमपि चात्रोक्तम्। ९३

(ङ) १३.७.१९८९ दिनाङ्के प्रेषिते पत्रे थाइदेशदक्षिणदिग्विभागस्थनगरश्रीधर्मराजाख्यनगरयात्रा वर्णिता। तत्र नगरे शिवालयो नारायणालय इति देवालयद्वयं मया दृष्टमित्युक्तम्। न तत्र देवविग्रहः सम्प्रत्यस्ति, देवार्चामूर्तयः सङ्ग्रहालयं प्रापिताः, अतीव शोभनास्ताः कलाकाराणां कलाकौशलमभिव्यञ्जन्तीति पत्रेऽत्र प्रतिपादितम्। ९५

(च) २६.८.१९८९ दिनाङ्के प्रेषिते पत्रे डा० कृष्णलालमहाभागेभ्यो विभागाध्यक्षपदप्राप्तिहेतोर्वर्धापनाः समर्प्य पूर्वपत्रगतनगरश्रीधर्मराजयात्रावर्णनं भूयोऽप्युपबृंहितम्। तत्रत्ये 'वात् महाथात्' (वाटमहाधातु) इत्याख्ये बौद्धविहारे गर्भगृहे प्रत्येकं स्तम्भे रामायणीयपात्राणां चित्रणम्, अपरत्र प्रकोष्ठे विपुला बुद्धमूर्तिस्तत्पुरस्तात्सोपानपरम्परा, तत्पादमूले यक्षाकृतियुगं, सोपानोर्ध्वभागे देवमन्दिरवत्प्रतीयमानं वेश्म, तत्र च कयोरपि देवयोः सम्प्रत्यनभिज्ञातयोः मूर्ती इति सर्वं वर्णितम्। धर्मपरिवर्तने कदाचिद्देवालय एव बौद्धविहाररूपेण परिवर्तित इति सम्भावना पत्रेऽत्राभिव्यञ्जिता। ९८

(५५) १९.९.१९८९ दिनाङ्के बैंकाकनगरात् श्रीपायरमहाभागान् प्रेषितं पत्रम्। तत्र तेषां धर्मपत्न्या मार्गरिटायाः शल्यक्रियामधिकृत्य दुःखं प्रकटीकृतं तदर्थे शुभकामनाश्चाविष्कृताः। १०१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(५६-५८) बैंकाकतो डा० कृष्णलालमहाभागान् प्रति प्रेषितानि त्रीणि पत्राणि—

(क) ६.३.१९९० दिनाङ्के प्रेषिते पत्रे दिल्लीविश्वविद्यालये स्वकी- १०२
यायाः पुनर्नियुक्तेर्विषये चर्चा कृता। रामकीर्तिमहाकाव्यमुद्रणार्थं कञ्चित्कालं मम बैंकाकनगरेऽवस्थितिरुचितेति च सूचितम्। तदनन्तरं बैंकाकनगरे ग्रीष्मर्तुप्रभावमुपवर्ण्य तत्रत्यानि रुच्यरस्यफलानि वर्णितानि।

(ख) २४.५.१९९० दिनाङ्के प्रेषिते पत्रे तद्विषयकानिष्टस्वप्नकृतचिन्ता, १०४
तद्दुष्प्रभावनिवारणार्थं देवताप्रार्थनम्, अतिस्नेहः पापशङ्कीति ममातिस्नेह एवानिष्टस्वप्नदर्शने कदाचिद्धेतुर्भवेदिति प्रोक्तम्। तत्पश्चाद् ग्रीष्मप्रकोपः किञ्चिच्छान्तिं गतो वर्षाश्च प्रकटप्रकर्षा इति विषयान्तरं कृतम्। तदनु रामकीर्तिमहाकाव्यं थाइभाषयाऽनूदितं मुद्रणाय सज्जमित्युक्तम्। तेन सहैबातिबृहन्मम कार्यमिदं समाप्तिं गन्तेति च प्रतिपादितम्।

(ग) १५.६.१९९० दिनाङ्के प्रेषिते पत्रे जुलैमासान्ते रामकीर्तिमहाकाव्यं १०७
पर्यवसितमुद्रणं स्यादिति सम्भावना प्रकटीकृता। थाइदेशराजकुमारी काव्यस्यास्य पुरोवाकं व्यरीरचदिति च सूचितम्। तदनु मॉरिशसद्वीपे रामायणसम्मेलने समुपस्थातुं प्राप्तं निमन्त्रणं चर्चितम्, विद्वत्सङ्गप्रदात्र्या तत्रोपस्थित्या नानाऽस्फुटविषयस्फारीकारयित्र्या च मोदः स्वकीयः सूचितः।

(५९) १६.६.१९९० दिनाङ्के श्रीदुर्गादत्तशास्त्रिणः प्रति प्रेषितं पत्रम्। ११०
तत्र तेषां वियोगवल्लरीकाव्यस्य प्राप्तिवृत्तान्तः काव्यस्य गुणग्रामश्च वर्णितौ। तदनु स्वकृतस्य श्रीरामकीर्तिमहाकाव्यस्य चर्चा कृता। पर्यवसितमुद्रणे तस्मिंस्तत्प्रहेतास्मीति च सूचितम्। शरीरसादेऽपि स्वं काव्यशास्त्राभ्यसनक्रियायां व्यापारयामीति चोक्तम्। तदर्थं विद्वज्जनानामाशिषः प्रार्थिताः। सत्यव्रतस्य मम गीर्वाणवाणीसेवैव व्रतमस्तु तदर्थमेव स्वं जीवितं स्वं च स्वमर्पयेयेति स्वकीयो मनोरथः पत्रेऽस्मिन्नाविष्कृतः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(६०) १६.६.१९९० दिनाङ्के एव पुरीक्षेत्रस्थान् डा०सदानन्ददीक्षित-महाभागान् प्रेषिते पत्रे लोकभाषाप्रचारसमितिमाध्यमेन तेषां संस्कृतप्रचारसमुद्योगो मुक्तकण्ठं प्रशंसितः, वैशिष्ट्योल्लेख-पूर्वकं श्रीरामकीर्तिमहाकाव्यस्यापि चर्चा कृता। ११४

(६१) १३.९.१९९० दिनाङ्के बैंकाकतो डा० कृष्णलालमहाभागान् प्रेषितं पत्रम्। तत्राल्पेनैवानेहसा दिल्लीप्रत्यावृत्तिः बैंकाकीयानां मय्यत्यन्तं स्निग्धानां सहयोगिनां वैयाकुली च सूचिते। ऋतु-विषयेऽपि पत्रान्ते कृता चर्चा। वर्षर्तुवशाद् ग्रीष्मस्य लेशोऽपि नास्ति, हरीतिमा प्रसरति, सुखा वाता वान्ति, विकचपद्मपूर्णाः सरस्यश्च मुदमावहन्तीत्युक्तम्। ११७

(६२) ७.१०.१९९० दिनाङ्के श्रीदुर्गादत्तशास्त्रिणः प्रति दिल्लीतः प्रेषितं पत्रम्। तत्र तेषां काव्यकलाऽभिष्टुता। ११९

(६३) बैंकाकतो डा०सदानन्ददीक्षितान् ८.१०.१९९० दिनाङ्के प्रेषितं पत्रम्। अत्र तेषां लोकभाषाप्रचारसमितिकार्यं प्रशंसितं, मम षष्टिर्वर्षाणि पूर्णान्यतः परं स्वदेशनिवासेच्छा, मासान्ते तत्र प्रत्यावर्तननिर्णयः, रामकीर्तिमहाकाव्यप्रसिद्धिः, धारासारवृष्ट्या च सञ्जातो जलाप्लाव इत्यादि वर्णितम्। १२१

(६४) २३.१०.१९९० दिनाङ्के बैंकाकतः श्रीपायरमहोदयान् प्रेषितं पत्रम्। अत्रापि स्वदेशप्रतिनिवर्तनेच्छा प्रकटीकृता। तदनु शरदृतावपि धारासारवृष्टेस्तज्जनितायास्तत्रत्यायाः स्थितेश्च वर्णनम्। १२३

(६५-६६) बैंकाकनगराद् डा० कृष्णलालमहाभागान् प्रेषिते द्वे पत्रे—

(क) २०.११.१९९० दिनाङ्के प्रेषिते पत्रे बैंकाकनगरीयो विश्वविद्या-लयो मासमेकं भूयोऽपि ममावस्थितिमत्र कामयत इत्युल्लेखः। तदनुसारेणैव च कार्यं कार्यमित्यनुरोधः। १२६

(ख) २०.१२.१९९० दिनाङ्के प्रेषिते पत्रे जनवरीमासषष्ठे दिने दिल्ल्यां प्राप्तिरष्टमे च दिल्लीविश्वविद्यालये पुनः कार्यप्रारम्भ इति सूचनम्। १२७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(६७) २६.४.१९९१ दिनाङ्के बैंकाकनगराद् दिल्लीस्थदेववाणीपरिषत्सचिवान् डा० रमाकान्तशुक्लमहाभागान् प्रेषितं पत्रम्। तत्र थाइदेशमहाराजकुमार्याः षट्त्रिंशद्वर्षपूर्तिमभिलक्ष्य तस्या रामायणे च विशिष्टां रुचिं मनसिकृत्य सांस्कृतिककेन्द्राधिकारिभिरन्ताराष्ट्रियरामायणसम्मेलने समायोजिते भारत-म्यांमार (ब्रह्म, बर्मा)-लाओस-मलयेशिया-हिन्देशियेति षड्भ्यो देशेभ्यस्तत्तद्देशीयरामायणप्रयोगकुशलानां कुशीलवानां, गाथकानां, वादकानां रामकथाविज्ञानां विदुषां च निमन्त्रणस्य चर्चा कृता। तत्तद्देशीया रामकथा मिथः कथं भिद्यत इति तत्तत्प्रसङ्गोपन्यासपूर्वकं च व्याख्यातम्। १२८

(६८) २७.४.१९९१ दिनाङ्के बैंकाकनगरात्थाइदेशराजकुमारीं प्रेषितं पत्रम्। तत्रान्तरराष्ट्रियरामायणसम्मेलने भागं गृहीत्वा स्वदेशं गच्छामीति सूचितम्। तत्र प्रसङ्गेन रामायणं प्रति कोटिशो जनानां विभिन्नदेशीयानां कुत आग्रह इति विचारितम्। अत्र विषये निश्चयेन किञ्चिदपि वक्तुमशक्यत्वात्कतिचनाभ्यूहाः समुपस्थापिताः। जनो रामकथायां स्वप्रतिबिम्बं पश्यति तत एव वा तस्य तत्र विशिष्टप्रवृत्तिर्जीवनेऽन्तर्विरोधस्य वैविध्यस्य च सर्वत्र परिलक्ष्यतां गच्छतस्तत्र वर्णनं वा हेतुः स्यात्। अन्ते च श्रीरामं भगवतो नारायणस्यावतारं सङ्कीर्तयन्तोऽप्याग्नेयभूभागजना न तत्र भगवत्त्वबुद्धिं दधत्यपितु महापुरुषत्वबुद्धिमेवेत्युक्तम्। १५०

(६९) २०.५.१९९१ दिनाङ्के डा० सदानन्ददीक्षितान् प्रेषितं पत्रम्। १५४
तत्र स्वशरीरे तैर्विशेषतोऽवधातव्यमित्युक्तम्। न च मया तत्पूर्वे वयसि कृतं येन सम्प्रति नानारोगाक्रान्तः परितप्य इति च प्रतिपादितम्। अत्रैव पत्रे चापूर्णा मे अनेके ग्रन्था मया पूर्णतां नेया इति स्वमनोरथ आविष्कृतः। कालिदासविषयको ग्रन्थः (अर्वाचीनसंस्कृतवाङ्मये कालिदास इत्याख्य आंग्लभाषानिबद्धः) पर्यवसितमुद्रण इति च सूचितम्। अत्रैव चान्ते स्वकीयपद्यपत्रसङ्ग्रहो मया प्राकाश्यं निनीष्यत इति स्वाभिप्राय उद्घाटितः। यत्र यत्र मया यातं यद्वा यद्वा च वीक्षितं तस्य सर्वस्य विवरणमेषु पत्रेष्वस्तीति विचित्रा विविधा चेयं सामग्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

न मय्येव केवलं तिष्ठतु, परेषामपीयं हस्तगा स्यादिति भावना तत्प्रकाशनेच्छायां मे प्रयोजको हेतुरिति स्पष्टीकृतम्।

(७०) ३०.६.१९९१ दिनाङ्के खेकड़ास्थडा०रामकिशोरमिश्रान् प्रेषितं पत्रम्। तत्र तेषां रामकीर्तिमहाकाव्यपरिशीलनवृत्तेन सन्तोष आविष्कृतः। तदीयकृतेर्देवयान्याः प्राक्कथनं रचयिष्यामीति च प्रतिश्रुतम्। १५७

(७१) ३१.८.१९९१ दिनाङ्के नाभापुरस्थश्रीशुकदेवमुनींस्तेषां मङ्गला-नक्षत्रसञ्ज्ञककृतेः प्राप्तेः सूचकं पत्रम्। तत्कृतिवैशिष्ट्यं चात्र विमृष्टम्। १५८

(७२) ८.९.१९९१ दिनाङ्के श्रीदुर्गादत्तशास्त्रिणस्तेषां बृहत्सप्तपदी-ग्रन्थप्राप्तिसूचकं तद्वैशिष्ट्यावबोधकं च पत्रम्। १५९

(७३) १.१०.१९९१ वर्षे श्रीशुकदेवमुनींस्तदीयवेतालपराजयाख्य-नाट्यकृतिप्राप्तिसूचकं पत्रम्। अत्र तैः क्रियमाणा संस्कृत-सेवाऽभिनन्दिता। ये संस्कृतं मृतमुद्घोषयन्ति तेषां कृते नूत्न-पुस्तकानि समुचितमुत्तरमिति चोक्तम्। १६०

(७४) १०.१०.१९९१ दिनाङ्के उल्हासपुरस्थान् डा०रामचन्द्र(हरिशरण) शाण्डिल्यमहाभागांस्तदीययात्राप्रसङ्गीयकाव्यपुस्तकप्राप्तिसूचकं तद्वैशिष्ट्यबोधकं च पत्रम्। १६२

(७५)२२.१.१९९२ दिनाङ्के पण्डितदुर्गादत्तशास्त्रिणस्तदीयपञ्च-सङ्ख्याकबृहत्सप्तपदीग्रन्थप्राप्तिसूचकं तत्सुपात्रप्रतिपादनवचन-रूपं नववर्षशुभाशंसारूपं च पत्रम्। १६४

(७६) १०.३.१९९२ दिनाङ्के वृन्दावनस्थानाचार्यगौरकृष्णशास्त्रिणस्त-दीयविरहिणीव्रजाङ्गनाकाव्यग्रन्थप्राप्तिसूचकं तद्गुणोद्घाटकं च पत्रम्। १६५

(७७) २९.४.१९९२ दिनाङ्के पण्डितदुर्गादत्तशास्त्रिणः प्रेषितं पत्रम्। तत्र श्रीरामकीर्तिमहाकाव्यग्रन्थप्रेषणाय यद्धनं प्रेषितं तस्य स्वीकृतिर्दृढं प्रतिषिद्धा। न्यासरूपेण मयि स्थितं तत् कदाचिद् दिल्लीं प्राप्तेभ्यस्तेभ्यः प्रत्यर्पयिष्यत इति चोक्तम्। अनेक-रुचिरवृत्तनिबद्धं काव्यमेतद्यदि तत्प्रीतिमावहेत्तर्हि मे प्रयत्न-साफल्यं भवेदिति विचारश्च प्रकटीकृतः। १८६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(७८) १६.६.१९९२ दिनाङ्के पुरीस्थडा०केशवचन्द्रदाशमहाभागांस्त-दीयेशाभिधानकाव्यग्रन्थप्राप्तिसूचकं तत्प्रशंसापरं च पत्रम्। अनेकैः काव्यैश्च ते सुरवाचं समेधयन्तामिति शुभाशंसा च प्रकटिता। १६८

(७९) ३.११.१९९२ दिनाङ्के वडोदरास्थडा०राजेन्द्रनाणावटीमहाभा-गांस्तदीयदीपावलीशुभाशंसाप्रतिवचोरूपेण प्रेषितं पत्रम्। अत्र तेषु नानाऽऽशिषः प्रयुक्ताः। १६९

(८०) ३.११.१९९२ दिनाङ्के मुज़फ्फ़रनगरस्थान् डा०उमाकान्त-शुक्लमहोदयांस्तदीयदीपावलीशुभाशंसाप्रतिवचोरूपेण प्रेषितं पत्रम्। तत्र निर्वाणाभिमुखं संस्कृतस्य प्रदीपं दीपमालिका ज्वलयति चेन्मनोरथसाफल्यं न इति स्वहृदयोद्गारः प्रकटितः। १७०

(८१) १९.२.१९९३ दिनाङ्के बैंकाकनगराड् डा०कृष्णलालमहाभागान् प्रेषितं पत्रम्। तत्र बैंकाकनगरे स्थितेन मया नूत्नसंस्कृतवाङ्-मयाध्ययनतत्परेण तत्र प्रयुक्ताया नूत्नशब्दावलेर्नूत्नाभाणकानाञ्च कृतः सङ्ग्रहो यस्य ग्रन्थरूपेण परिणतिर्ममाभीष्टेति सूचितम्। १७१

(८२) २.४.१९९३ दिनाङ्के वृन्दावनस्थश्रीरङ्गलक्ष्म्यादर्शसंस्कृतमहा-विद्यालयप्राचार्यान् डा०मुरारिलालचतुर्वेदिमहाभागान् महावि-द्यालयीयपत्रिकाप्रकाशनविषयकनिजाभिनिवेशसूचकं पत्रम्। तल्लाभाश्च तत्र कीर्तिताः। स्वोपज्ञा लेखास्तदर्थं गुरुभिः शिष्यैश्च प्रणेया इति तत्र निर्देशः। १७२

(८३) १४.४.१९९३ दिनाङ्के खेकड़ास्थडा०रामकिशोरमिश्रमहाभागा-नपेक्षितं पत्रं लोकपद्धत्याऽऽङ्गल्यैव प्रहीयत इति सूचितम्। हिन्द्या तत्प्रेषणं तदभिमतं चेत्तर्हि तयैव तत् प्रहेष्यत इति चोक्तम्। १७३

(ख) अभिनन्दनपद्यानि

(८४) डा० धर्मेन्द्रनाथशास्त्रिणां तदीयपञ्चसप्ततिवर्षपूर्त्यवसरे रचितानि तिथिसङ्केतविहीनानि पद्यानि। १७७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(८५) श्रीचिन्तामणिद्वारकानाथदेशमुखमहाभागान् प्रति तेषां विश्व-विद्यालयानुदानाध्यक्षरूपेण नियुक्तिमुपलक्ष्य शुभाशंसात्मकानि तिथिसङ्केतविहीनानि पद्यानि। १७८

(८६) तिथिसङ्केतविहीना श्रीमदनलालकुमारियामहाभागान् प्रेषिता शुभाशंसा। १७९

(८७) प्रो० सरूपसिंहमहाभागानां दिल्लीविश्वविद्यालयकुलपतिपदे नियुक्तिमुद्दिश्य समर्पितमभिनन्दनपत्रम्। १८०

(८८) प्रो० शेरसिंहसुपुत्र्या उज्ज्वलाशर्ममहाभागायाः पुत्रस्य सिद्धार्थस्य कृते ३०.१०.१९७३ दिनाङ्के प्रेषिता शुभाशंसा। १८२

(८९) दरभङ्गास्थकामेश्वरसिंहसंस्कृतविश्वविद्यालयप्राक्तनकुलपतिभिः प्रो० मुनीश्वरझामहाभागैः सम्पादितं कविवरविद्यापतिरचितं भूपरिक्रमणग्रन्थमधिकृत्य प्रणीता अभिनन्दनसप्तपर्णी। १८४

(९०) १९७६ वर्षे दिल्ल्यां जनकपुर्यां समायोजिते कस्मिंश्चिदुत्सवे सभापतीन् पण्डितकमलापतित्रिपाठिमहाभागानुद्दिश्य व्याहृतानि स्वागतपद्यानि। १८५

(९१) श्रीशिवराममूर्तिमहाभागानां पद्मभूषणोपाधिसत्कृतिमभिलक्ष्य कृतमभिनन्दनम्। १८७

(९२) ५.६.१९७६ दिनाङ्के प्रेषिता श्रीकृष्णवल्लभाचार्याभिनन्दन-सप्तपर्णी। १८९

(९३) २५.१२.१९७६ दिनाङ्के सुप्रभातपत्रिकाया विशिष्टाङ्कमभिलक्ष्य जम्बूपुरवास्तव्यान् रामकृष्णशास्त्रिणोऽव्ययोपाह्वान् प्रेषिताऽभि-नन्दनसप्तपर्णी। १९१

(९४) २१.२.१९७७ दिनाङ्के प्रेषितं श्रीकुन्दनलालशर्मशुभाशंसाष्टकम्। १९३

(९५) प्रो० श्तीतनक्रॅनमहाभागानां पञ्चाशं जन्मदिवसमुपलक्ष्य २९.६.१९८३ दिनाङ्के प्रेषितमभिनन्दनाष्टकम्। १९५

(९६) २८.३.१९८७ दिनाङ्के थाइदेशराजकुमार्यास्त्रयस्त्रिंशं जन्मदिवसमुपलक्ष्य प्रेषिताः शुभाशंसाः। १९७

(९७) मुरादाबादनगरस्थश्रीगोकुलदासहिन्दुकन्यामहाविद्यालयस्य रजतजयन्त्युत्सवमभिलक्ष्य प्रेषिताऽभिनन्दनसप्तपर्णी। १९८

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(९८) थाइदेशमहाराजकुमार्याः पञ्चत्रिंशं जन्मदिवसमुपलक्ष्य २९.३.१९८९ दिनाङ्के प्रेषिताः शुभाशंसाः। २००

(ग) अभिभाषणपद्यानि

(९९) लेखकस्य साहित्यअकादमीसम्मानमुपलक्ष्य दिल्लीस्थेन भारतीयविद्यासंस्थानेन तदानीन्तनदिल्लीविश्वविद्यालयकुलपतीनां डा० वी० के० आर० वी० रावमहोदयानामध्यक्षतायां ३०.८.१९६९ दिनाङ्के समायोजितेऽभिनन्दनोत्सवे पठितानि पद्यानि। २०५

(१००) दिल्लीस्थे हस्तिनापुरमहाविद्यालये तदीयसंस्कृतपरिषद उद्घाटनावसरे प्रोफेसरपदोपलब्ध्यभिनन्दनोत्सवावसरे च १०.९.१९७० दिनाङ्के पठितानि पद्यानि। २०७

(१०१) ११.९.१९७० दिनाङ्के दिल्लीविश्वविद्यालयसंस्कृतविभागेन समायोजिते प्रोफेसरपदोपलब्ध्यभिनन्दनोत्सवे पठितानि पद्यानि। सङ्ग्रथिताः सन्तो वयं कार्यं कुर्यामिति तेषु निर्देशः। विभागस्तत्र नन्दनोद्यानतुल्यो निरूपितः। विभागीयव्यवस्थाविषयेऽपि तत्र स्वमतमाविष्कृतम्। कया पद्धत्याऽध्यापकनियुक्तयः सन्तु, गवेषणाकार्यं च कथं प्रवर्ततामित्यादयो विषयास्तत्र स्पृष्टाः। २०९

(१०२) २१.९.१९७० दिनाङ्के हिन्दुकालेजेऽभिभाषणम्। अत्र विद्याया महत्त्वमुद्घोष्य सदैव विद्याभ्यसनं विधेयम् आगमकाले च विद्यार्थिभिर्ज्ञानार्जने कर्तव्यः श्रम इत्युपदिष्टम्। २१३

(१०३) उज्जयिन्यां कालिदाससमारोहावसरे नागरिकसम्मानवेलायां १३.११.१९७० दिनाङ्के पठितानि सद्यो रचितानि पद्यानि। अत्र कविमध्ये स्वस्योपस्थित्या हर्ष आविष्कृतः। २१६

(१०४) १९७५ वर्षे दिल्लीविश्वविद्यालयेन समायोजिते संस्कृतनाट्यसमारोहे मुख्यातिथिपदमलङ्कुर्वतां पूर्वजर्मनीस्थबर्लिनविश्वविद्यालये संस्कृतप्राध्यापकानां प्रो० वोल्फगांग मार्गनराथमहाभागानां स्वागतार्थं व्याहृतानि पद्यानि। एषु इटलीदेशे ट्युरीनपुर्यां समायोजिते विश्वसंस्कृतसम्मेलने बॉपेन पिशलेन चाप्यधिष्ठितचरं विद्यापीठमध्यासीनैरेभिर्मम प्रथमसाक्षात्कारः २१७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

समभूद्यः कालान्तरे मैत्र्यरूपेण परिणतो यद्वशादेवैते मुख्याति-थित्वाय मम निमन्त्रणमङ्गीकृत्य संस्कृतविभागमुपेता इत्युक्तम्। मार्गनराथमहाभागस्वागतानन्तरं पूर्वतनदिल्लीमुख्यकार्यकारि-पार्षदानां श्रीराधारमणानां, तदानीन्तनभारतशासनशिक्षामन्त्रा-लयाधिकारिणां प्रभातचन्द्रशर्मणां पत्रकारमूर्धन्यानामक्षय-कुमारजैनानां च कृते व्याहृतानि स्वागतपद्यानि।

(१०५) १९७६ वर्षे समायोजिते संस्कृतनाट्यसमारोहे पठितानि पद्यानि। एषु त्रिदिवसीयेऽत्र समारोहेऽभिनेतारो विभागीयच्छात्रा एवेति सूचितम्। तेषां कुशीलवकलाभावेऽपि तत्प्रयोगसमुपस्था-पनप्रयत्नो मोदमातनुयात्समुपस्थितानामित्याशा च प्रकटीकृता। २२१

(१०६) धारवाडनगरे १९७६ वर्षे नवाम्बरे मास्यखिलभारतीय प्राच्यविद्यासंमेलनस्याष्टाविंशेऽधिवेशने लौकिकसंस्कृतवर्गा-ध्यक्षीयभाषणोपन्यासात्पूर्वं पठितानि पद्यानि यत्र विद्व-द्गणसमाकीर्णा सभा नमस्कृता। २२३

(१०७) अमेरिकादेशान्तर्गतफिलाडेल्फियानगरस्थपेन्सिल्वेनियाविश्व-विद्यालये समायोजिते षष्ठे विश्वसंस्कृतसम्मेलनेऽर्वाचीन-संस्कृतविषयिकायां चर्चागोष्ठ्याम् १४.१०.१९८४ दिनाङ्के-ऽध्यक्षीयभाषणोपन्यासात्पूर्वं पठितानि पद्यानि यत्र विदुषां समागमेन सुखं तेषु चार्वाचीनसंस्कृतवाङ्मयस्य भाषावि-वेकार्थो ममोद्यमो, नूत्नासु कृतिषु च कोऽपि वैचित्र्यविशेषो मया विद्वत्पुरतस्समुपस्थापनीयावित्युक्तम्। २२४

(१०८) दिल्लीस्थकिरोड़ीमलकालेजे कस्मिंश्चिदुत्सवे पठितानि तिथि-निर्देशरहितानि पद्यानि। अत्र भारवेः पद्यानां सम्यग्गानं मह्यमरोचतेत्युक्तम्। प्रतिस्पर्धिनो विशेषतः पुरस्कारविजे-तारोऽत्र सम्भाविताः। २२६

(१०९) तिथिनिर्देशशून्या श्रीचिन्तामणिद्वारकानाथदेशमुखप्रशस्तिः। २२७

(घ) प्रकीर्णपद्यानि

(११०) शिमलास्थराजकीयनेहरूमहाविद्यालयपत्रिकायाः श्यामल-सुधायाः कृते शुभाशंसा। २३१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(१११) तनूजस्य शरच्चन्द्रस्यानुरोधेन रघुवंशमधीयानं तमवलोक्य ४.१.१९७१ दिने सद्यो रचितं पद्यम्। २३२

(११२) बैंकाकनगरस्थचुलालौङ्कौर्नविश्वविद्यालये सहयोगिनीं तस्स-नीमुद्दिश्य १६.११.१९७७ दिनाङ्के सद्यो रचितानि पद्यानि यत्रैतद्विश्वविद्यालयीया मयि हार्दिनः, तस्सनी मयि स्वसृवत्स्नेहभावं बिभर्ति मत्सुखं सुविधां च नित्यं चिन्त-यत्यचिरकालिकेऽपि सम्पर्के इत्याद्युक्तम्, आशिषश्च तत्क-न्यारत्नार्थे प्रयुक्ताः। २३०

(११३) १९७८ वर्षे थाइदेशे भारतीयैर्भगवतो नारायणस्य मूर्ति-बैंकाकनगरे प्रतिष्ठापिता। तदवसरे रचितानि पद्यानि यानि मूर्तिपीठे चतुर्दिशमुत्कीर्णानि। कोशीन्द्ररत्नगरापराभि-धानबैंकाकनगरनिवेशनस्य संवत्सरद्विशतीपूर्तिमभिलक्ष्य मूर्तिरियं स्थापिता थाइदेशं प्रति प्रवासिभारतीयानां स्नेहप्रतीकरूपा। नारायणविग्रहोऽत्र सम्यग् वर्णितः। २३४

(११४) शर्मण्यदेशीयट्यूबिंगनविश्वविद्यालयकार्यकालसमाप्त्यवसरे श्रीपायरमहाभागैः स्वगृहे समायोजिते सौप्रस्थानिकोत्सवे २४.६.१९८३ दिनाङ्के पठितानि पद्यानि, यत्र पुस्तकसम्भृतस्य पायरस्य वेश्मनः प्रशंसा, नूलगृहे तस्य सुखकरनिवासकृते शुभाशंसा, ट्यूबिंगने मम प्रवाससौख्यं, ततो वियोगेन दुःखं, स्मर्तव्योऽहमित्यनुरोधः, कायेन दूरस्थोऽपि मनसा समीपस्थ एव, पुनरस्तु त्वरितं समागम इत्यभिलाष इत्याद्याविष्कृतम्। २३५

(११५) १६.१२.१९८४ दिनाङ्के श्रीमतीभिः पुष्पात्रिवेदिमहाभागा-भिर्विरचितस्याग्निशिखेत्याख्यस्य काव्यस्य विषये प्रेषिता सम्मतिः। अत्र काव्यकृतेर्गुणग्रामः सम्यगुद्घाटितः। २३८

(११६) २८.३.१९८७ दिने थाइदेशमहाराजकुमार्या भारतदेशात् प्रस्थानकाले समर्पितानि सौप्रस्थानिकपद्यानि यत्र भारत-शासननिमन्त्रणेनाष्टादश दिनानि भारते यापयित्वा स्वदेशं प्रतिष्ठमानायां तस्यां वियोगदुःखं प्रकटितम्, स्वकीयाः शुभा-शंसाश्च तस्यै समर्पिताः। २३८

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(११७) रूसदेशीयक्रान्तिमभिलक्ष्य कदाचिद्रचितानि पद्यानि। एषु प्रवर्तमान: साम्यवाद: स्पष्टीकृत:। २४२

(११८) शर्मण्यदेशीयट्यूबिंगननगरस्य वर्णनं, यत्र विश्वविद्यालये मयाऽभ्यागताचार्यरूपेणाध्यापितम्। नेकारनद्या निकटे निविष्टं पादपराजिभिर्विराजितं तदपूर्वां सुषमां बिभर्तीति वर्णितम्। २४४

(११९) २६.३.१९९० दिनाङ्के रचितं दिल्लीत: प्रकाश्यमानायां 'संस्कृतामृतम्' पत्रिकायां प्रकाशितं श्रीकिशोरीलालस्मृत्यष्टकं यत्र तच्छ्रेष्ठकार्यजातं, विशेषत: स्वजन्मभुवि पञ्चनदप्रदेशे संस्कृतसाहित्यसम्मेलनस्थापनरूपं स्मृतम्। २४६

(१२०) १२.९.१९९२ दिनाङ्के दिल्ली संस्कृत अकादम्या समायोजितेऽखिलभारतीयसंस्कृतपत्रकारसम्मेलनोद्घाटनावसरे पठितानि पद्यानि। अत्र संस्कृतपत्रिकाणां सम्पादने लेखार्थमुद्रणासौविध्यादिकष्टपरम्परां सोढ्वाऽपि सम्पादकानां संस्कृतहितसम्पादनपराणामभियोगोऽभिष्टुत:। दिनत्रयं दिल्ल्यां तेषां सुखेन गच्छत्विति प्रार्थना च कृता। २४८

(१२१) १९९० वर्षे बैंकाकनगरीयथाइभारतपत्रिकायां प्रकाशिता श्रीबुद्धदेवप्रशस्ति:। २५०

(१२२-१२३) हंगरीदेशीयमहाकवे: शान्दोरवरेशस्य कवितयो: "प्रबलवेगवती धारा", "आन्तरिकादनन्तात्परम्" इति शीर्षकाभ्यां संस्कृतानुवाद:। २५२

(१२४) अचिरप्रारब्धस्य विश्वमहाकाव्यस्य प्रारम्भिकाणि पद्यानि। अत्र नाना देशेषु या या: प्रमुखा घटना अघटिषत तासां वर्णनमभीप्सितम्। कार्यमेतदतिकठिनमिति विदुषोऽपि मम तत्र प्रवृत्तिं दु:साहसरूपां विदुष: क्षमापयता विश्वस्य विश्वस्य वृत्तचक्रनिरूपणे संक्षेपधियैव मया प्रवृत्तं, यच्चोक्तं तदैतिह्यमालोड्य सप्रमाणमेवेत्युक्त्वा विद्वद्भिर्दृक्पातमात्रेण सम्मानितेऽस्मिन्मम परिश्रम: फलेग्रहि: स्यादिति निवेदितम्। २५६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(ङ) उपसंहारः २५९

अनेकदेशीयमुदन्तजातं बन्धुजनान् निरूपयत् परस्सहस्रैः पद्यैर् निबद्धं पत्रकाव्यं यदि सूक्ष्मेक्षिकाणां विदुषां रुचिमादधीत तर्हि सफलो मे भवेत्प्रयत्न इति काव्यकर्तुर्निवेदनम्। लेखान्तरापेक्षया पत्रेण स्वकीयो भावः साधुतरामाविष्कृतो भवतीति सन्देशप्रेषणार्थं तस्योपयोगिता, अनेनैवोत्कण्ठितजनानां किञ्चित्सान्त्वनसम्भवः। पुरा कपोतादिपक्षिप्रेष्यस्य सन्देशस्य सम्प्रति नैकविधैरन्यैरपि विचित्रैः साधनैः फैक्सादिभिः प्रेषणसम्भवः। अतोऽस्य महत्त्वं सम्प्रधार्य संस्कृतज्ञैः संस्कृतवाचोपनिबद्धानां पत्राणां प्रेषणे मनो देयमित्यनुरोधः। न केवलं पत्रेष्वन्येष्वपि बहुषु विषयेषु तैरात्मा व्यापारयितव्य इति प्रार्थनम्। संस्कृते मौलिकस्यात्मकथारूपस्य दैनन्दिनस्य च वाङ्मयस्य पारस्यां रोज़नाम्चेत्याङ्गल्यां च डायरीतिख्यातस्य सुतरामभावः। एवमेव तत्र गुरुजनानां जीवने प्रतिदिनं घटमानानां घटनानां तदुपदेशानामन्यैः सह तैः कृतानां चर्चानां च क्रमबद्धस्य विवरणस्य तच्छिष्यैः कृतस्य पारस्यां मल्फूज़ातेतिख्यातस्याप्यस्तित्वं नास्ति। मक्तूब्निगारीति तत्र कीर्तितं पत्रवाङ्मयमपि संस्कृते विरलमेव। यद्येतादृशं वाङ्मयं संस्कृतेऽपि भवेत्तर्हि तद् भूयोऽपि समृद्धं स्यात्। तेनाद्यावध्यसमृद्धेंऽशे तस्य संस्कृतज्ञानामात्मव्यापारणे महाँल्लाभ इत्युक्त्वा तदर्थमेव स्वकीयस्य पत्रकाव्यस्य मया प्रकाशनमिति निवेदनम्। अनेनैव च काव्यपरिसमाप्तिः।

(च) अनुक्रमण्यः २६

खवेदप्रायवर्षेषु पत्रैर्यद् व्याहृतं मया।
स्पृशता विषयान् नाना सूची तस्येयमर्पिता॥
हृत्स्थस्य विश्वरूपस्य बद्धस्य स्नेहतन्तुना।
भावनिध्यातरूपस्य श्रीविष्णोः पादपद्मयोः॥

— o —

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पत्राणि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पितृचरणाञ्श्रीचारुदेवशास्त्रिणः प्रति प्रेषितं पद्यद्वयम् । तिथिनिर्देशोऽत्र नास्ति ।

(स्वागतावृत्तम्)

आशिषो गुरुजनैर्हृदयेन
हारिता लघु दलद्वितयेन ।
आप्य हर्षमतुलं प्रतिपन्नः
साञ्जलिश्चरणयोः प्रणमामि ॥ १ ॥

बालचापलमभूदिह यन्मे
क्षान्तमेव तदिति प्रमुदे मे ।
वायुनाऽपि बलवत्प्रविधूताः
सङ्किरन्ति तरवः कुसुमानि ॥ २ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पितृचरणान्प्रति प्रेषितमपरं पत्रम् । साध्वाश्रमे तेषां निवासकाले प्रेषितमिति वर्णनादत्र कृता-दुन्नेतुं शक्यते । तिथिनिर्देशोऽत्र नास्ति । १९५५-५६ वर्षगतमिदं भवेत् ।

(उपजातिवृत्तम्)

सम्प्राप्य तूर्णं प्रणयेन पूर्णं
दलं सरागं भवदीयमद्य ।
वाचं स्वकीयां विसृजामि सद्यस्-
तुष्टोऽस्मि हृष्टोऽस्मि सुखं स्थितोऽस्मि ॥ १ ॥

शास्त्राणि नक्तन्दिवमभ्यसन्तस्-
तदन्तरे वा कृत-साधु-सङ्गाः ।
विश्वस्य बन्धुत्वमवाप्य दिव्यं
ताताः सुखं स्वं समयं नयन्ति ॥ २ ॥

ज्ञात्वाऽपि वृत्तं निखिलेन सर्वं
न शान्तिमायाति कुतूहलं मे ।
भवादृशानां वचनानि हारी-
ण्यहो ! कियत् कौतुकमावहन्ति ॥ ३ ॥

(इन्द्रवज्रावृत्तम्)

वैदुष्यविभ्राजितदिग्दिगन्ता
विद्वत्सभाभ्यर्चितपादपद्माः ।
सुव्यक्तवाचो मम कोविदाग्र्या
आचार्यवर्याः प्रणतिं निवेद्याः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

आचार्यविद्यानिधिशास्त्रिणः प्रति प्रेषितं पत्रम् । तिथिनिर्देशोऽत्र नास्ति । १९५५-५७ मध्यगतमिदं स्यात्

(उपजातिवृत्तम्)

यत्सत्यमद्य प्रचुरप्रमोद-
वारांनिधावस्मि कृतप्रवेशः ।
चिराय लब्धा नहि किं प्रवृत्तिः
प्रियस्य बन्धोः प्रियमातनोति ॥ १ ॥

गृहादिनिर्माणविधौ प्रसक्ता
आचार्यवर्याः कलयाऽपि कालम् ।
न लेभिरे वृत्तमिति प्रगृह्य
कष्टं दधद्धीण इवास्मि सागाः ॥ २ ॥

कच्चित्सुखं कर्मसु सज्जमाना
रंरम्यमाणा गृहवाटिकासु ।
पितुः प्रहर्षं परिवर्धयन्तः
सर्वे सुपुत्राः कुशलोपपन्नाः ॥ ३ ॥

कच्चित्सुखं तिष्ठति गेहके सा
पूज्या ममाम्बा गृहकार्यदक्षा ।
अन्येऽपि ये ज्ञातिगणा भवेयु-
रनामयं ते कलयन्ति कच्चित् ॥ ४ ॥

इदं समस्तं प्रियवृत्तजातं
जिज्ञासमानः खलु विस्तरेण ।
श्रीमत्पदाम्भोरुहचञ्चरीकः
सत्यव्रतोऽहं विरमामि वाचः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

डा० सुनीतिकुमारचाटुर्ज्यामहाभागान् प्रति प्रेषितं पत्रम् । तिथिनिर्देशोऽत्र नास्ति

(गीतिवृत्तम्)

भारतभूमिललाटे तिलकायितकीर्तिकीर्तिता दिक्षु ।
विद्वज्जनाभिवन्द्या जयन्ति सुनीतिकुमारशर्माणः ॥ १ ॥

(उपजातिवृत्तम्)

हृद्यानवद्याखिलविद्यमान-
विद्याभिविद्योतितमानसानाम् ।
दिगन्तविश्रान्तयशोविलास-
विराजितानां तपसोज्ज्वलानाम् ॥ २ ॥

सदैव भक्तो भवतां, मतश्च
स्नेहातिरेकात्सुतनिर्विशेषम् ।
श्रीमत्पदाम्भोरुहभृङ्गितात्मा
सत्यव्रतोऽहं शिरसा नतोऽस्मि ॥ ३ ॥

(अनुष्टुब्वृत्तम्)

मनसा त्वरमाणोऽपि न स्वस्थ इति कारणात् ।
निबन्धप्रेषणे मान्याः ! सत्यं किञ्चिद् व्यलम्बिषि ॥ ४ ॥

तदर्थं मर्षणीयोऽहं क्षमाशीला हि साधवः ।
भवतां पुनरौदार्यं लोकानुल्लङ्घ्य जृम्भते ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अद्य सम्प्रेषये पूज्याः ! निबन्धं भवदन्तिकम् ।
मन्ये द्वित्रैर्दिनैरेष श्रीमत्पार्श्वमुपैष्यति ॥ ६ ॥

आशासे रोचयिष्यन्ते कृतिं मे कृतिनां वराः ।
शब्दशास्त्राद्यकूपारपारदृश्वधुरन्धराः ॥ ७ ॥

सत्यव्रतेन मयका भक्तिप्रवणचेतसा ।
भवद्भ्यः स्वेष्टदेवेभ्यः श्रद्धानैवेद्यमर्प्यते ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शिमलास्थराजकीयनेहरूसंस्कृतमहाविद्यालयप्राध्यापकान् श्रीसच्चिदानन्दकाण्डपाल-महोदयान्प्रति प्रेषितं पत्रम् । तिथिनिर्देशोऽत्र नास्ति ।

श्री काण्डपाल महोदयाः,

जयतु भारती ।

(अनुष्टुब्वृत्तम्)

भवत्पत्रं समासाद्य हर्षो मे परमोऽजनि ।
उदन्तो बन्धुजातस्य न जनं कं हि मोदयेत् ॥ १ ॥
वर्धापनार्थं भवतां कृतज्ञोऽस्मि परं बुधाः ।
सेवां सुरसरस्वत्याः कर्तुं यत्नो भवेन्मम ॥ २ ॥
'पीएच० डी०' त्युपाध्यर्थं भवन्तो हि समुत्सुकाः ।
इति ज्ञात्वा महांस्तोषो हर्षश्च सुतरां मम ॥ ३ ॥
भवादृशा यद् विद्वांस एतदर्थं समुत्सुकाः ।
तेन सम्भावये क्षेमं राष्ट्रस्य सुतरामहम् ॥ ४ ॥
वैधानिकं खलु भवेत् किञ्चित्तत्र तु बन्धनम् ।
विचार्य सकलं कार्यं कार्यं कार्यं बुधैरिह ॥ ५ ॥
तदर्थमत्रागमनं साधु स्यादिति मे मतम् ।
साक्षात्सम्भाषणेनैव सर्वं सम्यग्भविष्यति ॥ ६ ॥
श्रीदिवाकरदत्ताख्या मान्याः शास्त्रविदां वराः
मद्वाक्यात्सुहृदां श्रेष्ठा निवेद्याः प्रणतिं मम ॥ ७ ॥

इति संक्षिप्तं वचः
सुरसरस्वतीप्रणयिनः
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१.१.१९६४ दिनाङ्के दिल्लीविश्वविद्यालयसंस्कृतविभागाचार्यान् डा० कृष्णलालमहोदयान् प्रति प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,

(अनुष्टुब्वृत्तम्)

आसाद्य भवतां काव्यमास्वाद्यापि च तद्रसम् ।
अमन्दानन्दसन्दोहमन्वविन्दमहं परम् ॥ १ ॥

वर्धापयेऽहं भवत आशीर्भिश्चापि वर्धये ।
प्रार्थये च जगन्नाथं भवतामभिवृद्धये ॥ २ ॥

नित्यं काव्यकलासक्ताः शास्त्राध्ययनतत्पराः ।
जीव्यासुः कृष्णलालाख्या बन्धवो मे चिरं सुखम् ॥ ३ ॥

इत्याशिषो मे
शुभेच्छोः
सत्यव्रतस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२३.८.१९६७ दिनाङ्के खन्नास्थाचार्यश्रीविश्वनाथशास्त्रिणः प्रति प्रेषितं पत्रम्

मान्याः,
सादरं वन्दे ।

(अनुष्टुब्वृत्तम्)

भवत्पत्रं समासाद्य स्नेहसारेण संयुतम् ।
मुदां कोटिमहं प्राप्तः काञ्चिद्वाचामगोचराम् ॥ १ ॥

भवादृशाः सदाचारा लोकसङ्ग्रहतत्पराः ।
विद्याविद्योतितस्वान्ता दुर्लभा मानवा भुवि ॥ २ ॥

गुरुगोविन्दसिंहस्य वृत्तं काव्यमयं मया ।
उपन्यबन्धि गीर्वाणगिरा मोदाय धीमताम् ॥ ३ ॥

लोकोत्तरचरित्राढ्यः क्वासौ ब्रह्ममयः पुमान् ।
लोके च सुतरां सक्तः क्वाहं मन्दमतिर्जनः ॥ ४ ॥

तथापि भवतामाशीराशिभिः प्रेरितोऽनिशम् ।
काव्याब्धेर्दुस्तरस्यास्य पारं यातोऽस्मि पङ्गुवत् ॥ ५ ॥

कृतिमेतां ममाधीत्य प्रमोदं यदवाप्नुवन् ।
भवन्तस्तदहं मन्ये पुण्यानामेव मे फलम् ॥ ६ ॥

सुकृतोपार्जितानां हि पुण्यानां परिपाकतः ।
लोकेऽतिदुर्लभः सत्यं विद्वत्तोषोऽधिगम्यते ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

श्रीतातपादा अद्यत्वे देहलीस्था मुदा युताः ।
सस्नेहं भवतो नैकान् प्रणामान् व्याहरन्तकि ॥ ८ ॥

तर्कसङ्ग्रहसङ्ग्राहे मल्लानां भवतां शुभाम् ।
टीकां विलोक्य यत्सत्यं प्रमोदो मे भविष्यति ॥ ९ ॥

तदञ्जसैव सम्प्रेष्या सेति सम्प्रार्थना मम ।
विद्वत्पादाब्जभृङ्गस्य नित्यं वृद्धोपसेविनः ॥ १० ॥

सत्यव्रतस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२७.६.१९७० दिनाङ्के पटियालास्थ डा० धर्मेन्द्रकुमारगुप्तमहाभागान् प्रति प्रेषितं पत्रम्

(अनुष्टुब्वृत्तम्)

अद्य प्राह्णे भवत्पत्रं स्नेहपूरेण पूरितम् ।
अधिगम्य प्रमोदस्य परां कोटिमहं गतः ॥ १ ॥

राज्ञीक्षेत्रात्[1] सद्य एव प्रत्यायातोऽस्मि देहलीम् ।
ग्रीष्मतापपरीतात्मा कार्यभारेण चोदितः ॥ २ ॥

तपत्यजस्रं बलवद् भगवान् तिग्मदीधितिः ।
उष्णाश्च वायवो वान्ति सर्वलोकस्य कष्टदाः ॥ ३ ॥

तथाप्यनीशः स्वस्याहं सम्प्राप्तो देहलीमिमाम् ।
लभे ग्रीष्मेण सन्तप्तो न क्षणं क्षणमप्यहम् ॥ ४ ॥

मन्ये कतिपयैरेव वासरैः पुनरप्यहम् ।
प्रकृतिं स्वामुपैष्यामि न च कष्टं भवेन्मम ॥ ५ ॥

इति वचो मम
सदा भवन्मङ्गलाकाङ्क्षिणः
सत्यव्रतशास्त्रिणः

---

१. रानीखेत इति लोकभाषायाम्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गुरुकुलकांगड़ीस्थं प्रियशिष्यं बुद्धदेवशर्माणं प्रति २०.८.१९७० दिनाङ्के प्रेषितं पत्रम्

(अनुष्टुब्वृत्तम्)

बुद्धदेवसमाख्याय प्रियशिष्याय धीमते ।
आयुष्मते विनीताय विलसन्तु ममाशिषः ॥ १ ॥

अद्य प्राह्णे मया प्राप्तं पत्रं स्नेहरसान्वितम् ।
मधुमय्या तथा वाचा निबद्धं हृन्निबन्धनम् ॥ २ ॥

प्राप्तमात्रेण येनाहं रुचिराक्षरशोभिना ।
आरोपितः परां कोटिमानन्दस्यान्यदुर्लभाम् ॥ ३ ॥

(रुचिरावृत्तम्)

भवतः पृथगर्थगवीरचने
नववृत्तनिबन्धनशक्तितया ।
मम हृद्यपदावलियोजनया
रुचिरा रुचिरारचिता न चिरात् ॥ ४ ॥

(अनुष्टुब्वृत्तम्)

विभागाध्यक्षपदवीमासादितवतो मम ।
हर्षो यो भवतो जातस्तेन तुष्याम्यहं भृशम् ॥ ५ ॥

भवादृशानां सुहृदां शुभाशंसा फलेग्रहिः ।
सञ्जातेत्येव मयका वक्तव्यं नात्र संशयः ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(गीतिवृत्तम्)

विद्याभ्यासो व्यसनमथवा हरिपादसेवनं व्यसनम् ।
भूयाद् भवतः सुतरामाशीरेषा ममास्तु भवतेऽद्य ॥ ७ ॥

शुभेच्छोः
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रोफेसरपदलाभमुद्दिश्य प्राप्तस्य पत्रस्य प्रतिवचोरूपेण पटियालास्थ डा० धर्मेन्द्रकुमार-गुप्तमहाभागान् प्रति १.९.१९७० दिनाङ्के प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,

सर्वदा सर्वत्र शिवमस्तु ।

(शालिनीवृत्तम्)

प्राप्तं पत्रं प्रेषितं यद् भवद्भि-
ईष्टश्चाहं प्राप्तमात्रेण तेन ।
बन्धूनां सत्प्रेमगर्भा गिरो हि
कल्याणानामर्पयित्र्यो भवन्ति ॥ १ ॥

(उपजातिवृत्तम्)

भवादृशानां सुहृदां गरीयान्
स्नेहो मयि स्याच्चिरसम्प्ररूढः ।
सदा च शास्त्राभ्यसने प्रवृत्ति-
र्नित्यं च भक्तिर्जगदीश्वरेऽस्तु ॥ २ ॥

(इन्द्रवज्रावृत्तम्)

इत्येव कामो मम वर्ततेऽद्य
नातः परं किञ्चिदिहास्ति मेऽर्थ्यम् ।
लोकत्रयाधीश्वर एव शिष्टं
सम्पादयेत्कर्म समस्तमेव ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(अनुष्टुब्वृत्तम्)

प्रार्थ्यो महेश्वरः सर्वैर्मम साफल्यहेतवे ।
सफलत्वं हि बन्धूनामात्मसाफल्यमुच्यते ॥४ ॥

स्नेहवर्षेण सुहृदां गुरूणां कृपया मम ।
ईशानुकम्पया स्याच्च साफल्यं सर्वकर्मसु ॥५ ॥

इत्याशंसन् विरमति
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रोफेसरपदलाभमुद्दिश्य प्राप्तस्य पत्रस्य प्रतिवचोरूपेण वाराणसेयाञ्श्रीबटुकनाथशास्त्रि-खिस्तेमहाभागान् प्रति १.९.१९७० दिनाङ्के प्रेषितं पत्रम्

मान्या बन्धुवर्याः,

सस्नेहं प्रणतिततयः ।

(वसन्ततिलकावृत्तम्)

आशीर्वचो हि भवतां भवतापहारि
यत्प्राप्तमद्य मयका परमोपकारि ।
जातोऽस्मि तेन सुतरां मुदितान्तरङ्गो
दिव्यं निधिं नु समवाप्य न कः प्रहृष्येत् ॥ १ ॥

(अनुष्टुब्वृत्तम्)

तोयगर्भा यथा मेघा धातुगर्भा यथाद्रयः ।
कल्याणगर्भा विदुषां तथैव ह्याशिषो मताः ॥ २ ॥

गरीयान् कार्यभारो हि निर्वोढव्यो मयाऽधुना ।
भगवान् पार्वतीजानिः शक्तिं मेऽच्छां प्रयच्छतु ॥ ३ ॥

भवद्भिश्चापि विद्वद्भिः प्रयोज्या आशिषो मयि ।
इति सम्प्रार्थये प्रेम्णा वाचं स्वां चोपसंहरे ॥ ४ ॥

सुरसरस्वतीसमुपासकोऽहं
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रोफेसरपदोलब्धिवर्धापनायाः प्रतिवचोरूपेण सहाध्यायिनो रोहतकस्थान् प्रो० रणजीतसिंह-महाभागान् ५.९.१९७० दिनाङ्के प्रेषितं पत्रम्

प्रिया बन्धुवर्याः

(अनुष्टुब्वृत्तम्)

वर्धापनात्मकं पत्रं स्नेहपूरेण पूरितम् ।
आसाद्य भवतामद्य प्रमोदः परमोऽजनि ॥ १ ॥

विद्याव्यसनिनां सत्यं शुभाशंसा फलेग्रहिः ।
भवत्येव हि बन्धूनां सौहार्दवशनिःसृता ॥ २ ॥

(वसन्ततिलकावृत्तम्)

आक्रामति द्रुततरं ननु शास्त्रसिंहे
को वा भवेन्न सफलो रणजित्सहायः ।
इत्येतदेव वचनं रणजित्सु मेऽद्य
धर्मे[1] च धीर्भवतु मे नियतेति चैव ॥ ३ ॥

(अनुष्टुब्वृत्तम्)

सपुत्रदाराः श्रीमन्तः सर्वदा सन्त्वनामयाः ।
ऋद्ध्या च परया युक्ता हार्दोऽयं मे मनोरथः ॥ ४ ॥

कार्यभारो गुरुतरो नियत्या निधृतो मयि ।
शुभाशंसाः कामयेऽहं तत्र साफल्यहेतवे ॥ ५ ॥

---

१. अपरस्य सहाध्यायिनो धर्मसिंहस्य व्यपदेशेनात्र सङ्केतः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सुहृदां सौहृदौघेन गुरूणामाशिषा तथा ।
वोढुं कार्यधुरं गुर्वीं सहेलमहमुद्यतः ॥ ६ ॥

सर्वदा भवदभ्युदयाभिलाषुकः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३०.९.१९७० दिनाङ्के श्रीदुर्गादत्तशास्त्रिणः प्रति प्रेषितं पत्रम्

मान्याः पण्डितश्रीदुर्गादत्तमहाभागाः,

सादरं नमस्काराः ।

(अनुष्टुब्वृत्तम्)

भवत्पत्रद्वयं प्राप्य प्रेमपीयूषवर्षकम् ।
कलये धन्यमात्मानं हृष्यामि च मुहुर्मुहुः ॥ १ ॥

कार्यान्तरव्यापृतत्वादस्वास्थ्याच्चापि कोविदाः !
नापपारमितः पूर्वं पत्रं प्रेषयितुं न्वहम् ॥ २ ॥

एतदर्थं क्षमां याचे बुधान् कविशिरोमणीन् ।
आशासे मम वैवश्यान्मर्षयिष्यन्ति मां बुधाः ॥ ३ ॥

काव्यद्वयं मया प्राप्तं सज्जनानन्दवर्धनम् ।
सज्ज्ञानशिक्षयोपेतं सच्छ्लोकशतशोभितम् ॥ ४ ॥

तन्निपाठं निपाठं हि पायं पायं च तद्रसम् ।
हर्षाम्भोधौ निमग्नो न वक्तुं शक्नोमि किञ्चन ॥ ५ ॥

तथाऽपि भवदादेशमूरीकृत्य वचो ब्रुवे ।
यत्सत्यं भवतां काव्यं सुश्लिष्टं सरसं तथा ॥ ६ ॥

ओजस्विन्या गिरा बद्धमूर्जस्वि रुचिरं तथा ।
अर्थगौरवयुक्तं चाप्यलङ्कारैरलङ्कृतम् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एतादृशस्य सत्काव्यद्वितयस्य निबन्धकान् ।
विद्वद्वरान् प्रणम्याहं स्वां वाचमुपसंहरे ॥ ८ ॥

सुरसरस्वतीसमुपासकः
सत्यव्रतशास्त्री

२७.१०.१९७० दिनाङ्के श्री विरामपुर (बदायूं) स्थान् ज्योतिःस्वरूपमिश्रमहाभागान् प्रति प्रेषितं पत्रम्

(अनुष्टुब्वृत्तम्)

अद्य प्राह्णे भवत्पत्रमवाप्य सुतरां मम ।
जातः प्रमोदो हृदये सत्यं वाचामगोचरः ॥ १ ॥

नवाम्बरस्य सप्ताहे प्रथमे भविता ध्रुवम् ।
पाठ्यपुस्तकयोजिन्याः सभाया अधिवेशनम् ॥ २ ॥

तत्र सम्प्रार्थयिष्येऽहं विदुषः समुपस्थितान् ।
बालसिद्धान्तकौमुद्याः पाठ्यत्वेन नियुक्तये ॥ ३ ॥

एतदर्थं विधेया नो चिन्ता सद्भिः कथञ्चन ।
एतन्मात्रं वचो मेऽत्र न भूयः समपेक्ष्यते ॥ ४ ॥

आशासे सर्वथा सन्तः सकुटुम्बा निरामयाः ।
विद्याभ्यसनयोगेन कालयापनकाङ्क्षिणः ॥ ५ ॥

अत्रापि च कुटुम्बे नः सर्वे सन्ति निरामयाः ।
इत्येतद्वच उक्त्वाऽहं स्वां वाचमुपसंहरे ॥ ६ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१९.५.१९७१ दिनाङ्के बुलन्दशहरस्थान् श्रीरामकिशोरमिश्रमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,

(अनुष्टुब्वृत्तम्)

पञ्चषाणि व्यतीतानि दिनानि भवतां प्रियम् ।
स्नेहसारेण सम्पृक्तं पत्रं प्राप्तवतो मम ॥ १ ॥

कार्यान्तरवशाद्विज्ञा गरीयस्तरकान्मया ।
न पारितमितः पूर्वं प्रहेतुं स्वकमुत्तरम् ॥ २ ॥

क्षन्तव्योऽस्मीति सम्प्रार्थ्य विद्वज्जनवशंवदः ।
संस्कृते सर्वदासक्तो गिरमेतां प्रवर्तये ॥ ३ ॥

(इन्द्रवज्रावृत्तम्)

गद्ये च पद्ये च तथोभयोश्च
ग्रन्था अनेके भवता प्रणीताः ।
ज्ञात्वेतिवृत्तं विबुधाभिनन्द्यं
हर्षस्य कोटिं परमां गतोऽस्मि ॥ ४ ॥

गीर्वाणवाणीरचनाभरेण
सत्यं भवेत्सर्वजनस्य मोदः ।
इन्दोः कराणां प्रसरेण विष्वक्
स्यादुत्सवः कैरवकाननस्य ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(रुचिरावृत्तम्)

रुचिराकृतिभिः कृतिभिः कृतिभिः
परिपुष्टतमाभिरलङ्कृतिभिः ।
कृतमस्ति विलक्षणबुद्धिगुणै
रुचिरं कविकर्म भवद्भिरिदम् ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

११.११.१९७३ दिनाङ्के दिल्लीस्थकिरोड़ीमलकालेजसंस्कृतप्राध्यापकं श्रीशिवनारायण-शास्त्रिणं प्रति प्रेषितं पत्रम्

श्री शिवनारायणशास्त्रिणे शुभाशिषः ।

(अनुष्टुब्वृत्तम्)

नानोपालम्भसंयुक्तमुपलभ्य भवद्दलम् ।
न मे रोषो न वा क्षोभो हर्ष एव तु केवलम् ॥ १ ॥

यस्मिन् कस्मिन् दिने प्रातर्नववादनतः परम् ।
आगन्तुं शक्यते तात ! नात्र कार्या विचारणा ॥ २ ॥

विश्वविद्यालये पूर्वनिर्धारितदिने मया ।
प्रतीक्षितो भवानासीत् स्नेहसिक्तेन चेतसा ॥ ३ ॥

प्रत्यैक्षिष्ट भवान्मां तु मद्गेहे कानपि क्षणान् ।
प्रतीक्षमाणावन्योन्यमप्यावां नैव सङ्गतौ ॥ ४ ॥

हेतुरत्र भवेदन्यो विधेर्विलसितान्नु कः ।
प्रतिबन्धाभ्यनुज्ञाभ्यां येन विश्वं नियन्त्र्यते ॥ ५ ॥

अस्त्वत्र विषये किञ्चिन्न मया भूय उच्यते ।
प्रकृतं चानुसृत्यैव वचः किञ्चिदुदीर्यते ॥ ६ ॥

पञ्चदश्यां तिथावस्य मासस्य गुरुवासरे ।
नववादनवेलायां भवानागत्य मद्गृहान् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मधुरालिङ्गनेनापि मिष्टसम्भाषणेन च ।
दिव्यं किञ्चित्सुखं मह्यं ददात्विति मनोरथः ॥ ८ ॥

ममेति विनिवेद्याहं नैका आशीरुदीर्य च ।
स्नेहसंसिक्तहृदयो गिरं स्वामुपसंहरे ॥ ९ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२४.८.१९७५ दिनाङ्के बैंकाकनगराद् डा० कृष्णलालमहाभागान्प्रति प्रेषितं पत्रम्

प्रियवर्या डॉ० कृष्णलालमहाभागाः,

सर्वथा स्वस्त्यस्तु ।

(अनुष्टुब्वृत्तम्)

अध्यगच्छं भवत्पत्रं वृत्तं चावाप्नवं ततः ।
दूरस्थितानां किञ्चिन्नो पत्रात्सुखतरं भवेत् ॥ १ ॥

(उपजातिवृत्तम्)

सर्वत्र नो वार्तमवैत विज्ञाः !
भवच्छुभेच्छासु कुतोन्यथा स्यात् ।
"सूर्ये तपत्यावरणाय सत्यं
भवेत्प्रकाशस्य कुतस्तमिस्रा" ॥ २ ॥

दूरस्थितो मातृभुवः प्रियाया
गतो वियोगं स्वजनेन चापि ।
नयामि कालं स्वमहं कथञ्चिद्
अधीतिबोधाचरणप्रचारैः ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

स्मरामि नित्यं भवतः, शुभं च
ध्यायामि काङ्क्षामि सुखं च भूरि ।
सम्प्रार्थये च प्रभुमप्रमेयं
कीर्तिं जगत्यामहमप्रमेयाम् ॥ ४ ॥

अद्यापि वर्षाः प्रकटाः समन्ताद्
व्योमाम्बुदैरावृतमस्ति चापि ।
निरन्तरं वाति च शीतवातो
धाराश्च वर्षस्य पतन्ति भूयः ॥ ५ ॥

सरांसि पूर्णानि जलस्य चापि
विकस्वराब्जानि सुखावहानि ।
वृक्षाश्च गुल्मानि च वीरुधश्च
नवाम्बरत्वं दधते सुपत्रैः ॥ ६ ॥

निर्मीयते वैदिकशब्दजात-
निरुक्तिकोषो बहुकालसाध्यः ।
भवद्भिरित्येतदवाप्य वृत्तं
हर्षप्रकर्षो हृदि मे न माति ॥ ७ ॥

समाप्तिमेतस्य निरन्तरायां
कृत्यस्य काङ्क्षामि गरीयसोऽहम् ।
ममापि तत्स्याद्यशसे कदाचि-
च्छिष्यप्रकर्षो यशसे गुरूणाम् ॥ ८ ॥

अवश्यमेव ह्यवकाशहेतो-
र्यत्नो विधेयोऽत्रभवद्भिरत्र ।
मतिर्मदीयैवमिहास्ति बन्धो ।
चिरं गुरौ कार्यविधौ न कार्यम् ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

'उर्वी' विशाला 'विभु' चापि विश्वं
मार्गा अनेके वितता इह स्युः ।
'कृष्णे'ऽन्धकारेऽपि भवेयुरेत-
द्विधाः प्रयत्नाः 'शशि'[1] तुल्यरूपाः ॥ १० ॥

भवेत्प्रकाशो नहि थाइकाव्य-
स्याश्वित्यहो ! चित्रतरो विधिर्नु ।
भाषान्तरापादनबद्धबुद्धि-
रप्यत्र लोकश्चिरयत्यजस्रम् ॥ ११ ॥

न किञ्चिदध्यत्र जने बहुज्ञा !
असंशयं सर्वमिहेश्वरेऽधि ।
इत्याकलय्यास्मि विमुक्तचिन्तः
शान्तात्मना चापि रमे स्वकृत्ये ॥ १२ ॥

(आर्यावृत्तम्)

सकुटुम्बेभ्यो नैकानत्रभवद्भ्यः प्रयुज्याशिषो राशीन् ।
उपसंहरति गिरं स्वां स्निग्धः सत्यव्रतः शास्त्री ॥ १३ ॥

---

१. अत्र प्रकारान्तरेण डा० कृष्णलालकुटुम्बिजनाः परामृष्टाः । उवीर्ति तेषां पुत्र्या नाम, विभुरिति च पुत्रस्य, शशीति च धर्मपत्न्याः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरात् २५.९.१९७८ दिनाङ्के डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

डा० कृष्णलालेभ्यः स्वस्ति ।

(अनुष्टुब्वृत्तम्)

दिवसा बहवो याताः पत्रं प्राप्तवतो मम ।
भवतां स्नेहसंस्पृष्टं रुचिरं रुचिराक्षरम् ॥ १ ॥

कार्यान्तरेण संरुद्धो बह्विच्छन्नप्यसंशयम् ।
इतः प्राङ् नोत्तरं तस्य प्रहेतुमशकं बुधाः ॥ २ ॥

तेन चेखिद्यते चेतो ग्लानिश्चाविशतीव माम् ।
भवतोऽहं क्षमां याचे क्षमाशीला हि साधवः ॥ ३ ॥

(विद्युन्मालावृत्तम्)

दिल्ल्या वृत्तं ज्ञात्वा वृत्त-
पत्रेभ्योऽहं चिन्तां यातः ।
तत्राप्लावो भूयानस्ती-
त्येतच्चिन्ता सर्वत्रास्ते ॥ ४ ॥

आशासेऽहं नो स्यात्सम्प्र-
त्येतद्भीतिः कष्टं चापि ।
ईशो लोकत्राता लोक-
स्यास्य त्राणं कुर्यादेव ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(वैतालीयवृत्तम्)

अथ किञ्चिदहं द्रुतं बुधाः
प्रियवृत्तं मनसः सुखावहम् ।
विनिवेदयितुं प्रवृत्तिमान्
सुखमात्यन्तिकमश्नुवे कृती ॥ ६ ॥

(अनुष्टुब्वृत्तम्)

अक्तूबरस्य मासस्य पञ्चमेऽहन्यहं निशि ।
दिल्लीपुरमुपैतास्मि बैंकाकनगराच्छुभात् ॥ ७ ॥

चतुरो वासरानेव स्थितिस्तत्र भवेन्मम ।
देशानन्यान् प्रति मया गन्तव्यं स्यात्ततः परम् ॥ ८ ॥

अल्पीयस्यप्यहं काले भवत्सङ्गमुपेयिवान् ।
हर्षाकूपारपारं स्यां यातो नास्त्यत्र संशयः ॥ ९ ॥

इति निवेदना
भवच्छुभाभिलाषुकस्य
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वैंकाककतः २३.१२.१९७८ दिनाङ्के डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया डा० कृष्णलालमहाभागाः,
सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

भवत्पत्रं समासाद्य चिरायोदीक्षितं प्रियम् ।
वृत्तं ततश्च विज्ञाय भवतां निर्वृतिं भजे ॥ १ ॥

दिल्ल्यां सङ्गो न जातोऽभूदितीषद्विमनायितः ।
समभूवं, सुहृत्सङ्गाभावे कस्य भवेत् सुखम् ॥ २ ॥

कनाडाशासनेनाहं भाषणार्थं निमन्त्रितः ।
तत्रस्थानगमं नैकान् विश्वविद्यालयाञ्शुभान् ॥ ३ ॥

अमेरिकास्थविद्वद्भिर्विज्ञायागमनं मम ।
स्वदेशनिकषा स्नेहादहमासं निमन्त्रितः ॥ ४ ॥

विश्वविद्यालयास्तात ! गमिकर्मीकृता मया ।
चतुर्दश सुविख्याता देशयोरुभयोरपि ॥ ५ ॥

एकोनविंशतिश्चापि भाषणानि ममाभवन् ।
यानि तत्रस्थविद्वद्भिः श्लाघितानि पुनः पुनः ॥ ६ ॥

अनेकान् विषयान् बन्धो ! तत्राहं प्रत्यपीपदम् ।
तथा हि कालसिद्धान्तो भारतीये विचिन्तने ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दैवं च पुरुषार्थश्च प्राचीने वाङ्मये तथा ।
दर्शनं चौपनिषदं कर्मसिद्धान्त एव च ॥ ८ ॥

योगदानं मुस्लिमानां स्वेच्छया संस्कृतं प्रति ।
थाइदेशे संस्कृतं च काव्योन्मेषश्च संस्कृते ॥ ९ ॥

इत्येवं विषयेष्वेषु त्रयोदशसु निस्सृताः ।
तत्तत्स्थलेषु मे वाचः प्रभुणैव प्रवर्तिताः ॥ १० ॥

निवर्तमानो यात्रातो जापानेऽहश्चतुष्टयम् ।
विद्वत्सङ्गसुखाकृष्टः प्रमना व्यत्ययापयम् ॥ ११ ॥

तत्र दृष्टा मया नाकामूरेत्याख्या विपश्चितः ।
ताकाकासीति चाप्यन्ये मायेदाख्यास्तथापरे ॥ १२ ॥

यूयामेत्यपरे चापि प्राच्यविद्याविशारदाः ।
अधीतिनः शास्त्रचये सर्वे पण्डिततल्लजाः ॥ १३ ॥

प्रवृत्ता शास्त्रचर्चा तैः कालं बहुमभून्मम ।
वाचामगोचरश्चित्ते प्रमोदो जनितो यया ॥ १४ ॥

एवं दृष्ट्वा बुधांस्तत्र यात्रां पर्यवसाय्य च ।
थाइदेशं निवृत्तोऽहं प्रहृष्टेनान्तरात्मना ॥ १५ ॥

देशा दृष्टा मया नैके तथा विद्वदपश्चिमाः ।
पश्चिमायां दिशायां तत्प्रमोदाय ममाक्लृपत् ॥ १६ ॥

इति

सदा भवन्मङ्गलाभिलाषी

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरात् ४.३.१९७९ दिनाङ्के डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया डा० कृष्णलालमहाभागाः,
स्वस्त्यस्तु ।

(उपजातिवृत्तम्)

अवाप्य पत्रं भवतां प्रसन्न-
पदाक्षरं मे सुमहान् प्रमोदः ।
विप्रोषितानां स्वजनस्य वृत्तं
विज्ञायमानं मुदमातनोति ॥ १ ॥

(अनुष्टुब्वृत्तम्)

अचिरायिषि यद्बन्धो ! पत्रप्रतिवचस्यहम् ।
तेन मृष्योऽस्मि यत्सत्यं क्षमाशीला हि साधवः ॥ २ ॥

कार्याधिक्यवशादेवानिच्छतोऽपि कथञ्चन ।
सम्भवन्तीदृशास्तात ! प्रमादा दुःखकारिणः ॥ ३ ॥

नैवं प्रत्येमि सुदृढं भविष्यति भविष्यति ।
भवद्वृत्तात्सुखागारान्नान्यत्प्रियतरं मम ॥ ४ ॥

कार्यमध्यापनस्यात्र समाप्तिं गतमित्यतः ।
कालो मे वर्तते भूयान् स्वाध्यायफलकोऽधुना ॥ ५ ॥

मम लेखा अनेकासु पत्रिकासु प्रकाशिताः ।
नैके मासेष्वतीतेषु दृष्टाः स्युर्भवता ननु ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

थाइदेशविलासाख्यं काव्यं यच्च कृतं मया ।
समाप्तमुद्रणं तद्धि भवेच्छीघ्रं प्रकाशितम् ॥ ७ ॥

पुरातनानि स्थानानि मन्दिरादीनि भूरिशः ।
अनैषं दृष्टिविषयमतीतेषु दिनेष्वहम् ॥ ८ ॥

अधिकृत्य तु तान्येव नयनानन्दनान्यहम् ।
पाषाणोत्कीर्णचित्राणि विमर्शं स्वं प्रवर्तये ॥ ९ ॥

एवं विदेशे स्वं कालं स्वजनै रहितोऽप्यहम् ।
तेन तेनाभियोगेन गमयामि कथञ्चन ॥ १० ॥

अथ दिल्ल्यां कथं वार्ता प्रवृत्तिश्चापि कीदृशी ।
सर्वमेतत्सुविज्ञातुं भृशं कौतूहलं हि मे ॥ ११ ॥

नैव शक्तोऽस्म्यहं वक्तुं निश्चयेन कदा भवेत् ।
बन्धुभिर्विप्रयुक्तस्य दिल्ल्यामागमनं मम ॥ १२ ॥

यतिष्ये शीघ्रमेवाहं तदर्थमिति निश्चितम् ।
इत्येव समुदीर्याहं गिरं स्वामुपसंहरे ॥ १३ ॥

सदा भवन्मङ्गलाभिलाषी
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरात् २४.४.१९७९ दिनाङ्के डॉ० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया डॉ० कृष्णलालमहाभागा :,
स्वस्त्यस्तु सकुटुम्बेभ्यो भवद्भ्यः ।

(उपजातिवृत्तम्)

प्राप्तेन रम्येण भवद्दलेन
हर्षप्रकर्षो हृदि मे न माति ।
पयः पयोधेरिव पूर्णिमायां
शीतांशुरश्मिप्रकरप्रणुन्नम् ॥ १ ॥

थाइप्रदेशस्य[१] गतोऽन्यभागं
चांग्माय्यभिख्यं रमणीयशोभम् ।
दिनेष्वतीतेष्वत एव तात !
पत्रोत्तरे कश्चिदभूद्विलम्बः ॥ २ ॥

उद्विग्नता मे हृदयं दुनोति
ग्लानिश्च मामाविशतीव तेन ।
क्षमापयामि स्वमतो भवद्भ्यः
क्षमापराः स्निग्धजना भवन्ति ॥ ३ ॥

---

१. देशार्थे प्रदेशशब्दः प्रयुक्तः, स च थाइभाषानुरोधात् ।
भाषायामस्यां थाइदेशार्थे प्रथेत् थाइ, संस्कृतरूपान्तरेण प्रदेश थाइ (प्रथेत् इति प्रदेश इत्यस्यैवोच्चारणपरीवर्तेन रूपम्) इति शब्दः प्रयुज्यते ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रावज्रावृत्तम्)

वैशाखमासप्रथमेऽह्नि[१] थाइ-
देशे भवत्युत्सव उत्सवोऽक्ष्णोः ।
अह्नो हि तस्मान्नवहायनस्य
प्रारम्भ इत्यत्र जनो ब्रवीति ॥ ४ ॥

सौङ्क्रान्[१] समाख्योऽद्भुत उत्सवोऽयं
थाय्याख्यदेशोत्तरदिग्विभागे ।
चांग्माय्यभिख्ये नगरे मनोज्ञे
सोत्साहमायोज्यत उत्सवोऽक्ष्णोः ॥ ५ ॥

(उपजातिवृत्तम्)

अवेक्षितुं तं तरसोपयान्ति
दिग्भ्यो विदिग्भ्यश्च जना अनेके ।
सहस्रशश्चाप्यथ लक्षशश्च
सर्वं तदाभाति विचित्रमेव ॥ ६ ॥

दिनत्रयं यावदयं प्रवृत्तः
शुभोत्सवो लोकमुदे प्रवृद्धः ।
नृत्यन्ति गायन्ति हसन्ति यान्ति
प्रोन्मुक्तभावेन जनाः समेऽत्र ॥ ७ ॥

(उपेन्द्रवज्रावृत्तम्)

जलं तथाऽन्योन्यमिह क्षिपन्ति
दिनत्रयं यावदनारतं ते ।
असंस्तुतं वाऽप्यथ संस्तुतं वा
जलेन कामं स्नपयन्ति हृष्टाः ॥ ८ ॥

१. सौरवैशाखप्रथमदिने । सौङ्क्रान् इति सङ्क्रान्तिरित्येव ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(उपजातिवृत्तम्)

स्त्रियः पुमांसश्च समं समेऽपि
क्रीडन्ति मोदात्सलिलेन कामम् ।
नारीति तेषां नर इत्ययं वा
विशेषलेशोऽपि न लक्ष्यतेऽत्र ॥ ९ ॥

न शीलभङ्गो न च वृत्तभङ्गः
स्वप्नेऽपि तेषां परिकल्पनीयः ।
क्रीडेति सर्वे परिहासहेतोः
सामान्यभावेन जलं क्षिपन्ति ॥ १० ॥

किशोरिका काचिदुपेत्य पश्चा-
दलक्षिता वारि जने क्षिपन्ती ।
दृष्टा मया वीथिषु तत्र बन्धो !
समं सखीभिः सुभृशं हसन्ती ॥ ११ ॥

आशासे कुशलिनः श्रीमन्तः सपुत्रदारा इति ।
सदा मङ्गलाभिलाषी—
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२६.१२.१९७९ दिनाङ्के मुजफ्फरपुरस्थान् डा० ब्रह्मचारिसुरेन्द्रकुमारमहाभागान् प्रति प्रेषितं पत्रम्

मान्येभ्यो विद्वद्वर्येभ्यः प्रणतयः ।

(अनुष्टुब्वृत्तम्)

पत्रमासीषदं हृद्यं भवतां स्नेहसंयुतम् ।
अन्वविन्दममन्दं च तेनानन्दमहं ध्रुवम् ॥ १ ॥

चिराय भवतां वार्ता नालप्सीति मनागहम् ।
विमनायित एवासं तत्र नास्त्यस्ति संशयः ॥ २ ॥

ज्ञात्वा कुशलिनो बन्धून् परां प्रीतिं समश्नुवे ।
बन्धूनां कुशलोदन्तः सदा प्रीतिकरो भवेत् ॥ ३ ॥

आचार्यत्वे विराजन्ते भवन्त इति भूयसा ।
प्रसीदामि सदैवाहं भवदुत्कर्षकामुकः ॥ ४ ॥

थाइदेशे निवासो मेऽभवद्वर्षद्वयं सुखम् ।
देशात्तस्मान्निवृत्तश्च ततोऽहमचिराद्बुधाः ॥ ५ ॥

थाइदेशमहाराजकुमारीमध्यजीगपम् ।
देवभाषां वाङ्मयं च तदीयं सूक्ष्मबोधिनीम् ॥ ६ ॥

थाइदेशविलासाख्यं काव्यं चापि व्यरीरचम् ।
थाइभाषानुवादेन सहितं यत्प्रकाशते ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अष्टादश निबन्धांश्च गवेषणपरायणः ।
विदुषां सम्प्रमोदाय प्राकाश्यमनयं बुधाः ! ॥ ८ ॥

अभिलेखा तथा नैके गैर्वाणीग्रथिताः शुभाः ।
तेभ्यस्तेभ्यः प्रदेशेभ्यो लभिकर्मीकृता मया ॥ ९ ॥

प्रवर्तयिष्ये नचिराद्विमर्शं तेष्विह स्थितः ।
इति बुद्धिर्ममोदेति कार्यं रुचिकरं हि तत् ॥ १० ॥

एतदुक्त्वा नूत्नवर्षशुभाशंसापरायणः ।
स्निग्धो भवत्सु विद्वत्सु गिरं स्वामुपसंहरे ॥ ११ ॥

सुरसरस्वतीसमाराधनैकव्रतोऽहं
सत्यव्रतः शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रोहतकस्थश्रीहज़ारीलालशर्मविद्यालङ्कारान् प्रति ३.५.१९८२ दिनाङ्के प्रेषितं पत्रम्

विद्वद्वर्याः,

सप्रश्रयं नमो मम।

(वसन्ततिलकावृत्तम्)

पत्रं मया सुमधुरं भवतामवाप्तं
प्राप्तश्च तेन सुतरां मनसः प्रमोदः ।
आप्तस्य वृत्तमवगत्य भवेन्न कस्य
स्निग्धस्य चेतसि जनस्य मुदः प्रकर्षः ॥ १ ॥

(द्रुतविलम्बितवृत्तम्)

सुकृतिभिः कृतिभिः कृतिभिः सुखं
निखिलवाङ्मयसारसमाकृति ।
यदधुनाऽपि निरन्तरमेध्यते
सुरगिरोपवनं विविधाकृति ॥ २ ॥

(अनुष्टुब्वृत्तम्)

चमत्करोति यच्चेतस्तत्र हेतुर्भवादृशाः ।
बुधप्राग्रहरा नूनं शास्त्रशीलनतत्पराः ॥ ३ ॥

इन्द्रप्रस्थागमे यः स्याद् व्ययो वक्ष्याम्यहं नु तम् ।
सहर्षमिति नास्त्वत्र शङ्काशूकोऽपि चेतसि ॥ ४ ॥

यात्राकष्टं तु सञ्चिन्त्य ग्रीष्मकाले विपश्चिताम् ।
डाकद्वारैव मन्येऽहं ग्रन्थानां प्रेषणं वरम् ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अथवा भवतामेव विषयेऽस्मिन् मतं मम ।
भवेत्प्रमाणं सुधियामित्येवाहं निवेदये ॥ ६ ॥

सुरसरस्वतीसमाराधनैकव्रतः
सत्यव्रतः शास्त्री

मलेरकोटलास्थप्रियशिष्याञ्श्रीदेवदत्तभट्टिमहाभागान् प्रति २८.९.१९८३ दिनाङ्के प्रेषितं पत्रम्

प्रिया भट्टिमहोदयाः,
सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

चिरादाप्य भवत्पत्रं स्नेहपूरेण पूरितम् ।
अतर्कितं फलमिव प्रमोदः परमो मम ॥ १ ॥

नवीनस्य पदस्यार्थे प्रेषिता शुभकामना ।
वर्धापना च नियतं पाथेयं मे भविष्यतः ॥ २ ॥

इरेत्याख्यं काव्यरत्नं यद्भवद्भिर्विनिर्मितम् ।
तदर्थं प्रहिणोम्यद्य शुभाशंसा अनेकशः ॥ ३ ॥

आवर्जयेन्मनो भूयः समेषां साहितीजुषाम् ।
ग्रन्थ एष सतां सत्यं पार्वणश्चन्द्रमा इव ॥ ४ ॥

यशश्च तनुतां शुभ्रं दिक्षु चापि विदिक्षु च ।
हर्षप्रकर्षं वर्षेच्च कुटुम्बिषु सुहृत्सु च ॥ ५ ॥

श्रीजगन्नाथदेवस्य कृपया शुभमस्तु वः ।
सम्प्रयुज्याशिषं ह्येतां वाचं स्वामुपसंहरे ॥ ६ ॥

भवन्मङ्गलाभिलाषुकोऽहं
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शर्मण्यदेशस्थश्रीपायरमहोदयान् प्रति पुरीक्षेत्रात् ३.१०.१९८३ दिनाङ्के प्रेषितात्पत्रात् समुद्धृतानि पद्यानि

(अनुष्टुब्वृत्तम्)

श्रीजगन्नाथदेवस्य कृपया परया भवेत् ।
जगतामधिनाथस्य मङ्गलं भवतां सदा ॥ १ ॥

दूरस्थितोऽपि कायेन मनसा निकषाऽस्मि वः ।
भवच्चिन्तापरः सत्यं सततं रहसि स्थितः ॥ २ ॥

चिन्तयामि च तं कालं यो मया व्यतियापितः ।
सन्निधावत्रभवतां ट्यूबिंगन्नगरे शुभे ॥ ३ ॥

शुभाभिलाषी
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बेल्जियमदेशस्थल्यूवननगराच्छर्मण्यदेशस्थपायरमहोदयान् प्रति १.२.१९८४ दिनाङ्के प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,

सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

ल्यूवनाख्ये पुरे रम्ये निवासं कुर्वता मया ।
प्रियेभ्यः पायराख्येभ्यः पत्रमेतत्प्रहीयते ॥ १ ॥

चिरमद्य भवद्वृत्तमासादितवतो मम ।
अतो हेतोरतितरां सोत्कण्ठं मम मानसम् ॥ २ ॥

स्वकीयः कुशलोदन्तः सम्प्रेष्यो नचिरादतः ।
उत्कण्ठाप्रशमो येन शीघ्रं जायेत शान्तिदः ॥ ३ ॥

प्रवासश्चतुरो मासान् ल्यूवने भविता मम ।
शास्त्रानुशीलनेनैव गमयिष्यामि तानहम् ॥ ४ ॥

ट्यूबिंगने यथैकाकी तथैवात्राप्यहं स्थितः ।
अध्यापनपरा धर्मपत्नी दिल्ल्यामवस्थिता ॥ ५ ॥

गिल्बर्टपालेट् समाख्याना एगर्मण्टाभिधास्तथा ।
कैलिवार्तेत्यभिख्याश्च प्राच्यविद्याविशारदाः ॥ ६ ॥

ख्यातिं परामधिगता विराजन्ते बुधा इह ।
यत्सङ्गत्या परां कोटिमानन्दस्याहमश्नुवे ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

छात्रा अपीह शिष्टाश्च साधुवृत्ताश्च सर्वथा ।
येषामध्यापनेनाहं परां प्राप्नोमि निर्वृतिम् ॥ ८ ॥

श्रीमत्यै मार्गरीटायै मम वाच्या नमस्कृतिः ।
इत्येव विनिवेद्याहं स्वां वाचमुपसंहरे ॥ ९ ॥

भवदभिन्नहृदय

सत्यव्रत

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

डा० कृष्णलालमहाभागान्प्रति पुरीतः २८.४.१९८४ दिनाङ्के प्रेषितं पत्रम्

प्रिया बन्धुवर्याः, सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

भवतां पत्रमासाद्य हर्षो मे परमोऽजनि ।
बन्धूनां कुशलोदन्तः सदा सुखकरो भवेत् ॥ १ ॥

देशाटनाय यातारः सकुटुम्बाः सुहृद्वराः ।
जूनमास इति ज्ञात्वा सन्तुष्यामि मुहुर्मुहुः ॥ २ ॥

नाना स्थानानि देशेऽस्मिन् सन्ति यद्दर्शनाद् ध्रुवम् ।
आनन्दो जायते चित्ते ज्ञानं च परिवर्धते ॥ ३ ॥

देशाटनं प्रशंसन्ति हेतोरस्माद्विदां वराः ।
यत्प्रथा प्रथिता लोके चिररात्राय सौख्यदा ॥ ४ ॥

भवेत्तीर्थाटनेऽप्येष हेतुरित्युन्नयो मम ।
देशाटनं तु तत्रापि भवत्येवाविसंशयम् ॥ ५ ॥

धामानि सन्ति चत्वारि दिक्ष्वथात्र चतसृषु ।
यद्दर्शनेन सर्वस्य भवेद्देशस्य दर्शनम् ॥ ६ ॥

तेष्वेकमस्ति पूर्वस्यां स्थितं दिशि विलक्षणम् ।
पुरीति विश्रुतं यत्र जगन्नाथो विराजते ॥ ७ ॥

यद्दर्शनं भवेत्पुण्यं पुण्येनैवेति मन्वते ।
असङ्ख्या भक्तिसम्पन्ना जना भारतवासिनः ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

जातिभेदो न यत्रास्ति वर्णभेदो न चाप्यहो ! ।
जनाः सम्भूय सग्धिं च सपीतिं चापि कुर्वते ॥ ९ ॥

आर्याणां संस्कृतेर्यत्र शबराणां च सङ्गमः ।
अन्यत्र दुर्लभो नूनं विचित्रः परिलक्ष्यते ॥ १० ॥

कथानकानि रुच्यानि जना यत्र प्रकुर्वते ।
श्रावं श्रावं मुहुर्यानि विस्मयो जायते परः ॥ ११ ॥

एकदा प्रावहन् दारुखण्डा अम्भोनिधौ त्रयः ।
उज्जयिन्या अपश्यद्यानिन्द्रद्युम्नाभिधो नृपः ॥ १२ ॥

गुण्डीचेत्याख्यया पत्न्या समेतः स नरोत्तमः ।
आगतोऽभूत् पुरीक्षेत्रं देशदर्शनलालसः ॥ १३ ॥

एकस्मिन् दारुखण्डेऽसावद्राक्षीज्जगतां पितुः ।
शङ्खचक्रादिचिह्नानि विष्णोश्चत्वारि विस्मितः ॥ १४ ॥

मूर्तिस्तस्य कथं तत्र स्थापिताऽस्त्विति चिन्तितः ।
उज्जयिन्या नृपालोऽसौ बभूव सुतरां किल ॥ १५ ॥

तस्मिन्काले समापन्नो दैवात्तत्र कुतश्चन ।
एको विप्रोऽतिवर्षीयानुवाचेदं वचश्च तम् ॥ १६ ॥

चिन्ताऽत्र विषये राजन् नैव कार्या कथञ्चन ।
दारुखण्डत्रयेणाहं मूर्तीः कर्तास्मि शोभनाः ॥ १७ ॥

कक्षे यदा त्वहं तात ! व्यापृतो मूर्तिकर्मणि ।
भवितास्मि तदा नैव जनो मामवलोकयेत् ॥ १८ ॥

स्वीकरोषि यदि त्वं मे सङ्कल्पं तावदीदृशम् ।
व्यापृतोऽहं भविष्यामि मूर्तिनिर्माणकर्मणि ॥ १९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

राज्ञोमिति तदा प्रोक्ते वृद्धोऽसौ ब्राह्मणः शुभः ।
द्वारं पिधाय कक्षस्य मूर्तिकर्मण्यसज्जत ॥ २० ॥

सक्तस्य तस्य यातानि त्रिंशत्सङ्ख्यान्यहान्यहो ।
न च कश्चिज्जनः कक्षान्निर्गच्छन्तं तमैक्षत ॥ २१ ॥

ठक ठकेतिशब्देन कक्षादागच्छता जनः ।
जीवत्ययं विप्रवर इत्येवमवक्लृप्तवान् ॥ २२ ॥

एकस्मिन् दिवसे शब्दः सोऽकस्माद्विरतिं गतः ।
विप्रो न जीवतीत्येवं तेन राज्ञी व्यचिन्तयत् ॥ २३ ॥

अवधीर्य तु विप्रेण वचः प्रोक्तं पुरा स्वयम् ।
अपाववार सा कक्षद्वारं कौतुकसम्भ्रमात् ॥ २४ ॥

अपावृते पुनर्द्वारि नैव कक्षे ददर्श सा ।
वृद्धं वाऽन्यं जनं वापि परं विस्मयमागता ॥ २५ ॥

अपूर्णा मूर्तयस्तत्र तिस्र आसन् स्थिताः पुरः ।
तासां निर्माणकर्ता तु नैव कुत्राप्यदृश्यत ॥ २६ ॥

देवत्वष्टा विश्वकर्मा स्वयमासीत्समागतः ।
विप्ररूपं समाश्रित्येत्यासीद् राज्ञोस्तदा मतिः ॥ २७ ॥

अहो स्वयं विश्वकर्मा निर्ममे प्रतिमा इमाः ।
दारवीरिति हृष्टेन भक्तिप्रह्वेण चेतसा ॥ २८ ॥

निश्चिक्यतुर्नृपश्चापि तत्पत्नी च सुलक्षणा ।
देवालये स्थापनीया विधिवत्प्रतिमा इति ॥ २९ ॥

एवं निश्चयमास्थाय स्थापयामासतुस्तदा ।
तिस्रस्तौ प्रतिमा दिव्याः पुरीक्षेत्रेऽतिपावने ॥ ३० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एकासीत्प्रतिमा तासु श्रीकृष्णस्यापरा पुनः ।
तद्भ्रातुर्बलदेवस्यापरासीच्च स्वसुस्तयोः ॥ ३१ ॥

सुभद्रेत्यभिधानाया एवं तिस्रः प्रतिष्ठिताः ।
देवताप्रतिमाः पुर्यां या लोको वन्दतेऽनिशम् ॥ ३२ ॥

शुभेच्छुः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

५. ७. १९८४ दिने शर्मण्यदेशस्थश्रीपायरमहोदयान् प्रति प्रेषितं पत्रम्

श्री पायरमहोदयाः,
सस्नेहं नमांसि भूयांसि ।

(अनुष्टुब्वृत्तम्)

भ्रातृजायादलं प्राप्य यमानन्दमवाप्नवम् ।
आविष्कर्तुं कथं शक्यः स प्रयत्नशतैरपि ॥ १ ॥

(उपजातिवृत्तम्)

कालो भवद्भिः सह यापितो यो
विहारशय्यासनभोजनेषु ।
प्रिया च हृद्या च चिराय सत्यं
तस्य स्मृतिः स्थास्यति मेऽन्तरङ्गे ॥ २ ॥

(आर्यावृत्तम्)

गतमासत्रिंशदिने रथयात्राशुभमहोत्सवोऽत्राभूत् ।
नानादिग्भ्य उपेता द्रष्टुं यं लक्षशो लोकाः ॥ ३ ॥

(उपेन्द्रवज्रावृत्तम्)

गते तु वर्षे वयमत्र सर्वे
प्रहर्षकोटिं परमामुपेताः ।
सह स्थिता इत्यभवत्स्मृतिर्मे
दिने तु तस्मिन् मनसि प्ररूढा ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(द्रुतविलम्बितवृत्तम्)

परमकारुणिकस्य भवेत् पुनर्
भगवतः कृपया शुभसङ्गमः ।
सुखकरो मनसो नचिरादिति
समुदियर्ति ममैष मनोरथः ॥ ५ ॥

शुभेच्छोः
सत्यव्रतस्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दानापुरस्थान् डा० नोदनाथमिश्रान् प्रति २८.६.१९८४ दिने प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,
स्वस्ति भवद्भ्यः सकुटुम्बेभ्यः ।

(अनुष्टुब्वृत्तम्)

भवद्भिः प्रेषितं पत्रं परेद्यवि गतं मम ।
हस्ते येन परो मोदो मम चित्ते विजृम्भते ॥ १ ॥

भवतां सङ्गमस्यात्र पुरीक्षेत्रेऽतिपावने ।
अन्तरङ्गेऽतिमधुरा चिरं स्थास्यति मे स्मृतिः ॥ २ ॥

कविताकामिनीकान्ताः कव्वालीषु कृतोद्यमाः ।
संस्कृतस्य प्रचाराय प्रसाराय च तत्पराः ॥ ३ ॥

उदारदर्शनाः सौम्या मितवाचो विचक्षणाः ।
आवर्जयेयुः सर्वेषां हठाच्चित्तं भवादृशाः ॥ ४ ॥

भवद्भिर्यद्वचः प्रोक्तं तत्रावश्यं भवेन्मम ।
प्रयत्न इति नैवात्र शङ्का कार्या बुधोत्तमैः ॥ ५ ॥

धर्मपत्नी पुरीं दिल्लीं मईमासे गता मम ।
दशमेऽह्नि ततः पश्चादेकाकी निवसाम्यहम् ॥ ६ ॥

कालं च यापयामि स्वं तत्तत्कार्यरतोऽनिशम् ।
विश्वविद्यालये विज्ञाः ! कर्तव्यं बहु विद्यते ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कर्तुं तज्जगतां नाथो जगन्नाथो दयानिधिः ।
शक्तिं मे प्रददात्वेषा प्रार्थना मे दिवानिशम् ॥ ८ ॥

अपेक्षिताः शुभाकाङ्क्षास्तदर्थं भवतामपि ।
कार्यं गुरुतरं नैव तद्विना सिद्धिमश्नुते ॥ ९ ॥

(उपजातिवृत्तम्)

विद्वज्जनैरात्मजनोऽयमस्ती-
त्येतद्धिया संस्मरणीय एव ।
यदा कदाऽहं परिवर्धनीयः
स्नेहेन चेत्येष ममाभिलाषः ॥ १० ॥

भवद्गुणगणावर्जितचेतसः
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१६.७.१९८४ दिनाङ्के शर्मण्यदेशस्थ प्रो० श्तीतन्क्रॅन महाभागान् प्रति प्रेषितं पत्रम्

(अनुष्टुब्वृत्तम्)

श्तीतन्क्रॅनसमाख्येभ्यः स्निग्धेभ्यो मयि भूरिशः ।
सुहृद्वरेभ्यः शतशः प्रणामा विलसन्तु मे ॥ १ ॥

चिराय नैवाधिगतं भवद्वृत्तं सुखाकरम् ।
सोत्कण्ठं तेन चेतो मे वर्षाब्दे चातको यथा ॥ २ ॥

स्वकीयः कुशलोदन्तस्तेन प्रेष्योऽचिराय मे ।
उत्कण्ठा येन शाम्येन्मे तृप्तिं यायाच्च मे मनः ॥ ३ ॥

मन्ये कुशलिनः सर्वे ट्यूबिंगनपुरस्थिताः ।
पठने पाठने चैव निमग्ना विद्वदुत्तमाः ॥ ४ ॥

स्मृतिर्मे हृदये तेषां सर्वेषामपि विद्यते ।
निखाता सुदृढं सत्यं शिलालिपिरिवाचला ॥ ५ ॥

(इन्द्रवज्रावृत्तम्)

गीर्वाणवाण्यैव सदा लिखन्तु
पत्रं प्रियं मां प्रति विज्ञवर्याः ।
इत्यावयोरस्ति मिथश्च संवित्
तामेव सन्तः परिपालयन्तु ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वैदुष्यमत्यद्भुतमस्ति सत्सु
सूक्ष्मेक्षिकासंवलितं सुहृत्सु ।
अभ्यासमात्रे क्रियतां प्रयत्नो
गीर्वाणगीर्भावनिबन्धनाय ॥ ७ ॥

आत्माऽत्र कर्मण्यभियोगवद्भि-
र्व्यापारणीयो नियतं भवद्भिः ।
अल्पेन कालेन भवत्सु येन
गीर्वाणवाग्बन्धनदीष्णता स्यात् ॥ ८ ॥

शेषं पुनः

भवतामात्मभूतः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शर्मण्यदेशस्थश्रीपायरमहाभागान् प्रति ११.११.१९८४ दिनाङ्के प्रेषितं पत्रम्

प्रेयांसः पायरमहाभागाः,

सस्नेहं नमस्यामि ।

(अनुष्टुब्वृत्तम्)

नवाम्बरस्य मासस्य सम्प्राप्तौ प्रथमे दिने ।
आवां दिल्लीपुरं प्रातः स्मरन्तौ भवतोर्मुहुः ॥ १ ॥

सन्निधावत्रभवतोर्यः कालो व्यतियापितः ।
आवाभ्यां मधुरा तस्य स्मृतिः स्थास्यति नौ हृदि ॥ २ ॥

यः स्नेहो योऽनुरागश्च भवद्भ्यां सम्प्रदर्शितौ ।
अत्यन्तं विरलौ लोके तावित्यस्त्यावयोर्मतिः ॥ ३ ॥

निरन्तरं समेधेतां वर्धेतां च दिने दिने ।
इत्येषा प्रार्थना हार्दी कृते वां प्रभुपादयोः ॥ ४ ॥

स्मर्तव्या वचसा सर्वे तत्रत्या नौ सुहृज्जनाः ।
ते हि नौ परिवारस्य सदस्या इत्यसंशयम् ॥ ५ ॥

हार्दः कश्चन सम्बन्धस्तेभ्यो नौ परिजृम्भते ।
तन्तुः स्नेहमयः कश्चिच्चान्तर्मर्माणि सीव्यति ॥ ६ ॥

स्वयमेव समुद्भूतः पर्वतान्निर्झरो यथा ।
अकृत्रिमोऽनुरागो नो देशकालावपेक्षते ॥ ७ ॥

यद्यप्यावां व्यवहितौ सागरावलिभिर्बत ।
तथाऽपि मनसा सत्यं नेदीयांसावसंशयम् ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(रथोद्धतावृत्तम्)

नूलया घटनया सुदुःखिता
वज्रपातसमया समे जनाः ।
क्षुब्धमानसतरङ्गदोलिता
न क्षणं मनसि बिभ्रति क्षणम् ॥ ९ ॥

(स्वागतावृत्तम्)

सर्वमेव परिवृत्तमिहास्ति
भारतं हृदि हतं न चकास्ति ।
यन्न चिन्तितमभून्मनसा तज्
जातमेव ननु दैवविपाकात् ॥ १० ॥

(उपजातिवृत्तम्)

ख्यातेन्दिरा या प्रियदर्शिनीति
प्रियं न तद्दर्शनमद्य लभ्यम् ।
इत्येव शोकाकुलितान्तरङ्गः
सर्वो जनो भारतदेशवासी ॥ ११ ॥

कथञ्चिदेव क्षम एष सोढुं
दुःखातिरेकं गलदश्रुनेत्रः ।
समुद्धरेदुद्धरणे समर्थः
प्रभुः पुनर्देशमिमं धियेति ॥ १२ ॥

स्वकीयः कुशलोदन्तो यथाप्रतिज्ञं सुरगिरैवाकालहीनं च देय इति विनिवेद्योपसंहरावः स्वकीयां वाचमावां भवद्गुणगणावर्जितहृदयौ

सत्यव्रत
उषाश्च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१२.११.१९८४ दिनाङ्के पुरीतो डा० कृष्णलालमहोदयान् प्रति प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,

सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

अप्राप्य कुशलोदन्तं भवतो मम मानसे ।
चिन्तयाऽऽकुलिते जात उद्वेग इव कश्चन ॥ १ ॥

वृत्तं नानाविधं तात ! श्रूयतेऽत्र भयावहम् ।
यच्छ्रुत्वा वर्धते चिन्ता तमिस्रायां तमो यथा ॥ २ ॥

परस्परेण विद्वेषो यत्र तत्रावलोक्यते ।
आविष्टा इव लोकाश्च कर्म हिंसादि कुर्वते ॥ ३ ॥

सौमनस्यं दयां प्रीतिमानृशंस्यमवैरिताम् ।
विस्मृत्यैतान्गुणांल्लोका अनिष्टे वर्त्मनि स्थिताः ॥ ४ ॥

नाग्निना शाम्यति ह्यग्निः क्रोधः क्रोधेन नैव च ।
परस्परविरोधो हि परस्परविनाशकृत् ॥ ५ ॥

अग्निदाहादिकं कुत्स्यं वृत्तमत्रापि दारुणम् ।
दिल्ल्यां तु भूयस्तदभूदिति चिन्ता गरीयसी ॥ ६ ॥

अतो निवेदये स्निग्धो दूरबन्धुरहं प्रियम् ।
भवन्तं कुशलोदन्तप्रेरणायातिसत्वरम् ॥ ७ ॥

भवद्धितानुध्यानपरः

***सत्यव्रतः* पुरी (उड़ीसा)**

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

७.३.१९८५ दिनाङ्के शर्मण्यदेशस्थ प्रो० श्तीतन्क्रॅनमहाभागान् प्रति प्रेषितं पत्रम्

(उपजातिवृत्तम्)

गीर्वाणवाणीरचितं मनोज्ञ-
मासाद्य पत्रं भवदीयमाशु ।
परः प्रमोदो भविता ममेति
नास्त्यत्र संशीतिलवोऽपि कश्चित् ॥ १ ॥

(इन्द्रवज्रावृत्तम्)

गीर्वाणवाण्यां भवतां समन्तात्
प्रावीण्यमस्त्येव बुधोत्तमानाम् ।
वर्षाणि नाना भवतां श्रमोऽत्र
तद्गूढमर्मग्रहणे प्रवृत्तः ॥ २ ॥

(उपजातिवृत्तम्)

अभ्यासमात्रं समपेक्ष्यते तन्
निबद्धवस्तुग्रथने गरीयः ।
तेनाद्वितीयं भवतां यशः स्याद्
'यशोधनानां हि यशो गरीयः' ॥ ३ ॥

लेखा अभूवन् प्रहिता पुरा ये
गीर्वाणवाण्या रचिता भवद्भिः ।
पद्यात्मकास्तेषु भवन्त्यनेके
कवित्वशक्तेर्भवतां प्रमाणम् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

शक्तिश्च नैपुण्यमथापि लोक-
शास्त्रादिकावेक्षणतः प्रजातम् ।
काव्यज्ञशिक्षाभ्यसनं च विज्ञाः
काव्यस्य हेतुं समुदीरयन्ति ॥ ५ ॥

(उपजातिवृत्तम्)

एषु द्वयं वर्तत एव सत्सु
श्रमस्तृतीये तु चिकीर्षितः स्यात् ।
सङ्कल्पमारुह्य तदर्थमाशु
प्रवृत्तिमन्तोऽत्र भवन्तु सन्तः ॥ ६ ॥

इत्येव सम्प्रार्थ्य सुहृद्वरेषु
प्रभुञ्च सम्प्रार्थ्य भवत्प्रकर्षम् ।
भवद्गुणावर्जितमानसोऽहं
वाचं स्वकीयामुपसंहरामि ॥ ७ ॥

भवत्सु स्निग्धः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

राष्ट्रपतिसम्मानसंवर्धनाप्रतिवचोरूपेणाचार्यमणिनाथ झा महाभागान् प्रति २८.८.१९८५ दिनाङ्के प्रेषितं पत्रम्

मानभाजो विद्वद्वरेण्याः,

प्रणतिततयः ।

(अनुष्टुब्वृत्तम्)

चित्ते मे भवतां पत्रं प्रीतिं प्राचीकटत्पराम् ।
आशिषं भवतां प्राप्य जीवनं सफलं मम ॥ १ ॥

अधीतिनः शास्त्रचये पाण्डित्यं परमं गताः ।
जङ्गमान्येव तीर्थानि भवादृक्षा बुधोत्तमाः ॥ २ ॥

अतो याचेऽत्रभवत आशिषां राशिमन्वहम् ।
येनावशिष्टं सकलं कार्यं पूर्णं भवेन्मम ॥ ३ ॥

अल्पमेवायुरस्तीह लोके पुंसां न पुष्कलम् ।
कृत्यजातं च बह्वस्ति करणीयं विदां वराः ॥ ४ ॥

तत्समाप्येत कालेन निर्विघ्नं चेत्यसंशयम् ।
तदर्थमाशिषां राशिर्विदुषां समपेक्ष्यते ॥ ५ ॥

इति निवेदना

भवद्गुणावर्जितहृदयस्य

सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भारतशिक्षामन्त्रालये विशेषसचिवान् श्रीकिरीटजोशिमहाभागान् प्रति १.९.१९८५ दिने प्रेषितं पत्रम् ।

मान्याः,

सप्रश्रयं नतिततयः ।

(अनुष्टुब्वृत्तम्)

भवन्तो विदुषां धुर्य्या नानाशास्त्रविशारदाः ।
विलक्षणधियो दिक्षु प्रख्यातिं परमां गताः ॥ १ ॥

(द्रुतविलम्बितवृत्तम्)

अधिगता मयका भवदाशिषो
मनसि माति च मे न मुदां चयः ।
जलनिधौ ननु मातु कथं जलं
लसति खे यदि पूर्णकलः शशी ॥ २ ॥

(उपजातिवृत्तम्)

दिने दिने यद्ध्रसिमानमाप्ता
गीर्वाणवाणी ध्रियतेऽधुनाऽपि ।
तत्र ध्रुवं तद्गतसर्वभावा
भवादृशा एव निबन्धनानि ॥ ३ ॥

(वसन्ततिलकावृत्तम्)

ये संस्थिता विबुधशीर्षकिरीटकोटौ
सन्तो वसन्ततिलकानवधीरयन्तः ।
तान् भारतस्य तिलकान् भवतो वदान्यान्
पद्यप्रसूनतिलकैरहमर्चयामि ॥ ४ ॥

सुरसरस्वतीसमाराधनैकव्रतः

सत्यव्रतः शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१५.८.१९८६ दिनाङ्के श्यामलपुरीस्थ श्रीकेशवशर्मणः प्रति प्रेषितं पत्रम्

मान्या विद्वद्वर्या,
जयतु भारती ।

(अनुष्टुब्वृत्तम्)

भवतां कुशलोदन्तश्चिरेणाधिगतो मया ।
प्रीणयत्यन्तरङ्गं मे नवां स्फूर्तिं ददाति च ॥ १ ॥

भारत्या यादृशी सेवा भवद्भिः क्रियतेऽधुना ।
क्रियते नैव देशेऽस्मिंस्तादृशी बहुभिर्जनैः ॥ २ ॥

(उपजातिवृत्तम्)

माध्वीकमाधुर्यधरा धरायां
गीर्वाणवाक् प्राणिति यज्जगत्याम् ।
सदा तदर्थं विहिताभियोगा
भवादृशा एव निबन्धनानि ॥ ३ ॥

(अनुष्टुब्वृत्तम्)

सिताम्बरस्य मासस्य सप्ताहेऽन्त्ये प्रवर्त्स्यति ।
सौन्दर्यशास्त्रविषये चर्चागोष्ठी विपश्चिताम् ॥ ४ ॥

उत्कलेषु पुरे श्रेष्ठे भुवनेश्वरसंज्ञके ।
न्यमन्त्रयन् यदर्थं मां तत्रत्या विदुषां वराः ॥ ५ ॥

इति वृत्तं निवेद्याहं षड्भिः पद्यैः समासतः ।
प्रणम्य चाचार्यवरान् स्वां वाचमुपसंहरे ॥ ६ ॥

भवद्गुणगणावर्जितहृदयः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पुरीस्थश्रीपुण्डरीकाक्षमिश्रमहाभागान् प्रति १८.११.१९८६ दिनाङ्के प्रेषितं पत्रम्

स्वस्ति । दिल्लीस्थः सत्यव्रतशास्त्री पुरीक्षेत्रस्थान् कविसहृदयान् नानाशास्त्र-पारंगतान् श्रीपुण्डरीकाक्षमिश्रमहाभागान् सविनयपुरस्सरं विज्ञपयति[१]

(उपजातिवृत्तम्)

आसाद्य पत्रं भवतामुदार-
मुदारधीद्योतितभूतलानाम् ।
महाकवीनां मुकुटे स्थितानां
हर्षप्रकर्षो हृदि मे न माति ॥ १ ॥

अभूज्जगन्नाथपुरीनिवासो
जन्मान्तरोपार्जितपुण्यहेतोः ।
सङ्गश्च सद्भिर्विरलो जगत्यां
ममेति संशीतिलवोऽपि नात्र ॥ २ ॥

स्मृतिर्निवासस्य सदोत्तमस्य
तस्य प्रिया स्थास्यति मेऽन्तरङ्गे ।
अगोचरं चापि गिरां प्रदास्य-
त्याजीवनं सर्वसुखातिरेकम् ॥ ३ ॥

दूरस्थितं मामपि यत्स्मरन्ति
जनाः पुरीक्षेत्रकृताधिवासाः ।
ततोऽधिकं मे ननु किं प्रियं स्यात्
किं वाऽर्जनीयं किमु वा च काम्यम् ? ॥ ४ ॥

---

१. 'ज्ञप मिच्च' 'इत्यनेन मित्संज्ञायां' 'मितां ह्रस्व' इत्यनेन ह्रस्वः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(अनुष्टुब्वृत्तम्)

कमलेशकृते स्नेहो बाढं मे प्रसरिष्यति ।
पुत्रीयामि प्रिये तस्मिन् सर्वसौभाग्यशालिनि ॥ ५ ॥

तदीयोऽभ्युदयो मेऽस्ति स्वस्याभ्युदय एव हि ।
इत्येव विनिवेद्याहं स्वां वाचमुपसंहरे ॥ ६ ॥

भवद्गुणगणावर्जितहृदयः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२४.४.१९८७ दिनाङ्के पितृचरणानां श्रीचारुदेवशास्त्रिणां महाप्रयाणशोकसन्देशप्रतिवचोरूपेणाचार्यदिवाकरदत्तशास्त्रिणः प्रति प्रेषितं पत्रम् । तादृशान्येवानन्तरवर्तीनि कतिपयान्यन्यान्यपि पत्राणि

(अनुष्टुब्वृत्तम्)

यावज्जीवं समाराध्य शब्दब्रह्म विशेषतः ।
तातपादा अन्तकाले तत्रैव विलयं गताः ॥ १ ॥

अनाथं संस्कृतजगदनाथा च सरस्वती ।
अनाथं चापि वैदुष्यमनाथा प्रतिभाऽपि च ॥ २ ॥

तादृशेऽथ महाभानावस्ताचलमुपेयुषि ।
तामिस्रमिव भात्येतज्जगत्कृत्स्नं चराचरम् ॥ ३ ॥

दिव्यज्योतिर्विशेषाङ्कं प्रकाशयितुमिच्छति ।
तत्स्मृताविति वृत्तान्तोऽत्यन्तं सुखकरो मम ॥ ४ ॥

मत्तो ह्यपेक्षितं यत् स्यात्तच्चावश्यं करिष्यते ।
तदर्थकमहं तावन्निर्देशं प्रतिपालये ॥ ५ ॥

भवदभिन्नहृदयः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२४.४.१९८७ दिनाङ्के श्रीगङ्गानगरस्थान् डा० सत्यव्रतमहाभागान् प्रति प्रेषितं पत्रम् ।

पूर्वपत्रस्थपद्यद्वयादनन्तरं संयोजितानि पद्यानि

प्रिया भ्रातृवर्याः,

(अनुष्टुब्वृत्तम्)

धन्यास्ते ऋषयो लोके शास्त्रनिर्मलबुद्धयः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥ १ ॥

पितृपादा विहायास्मानश्रुपूर्णाकुलेक्षणान् ।
विसृज्य पार्थिवं कायं यशःकायं समाश्रिताः ॥ २ ॥

श्यामलातो दिव्यज्योतिर्नाम्नी संस्कृतपत्रिका ।
तेषां स्मृतौ विशेषाङ्कं प्रकाशयितुमिच्छति ॥ ३ ॥

लेखास्तदर्थं नैके स्युरपेक्षिततमा इति ।
सूचयन्तु भवन्तो मां शक्यं स्यात्तदिति द्रुतम् ॥ ४ ॥

लेखं निबन्द्धुं शक्ताः स्युः श्रीतातविषये यदा ।
तथैव सूचयिष्यामि सम्पादकमहोदयान् ॥ ५ ॥

इत्येवोक्त्वा समासेन निध्यायन् भवतां शुभम् ।
भवदभिख्य एवाहं स्वां वाचमुपसंहरे ॥ ६ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ज्ञानपुरस्थान् डा० कपिलदेवद्विवेदिमहाभागान् ११.५.१९८७ दिनाङ्के प्रेषितं पत्रम् ।
पूर्वपत्रगतचतुर्थपद्यादनन्तरं संयोजितानि पद्यानि

(अनुष्टुब्वृत्तम्)

शब्दब्रह्मणि लीनास्ते सततं तदुपासकाः ।
जन्म ह्यपुनरावृत्त्यै भवत्येतादृशां किल ॥ १ ॥

सारस्वतान् ब्रह्मलीनान् अशोच्यांस्तान् विदन्नपि ।
शोकतप्तो भवाम्येव तत्स्नेहात्प्राकृतो यथा ॥ २ ॥

भवादृशानां बन्धूनां स्निग्धानां सान्त्वनाशतैः ।
यथाकथञ्चिदात्मानं पर्यवस्थापयाम्यहम् ॥ ३ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

खुर्जास्थश्रीराधाकृष्णसंस्कृतमहाविद्यालयप्राचार्यान् आचार्यरामकिशोरशर्ममहाभागान् प्रति प्रेषितं पत्रम् ।

श्रीगङ्गानगरस्थ डा० सत्यव्रतमहोदयान् प्रति प्रेषिते पूर्वोपन्यस्ते पत्रे तदीयचतुर्थपद्यादनन्तरं संयोजिता पद्यद्वयी

(उपजातिवृत्तम्)

ह्रीरार्जवं सत्यमुदारता च
वाचां रहस्याकलने च वृत्तिः ।
अनेकशास्त्राविरताभियोगः
सूक्ष्मेक्षिकाऽन्यत्र सुदुर्लभा च ॥ १ ॥

परार्थचिन्ता मृदुभाषिता च
स्नेहस्तथा बन्धुजनेषु गाढः ।
दिगन्तविश्रान्तयशस्सु येषु
गुणा अनेके स्थितिमन्त आसन् ॥ २ ॥

पुण्यश्लोका गता लोकांस्ते पुण्योपार्जिताञ्शुभान् ।
वयं तु तद्वियोगेन भृशं दुःखितचेतसः ॥ ३ ॥

मदेकपुत्रा अस्निह्यन् मयि ते सुतरामिति ।
स्मारं स्मारं भवाम्येव शोकसन्तप्तमानसः ॥ ४ ॥

संविभक्ततया जातं मद्दुःखं सह्यवेदनम् ।
इति भूयोऽधमर्णत्वं स्वस्य विज्ञपयाम्यहम् ॥ ५ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

११.६.१९८७ दिनाङ्के शर्मण्यदेशस्थट्यूबिंगननगरात् डा० राम... शर्ममहाभागान् प्रति प्रेषितं पत्रम्

मान्या विद्वन्मूर्धन्या,

विलसन्त्वत्रभवत्सु दूरबन्धोर्मम नैके ... माङ्गलयः ।

(अनु...ब्वृत्तम्)

प्रियाणां भवतां पत्रं स्नेहपूरेण पूरितम् ।
आधान्मे निर्वृतिं चित्ते वाचां कामप्यगोचराम् ॥ १ ॥

स्वत एव समुद्भूतो यश्छन्दःप्रसरो मयि ।
भवद्भिः प्रेषितस्तेन शोको मे शमितोऽशतः ॥ २ ॥

संविभक्तस्य दुःखस्य सह्या स्याद्वेदनेति यत् ।
कालिदासः कविः प्राह न मृषोद्यं वचो हि तत् ॥ ३ ॥

शब्दब्रह्मणि लीना मे पितरस्तदुपासकाः ।
विदन्नपीदमस्म्येव शोकसन्तप्तमानसः ॥ ४ ॥

मधुराः स्मृतयो नैका मथ्नन्ति मम मानसम् ।
तेषां मदेकपुत्राणां मयि स्नेहः परोऽभवत् ॥ ५ ॥

सर्वं शून्यमिवाभाति तदभावे जगन्मम ।
स्नेहप्रवृत्तिरेवैवं दर्शिनीति भवेन्ननु ॥ ६ ॥

यथाकथञ्चिदात्मानं पर्यवस्थापयाम्यहम् ।
लौकिकी रीतिरेषा हि तां लोको नातिवर्तते ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(उपजातिवृत्तम्)

सम्प्रत्यहं बेल्जियमाख्यदेशे
कृताधिवासः क्षपयामि कालम् ।
अत्रत्यविद्वत्प्रवरैः समेतः
शास्त्रादिचिन्ताव्यसनप्रसक्तः ॥ ८ ॥

मासो ममायातवतोऽत्र यातः
सद्ग्रन्थरत्नाभ्यसने रतस्य ।
मासास्त्रयोऽत्र व्यतियापनीया
अतः परं मित्रवरा मयेति ॥ ९ ॥

समासतोऽत्रत्यमहं स्ववृत्तं
संसूच्य सम्प्रार्थ्य भवच्छुभं च ।
नैकाश्च नैजीः प्रणतीर्निवेद्य
गिरं स्वकीयामुपसंहरामि ॥ १० ॥

भवदभिन्नहृदयः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३०.६.१९८७ दिने बेल्जियमदेशतो डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

(अनुष्टुब्वृत्तम्)

षड्विंशे ह्यस्य मासस्य पत्रमेतदलेखिषम् ।
प्रहेतुं नाशकं चापि कार्यान्तरवशादहम् ॥ १ ॥

अथाद्य दिवसे त्रिंशे पत्रमेतद् विचक्षणाः !
प्रहिणोमि विलम्बार्थं विमनायितमानसः ॥ २ ॥

अत्रान्तरे तु यो लेखश्चमत्कारकृते मया ।
व्यरच्यत स सौभाग्यात् पूर्णतां समुपागतः ॥ ३ ॥

ग्रन्थस्यास्य गुणग्रामो न्यक्षेणोद्घाटितो मया ।
अत्र लेखे सुविस्तीर्णे सुधियां प्रीतये भवेत् ॥ ४ ॥

पञ्चविंशकपृष्ठानि स्यादस्य हि कलेवरः ।
टङ्कितस्यात्र संस्पृष्टा अनेके विषया मया ॥ ५ ॥

विमर्शनेऽस्य ग्रन्थस्य कृत्वा भूयः परिश्रमम् ।
बहोः कालात्कृतां तात ! प्रतिज्ञां तीर्णवानहम् ॥ ६ ॥

सदा मङ्गलाभिला[षी]
सत्यव्रतशा[स्त्री]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१.८.१९८७ दिनाङ्के बेल्जियमदेशतो डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,

स्वस्ति सुकुटुम्बेभ्यो भवद्भ्यः ।

(अनुष्टुब्वृत्तम्)

अपरेद्युर्भवत्पत्रं समवाप्य मुदः पराम् ।
अध्यरुक्षं कोटिमहं वाचां कामप्यगोचराम् ॥ १ ॥

पत्रेण कुशलोदन्तो लब्धः प्रियजनस्य हि ।
किञ्चिदेव भवेदूनः सङ्गमादिति सूरयः ॥ २ ॥

(उपजातिवृत्तम्)

सम्प्रत्यहं बैल्जियमाख्यदेशे
कृताधिवासो गमयामि कालम् ।
अत्रत्यविद्वत्प्रवरैः समेतो
निरन्तरं शास्त्रचये प्रसक्तः ॥ ३ ॥

देशेऽतिरम्येऽत्र चकास्ति विश्व-
विद्यालयः ख्याततमो जगत्याम् ।
कैथोलिकाख्योऽतिपुरातनो यः
समेधितः सूरिपरम्पराभिः ॥ ४ ॥

(इन्द्रवज्रावृत्तम्)

गीर्वाणवाणीपरिशीलनार्थ-
मप्यर्जितं येन यशोऽद्वितीयम् ।
अध्यर्धशत्या नियमेन यस्मिन्
गीर्वाणवागध्ययनं प्रवृत्तम् ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(उपजातिवृत्तम्)

ग्रन्था अनेके रचिता इहत्य-
विद्वत्प्रवेकैर्महता श्रमेण ।
उद्घाटयन्तो गहनं रहस्यं
विभान्ति ये संस्कृतवाङ्मयस्य ॥ ६ ॥

रम्येऽत्र देशे व्यतियाप्य कालं
हालैण्डदेशे च सुखेन विज्ञाः !
निवर्तिताहे निजदेशमेव
तद्विप्रयोगाकुलितान्तरङ्गः ॥ ७ ॥

प्रवासिनो मासचतुष्टयं मे
यातं समं वर्षचतुष्टयेन ।
सह्यो भवेद् रम्यतमेऽपि सत्यं
न जातु देशे स्वजनैर्वियोगः ॥ ८ ॥

भवत्कुशलमनामयं च सदा प्रभुं प्रार्थयमानो विरमाम्यहं—

शुभेच्छुः

सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कुरुक्षेत्रस्थश्रीपिनाकपाणिमाध्यन्दिनमहाभागांस्तदीयपितृचरणानां श्रीस्थाणुदत्तशर्मणां गोलोकप्रयाणवृत्तजनितशोकाभिव्यञ्जकं ८.५.१९८८ दिनाङ्के प्रेषितं पत्रम्

श्रीमद्भ्यः पिनाकपाणिभ्यः स्वस्ति

(अनुष्टुब्वृत्तम्)

अपरेद्युः समासाद्य दुःखवृत्तावबोधकम् ।
भवत्पत्रं शोकमयं विदीर्णं हृदयं मम ॥ १ ॥

एकैकशो विहायास्मान् अश्रुपूर्णाकुलेक्षणान् ।
यान्ति पुण्यजितांल्लोकानस्मद्बन्धुजनाः प्रियाः ॥ २ ॥

पुण्यश्लोका महात्मानो धर्मकर्मरताः सदा ।
सदाचारस्य लोकेऽस्मिन् प्रमाणे परमे स्थिताः ॥ ३ ॥

एतन्निरीक्ष्य सर्वेऽपि बुधाः परमदुःखिताः ।
को नु कुर्यात् स्थानपूर्तिं तादृशां विदुषामिह ॥ ४ ॥

स्थाणुदत्ताः स्थाणुभक्ताः स्थाणुभूयं गता ननु ।
अशोच्यास्ते, वयं मोहाद् भवामः शोककर्शिताः ॥ ५ ॥

पितृशोको मयाऽप्यूढो भवद्भिरपि चेत्यतः ।
समदुःखौ स्थितावावां पितृव्यसनपीडितौ ॥ ६ ॥

पितृव्यतुल्यावासन् मे पितरो भवतामिति ।
दुःखाम्भोधावपारेऽहं मग्नो नैवात्र संशयः ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

धर्मक्षेत्रे कुरुक्षेत्रे मम वृत्तिर्यदाऽभवत् ।
तदा तत्सङ्गमसुखं मया भूयोऽन्वभूयत ॥ ८ ॥

स्नेहातिरेकधाराभिः स्नपितोऽहमनेकदा ।
बोधितश्चापि तत्त्वार्थं तस्मिन् काले बुधोत्तमैः ॥ ९ ॥

तत्सर्वं स्मृतिमार्गं मे हठादायाति साम्प्रतम् ।
सौम्या तदाकृतिश्चापि स्वभावश्च मनोहरः ॥ १० ॥

यथाकथञ्चिदात्मानं पर्यवस्थापयाम्यहम् ।
भवन्तोऽपि तथा कुर्युरित्येवानुरुणध्मि च ॥ ११ ॥

भवतां समदुःखभाक्
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

इन्दौरस्थान् डा० प्रभाकरनारायणकवठेकरमहाभागान् तदीयपुत्रविवाहोपलक्ष्ये
१६.६.१९८८ दिनाङ्के प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,
सप्रणयं प्रणमस्यामि ।

(अनुष्टुब्वृत्तम्)

आयुष्मतो गिरीशस्य विवाहोदन्तसूचकम् ।
भवत्पत्रं समासाद्य प्रहर्षः परमो मम ॥ १ ॥

वर्धापनानि शतशः प्रेषये दूरसंस्थितः ।
भवद्बन्धुरहं स्निग्धः शुभाशंसाश्च भूरिशः ॥ २ ॥

वृन्दागिरीशौ सततमश्नुवातां सुखं महत् ।
मोदमानौ दमे स्वस्मिन् क्रीळन्तौ पुत्रनप्तृभिः ॥ ३ ॥

सेवमानौ च भवतो भ्रातृजायां च मे शुभाम् ।
आराधयन्तौ च हृदा भूतभावनमच्युतम् ॥ ४ ॥

अनिशं पालयन्तौ च कुलधर्मं सनातनम् ।
मुदितेन मया स्नेहादाशीरेषा प्रयुज्यते ॥ ५ ॥

सत्यव्रतशास्त्रिणा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३.६.१९८८ दिनाङ्के पटनास्थ डा० मिथिलेशकुमारीमिश्रामहाभागां प्रति प्रेषितं पत्रम् ।

आयुष्मत्यै सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

पत्रं भवत्याः सम्प्राप्य प्रमोदः परमो मम ।
बन्धूनां कुशलोदन्तः सन्तोषं जनयेत्परम् ॥ १ ॥

बह्विच्छन्नप्यहं नैवायातुं शक्तः कथञ्चन ।
नगरं पाटलीपुत्रं विधेरिच्छा बलीयसी ॥ २ ॥

अकस्मादेव सुतरामस्वस्थोऽहमवर्तिषि ।
येन यात्रा निरुद्धा मे क्षणेऽन्त्ये वित्तहानिकृत् ॥ ३ ॥

रुजा शान्तिं गता यद्यप्युपचारेण मेंऽशतः ।
न प्राप्तवानहं स्वास्थ्यलाभमद्यापि पूर्णतः ॥ ४ ॥

मन्ये कालेन केनापि पूर्ववत्स्वास्थ्यमाप्नुयाम् ।
पूर्ववद् व्यापृतः स्यां च स्वेषु नैकेषु कर्मसु ॥ ५ ॥

आशासे भवती काव्यकर्मणि व्यापृता भृशम् ।
सुखेन कालं नयति सोत्साहं च विशेषतः ॥ ६ ॥

इति शुभेच्छाः

सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शर्मण्यदेशस्थश्रीपायरमहाभागान् प्रति १.७.१९८८ दिनाङ्के प्रेषितं पत्रम्

प्रिया: पायरमहाभागा:,
स्वस्ति ।

(उपजातिवृत्तम्)

श्रीपायराख्याय विदां वराय
सौजन्यवैदुष्यगुणाकराय ।
सदा ममान्तःकरणे स्थिताय
शुभाशिषो मे शतशो लसन्तु ॥ १ ॥

(इन्द्रवज्रावृत्तम्)

जीव्याद् भवान् वर्षशतं सुखेन
मार्गेरितासङ्गमसम्प्रहृष्टः ।
नीयाच्च कालं विबुधैः परीतः
शास्त्रादिकाभ्यासवशेन धीमान् ॥ २ ॥

(उपजातिवृत्तम्)

चिराय नापं भवतो यतोऽहं
वृत्तं ततः पत्रमिदं ददामि ।
अकालहीनं यदवाप्य वार्तं
स्वकं भवान् सम्प्रहिणोतु मह्यम् ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अत्रत्यवृत्तं शुभमेव सर्वं
कौटुम्बिका अत्र सुखेन सर्वे
ऋतुः सुखो गन्धवहः सुखश्च
वर्षा इदानीं प्रकटप्रकर्षाः ॥ ४ ॥

हरीतिमा सप्रति सम्प्रवृत्तो
नेत्रद्वयासेचनको विभाति ।
जलस्य धारा विसृजन् पयोदश्-
चामन्दमानन्दमवातनोति ॥ ५ ॥

(अनुष्टुब्वृत्तम्)

अथ विज्ञायमानं स्यान्मोदाय परमाय वः ।
यदुत्तरप्रदेशस्य राज्येनाहं पुरस्कृतः ॥ ६ ॥

पच्चविंशतिसाहस्र्या मुद्राणाम् और्णवाससा ।
ताम्रपत्रार्पिताभिश्च स्तुतिभिः श्रीफलेन च ॥ ७ ॥

उपराष्ट्रपतिः श्रीमान्भारतस्य महाजनः ।
पुरस्कारमिमं बन्धो स्वयं मेऽर्पितवान् मुदा ॥ ८ ॥

थाइदेशं गमिष्यामि वर्षेऽस्मिन् भार्यया सह ।
इत्युक्तमासीद् भवता गतवर्षे वचो मम ॥ ९ ॥

ममापि तत्र गमनमगस्त्ये मासि सम्भवम् ।
कदा नु भवतो यात्रा प्रारभेतेति सूच्यताम् ॥ १० ॥

आङ्गलीं वाचमाश्रित्य विन्यस्यामि वचोऽधुना ।
उत्तरं भवता देयं गैर्वाण्यैव तु केवलम् ॥ ११ ॥

इति निवेदना
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१०.१.१९८९ दिनाङ्के डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रियेभ्यो डा० कृष्णलालमहाभागेभ्यः स्वस्ति ।
आशासे सपुत्रकलत्राः कुशलिनः श्रीमन्त इति ।

(अनुष्टुब्वृत्तम्)

मासो मे व्यतियातोऽथ बैंकाकनगरं शुभम् ।
प्राप्तस्य नाशकं चापि प्रहेतुं पत्रमित्यतः ॥ १ ॥

किञ्चिदुद्विग्नचित्तोऽहं न शान्ति कलयाम्यहम् ।
अनौचित्यकृता दोषा उद्वेगायैव केवलम् ॥ २ ॥

निवासादिव्यवस्थार्थं सुतरां व्यापृतिं भजन् ।
न क्षणं क्षणमप्यन्यकार्यार्थं लब्धवानहम् ॥ ३ ॥

साम्प्रतं सुव्यवस्थोऽहं शोभनं गृहमावसन् ।
लब्धावकाश इतरं कार्यौघं कर्तुमुद्यतः ॥ ४ ॥

नवाम्बरस्य मासस्य त्रिंशेऽहनि समागतः ।
पुरं बैंकाकनामाहं थाइदेशस्य गौरवम् ॥ ५ ॥

बैंकाकेतिसमाख्याऽस्य यद्यपि प्रथिता भुवि ।
तथाऽपि थाइदेशीया न नाम्नैतत्प्रचक्षते ॥ ६ ॥

क्रुङ्थेवेत्यन्यदेवास्ति नाम तेषु प्रथां गतम् ।
प्रयुञ्जते तदेवैते न बैंकाकेति जातुचित् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

क्रुङ्शब्दः थाइमूलोऽस्ति थेवः संस्कृतमूलकः ।
क्रुङ्शब्दार्थः स्थानमिति थेवो देवार्थको मतः ॥ ८ ॥

अपभ्रंशः थेवशब्दो देवस्यैवेत्यसंशयम् ।
गैर्वाण्या देवशब्दोऽत्र थेवरूपेण गद्यते ॥ ९ ॥

देवस्थानं भवेदर्थः क्रुङ्थेवस्येति निश्चितम् ।
नात्र कश्चिद्विसंवादो विदुषां परिलक्ष्यते ॥ १० ॥

अतीता किञ्चिदधिका हायनानां शतद्वयी ।
पुरस्यास्य निविष्टस्य सुतरामृद्धिशालिनः ॥ ११ ॥

दिग्भ्यो विदिग्भ्यः सम्प्राप्ता जना विस्मितमानसाः ।
आप्याययन्ति कामं स्वमेतस्य विभवैर्हृताः ॥ १२ ॥

चक्रिवंश्या भूमिपाला थाइदेशं प्रशासति ।
तन्मूलपुरुषः कश्चित्पुरमेतन्न्यवेशयत् ॥ १३ ॥

बुद्ध योद् फेति नामासीत् तस्य विद्वन्महामणेः ।
रामगाथां स्ववाचा यो जगौ कविधुरन्धरः ॥ १४ ॥

रामकीर्तिरिति ख्यातं तत्काव्यमतिविस्तृतम् ।
नानासहस्रसङ्ख्याकैर्निबद्धं हृदयङ्गमैः ॥ १५ ॥

पद्यरूपै[१] रामगाथामवान्तरकथाशतैः ।
जोषयत्सुतरां रुच्यैरधिलोकं विराजते ॥ १६ ॥

न दृष्टं वा श्रुतं वापि काव्यं तादृङ् मनोहरम् ।
रामगाथागानपरमित्यत्रत्याः प्रचक्षते ॥ १७ ॥

---

१. प्रशस्तैः पद्यैरित्यर्थः । प्रशंसायां रूपप् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पाठं पाठं च तत्काव्यं पायं पायं च तद्रसम् ।
काव्यामृतरसज्ञानां नैव तृप्तिः प्रजायते ॥ १८ ॥

तद्रसं पाययिष्यामि कलया भवतोऽप्यहम् ।
स्वपत्रमाध्यमेनैव तत्काव्यमुपवर्णयन् ॥ १९ ॥

अकालहीनं संप्रेष्यं कुशलोदन्तसूचकम् ।
पत्रं स्वमिति सम्प्रेर्य वाचं स्वामुपसंहरे ॥ २० ॥

भवत्सौजन्यवैदुष्यमुग्धहृदयोऽहं
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

४.३.१९८९ दिनाङ्के बैंकाकतो डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

स्वस्ति सकुटुम्बेभ्योऽत्रभवद्भ्यः ।

(अनुष्टुब्वृत्तम्)

भवद्भिः प्रेषितं पत्रं प्रियमासादितं मया ।
लब्धश्च तेन सुतरामानन्दो वागगोचरः ॥ १ ॥

उर्वी प्रतिभया स्वोर्व्या चतुर्थस्थानभागभूत् ।
इति प्रहर्षं परममातनोन्मम मानसे ॥ २ ॥

(उपजातिवृत्तम्)

सुता कवीनां भवतां शुभा सा
साकारयन्ती प्रतिभाविलासम् ।
प्रशंसनीयं न कथं सुविज्ञा
लभेत गोष्ठीषु पदं कवीनाम् ॥ ३ ॥

(इन्द्रवज्रावृत्तम्)

संवर्धनीया वचसा ममैषा
प्रोत्साहनीया च कवित्वकार्ये ।
शक्त्या सहैवाहुरमन्दमार्याः
काव्यस्य हेतुं त्वभियोगमेव ॥ ४ ॥[१]

आचार्यदण्डिनः पद्यांशस्यैवाभिप्रायोऽत्रोपन्यस्तः । स पद्यांशोऽस्ति—

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ॥

नैसर्गिकी प्रतिभैवाचार्यमम्मटेन शक्तिरित्युक्ता—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(उपजातिवृत्तम्)

निरन्तरोऽस्या अभियोग एष
प्रवर्ततामित्यनुशासनीया ।
बुद्धा प्रबुद्धाऽपि यथार्थतत्त्वं
मुहुर्मुहुः सा प्रतिबोधनीया ॥ ५ ॥

एवं यशः स्यादनवद्यमस्या
विचारवत्याः प्रथितं पृथिव्याम् ।
अपत्यजातान्न ततोऽतिरिक्तं
प्रियं भवेद् बन्धुजनस्य किञ्चित् ॥ ६ ॥

प्रवर्धमानाऽनुदिनं सुतेयं
लोकप्रिया चान्द्रमसी कलेव ।
काव्ये च शास्त्रे च भृशानुरक्ता
कालं स्वकीयं नयतात् सुखेन ॥ ७ ॥

(इन्द्रवज्रावृत्तम्)

इत्याशिषं तां प्रति सम्प्रयुज्य
संवर्धनां चापि भवत्सु भूयः ।
रामायणं सम्प्रति थाइदेश्य-
माश्रित्य किञ्चिद्वचनोत्सुकोऽस्मि ॥ ८ ॥

आत्मीयभावः परिलक्ष्यतेऽत्र
रामायणेऽन्यत्र सुदुर्लभो यः ।
एतन्मयाऽभूत्प्रकटीकृतं स्वे
पत्रे मतं पूर्वतने स्वकीये ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

आत्मीयभावेन हृदि स्थितेन
तेनैव नानाऽत्र कथानकानि ।
संयोजितानि प्रथयन्ति किञ्चिद्
रामायणस्यान्यदिव स्वरूपम् ॥ १० ॥

आस्ते पुनर्मूलकथा तथैव
तस्यां न भेदः परिलक्ष्यतेऽत्र ।
भेदः पुनर्भाति कथानकेषु
नूत्नेषु नान्यत्र कथञ्चनापि ॥ ११ ॥

मूलां कथां तानि कथानकानि
चादाय देशेऽत्र सुविश्रुतानि ।
रामस्य गाथां नवरूपरम्यां
गीर्वाणवाण्या समुदीरयामि ॥ १२ ॥

सदा भवन्मङ्गलाभिलाषी
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकतो डा० कृष्णलालमहाभागान् प्रति २०.३.१९८९ दिनाङ्के प्रेषितं पत्रम्

स्वस्ति डा० कृष्णलालमहाभागेभ्यः सकुटुम्बेभ्यः ।

(अनुष्टुब्वृत्तम्)

अवाप्य यो भवत्पत्रमानन्दोऽधिगतो मया ।
न स वर्णयितुं शक्यः शक्रेणापि कथञ्चन ॥ १ ॥

तस्य सम्प्राप्तिमात्रेण य आनन्दोऽभ्यजायत ।
तद्वाचनेन व्याघातः कश्चित्तस्मिन्नुपस्थितः ॥ २ ॥

रुजाक्रान्तांस्तु विज्ञाय भवतो व्यथितोऽस्म्यहम् ।
शरीरकष्टं कष्टाय भवेदिष्टस्य सर्वथा ॥ ३ ॥

ममापि वर्तते पीडा दक्षिणे स्कन्ध इत्यतः ।
न मेऽस्ति मानसं स्वास्थ्यं कायकष्टे तु तत्कुतः ॥ ४ ॥

न केवलं स्कन्धदेशे मेरुदण्डेऽपि सन्ततम् ।
पीडामनुभवाम्येव भृशमुद्वेगकारिणीम् ॥ ५ ॥

जराकृता इमे दोषास्तदागमनसूचकाः ।
प्रादुर्भवन्ति कालेन न धीमांस्तत्र मुह्यति ॥ ६ ॥

न मूलोच्छेद एतेषां सम्भवीति चिकित्सकाः ।
प्रादुर्भवन्ति भूयोऽपि सम्यगेते चिकित्सिताः ॥ ७ ॥

जराङ्कुश इति ख्यातौषधिरस्ति हि काचन ।
तत्तैलाभ्यङ्ग उचित इति मां कश्चनोक्तवान् ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अभ्यक्तमात्रे तत्तैले पित्तं प्रकुपितं मम ।
एकदोषोपशमनेऽपरो वृद्धिं प्रगच्छति ॥ ९ ॥

अतो व्यायाम एवात्र सर्वथा शरणं भवेत् ।
कष्टश्रितानामस्माकमिति मे सुदृढा मतिः ॥ १० ॥

दीर्घासक्तिर्दीर्घश्रमो दीर्घायासश्च सर्वथा ।
अस्माभिः परिहर्तव्या आत्मनः स्वास्थ्यमीप्सुभिः ॥ ११ ॥

वच एतदुपन्यस्य समासेन भवत्स्वहम् ।
थाइरामायणे तावत् स्वं वचः सम्प्रवर्तये ॥ १२ ॥

संयोजितानि नूत्नानि थाइरामायणेऽभवन् ।
कथानकानि नैकानीत्यहं सम्प्रोक्तवान् पुरा ॥ १३ ॥

कथानकानि तान्यत्र स्ववाचा रुचिराण्यहम् ।
नृणां तदनभिज्ञानां ज्ञानाय विनिवेदये ॥ १४ ॥

(अनोमतन्नुपाख्यानम्)

अनोमतन्निति ख्यातो माननीयतमो नृणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ १५ ॥

थाइरामायणे तावदित्थं तस्य समुद्भवः ।
वर्णितोऽस्ति नृपालस्य स्वयं जातस्य धीमतः ॥ १६ ॥

(उपजातिवृत्तम्)

हिरन्तयक्षेति बभूव कश्चिन्
मायाविनामग्रसरोऽसुरेन्द्रः ।
देवेषु यो विप्रचकार शैले
वसन् विशाले किल चक्रवाले ॥ १७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तत्पीडिता देवगणा उपायन्-
नुपायमन्यं नहि वीक्षमाणाः ।
देवाधिदेवं शरणं शरण्यं
कैलासवासं विपदां निरासम् ॥ १८ ॥

एकोऽत्र नारायण एव सत्यं
नाशेऽसुरस्यास्य भवेत्समर्थः ।
इत्थं विचिन्त्य प्रभुरीश्वरो द्राक्
तमेव तावन्मनसा जगाम ॥ १९ ॥

उपस्थितोऽभूत्स्मृतमात्र एव
नारायणः पर्वतजाप्रियेण ।
पप्रच्छ चैनं किमु मेऽस्ति कार्यं
स्मार्यत्वकोटिं गमितोऽस्मि येन ॥ २० ॥

तमीश्वरः प्राह हिरन्तयक्ष-
नामासुरः पीडयते सुरौघम् ।
त्रस्तश्च भीतश्च कदर्थितश्च
मामद्य येनायमभिप्रपन्नः ॥ २१ ॥

लोके प्रपन्नार्तिहरो मतोऽह-
मतो विपन्नं शरणं प्रपन्नम् ।
देवौघमेनं परिरक्षितुं मे
विष्णो ! द्रढीयान् मनसोऽभिलाषः ॥ २२ ॥

एनं भवान् मे मनसोऽभिलाषं
सर्वात्मना पूरयितुं समर्थः ।
भवानतो यातु च हन्तु चैनं
दुर्दानवं पातु च देवसङ्घम् ॥ २३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

एवं प्रयुक्तः परमेश्वरेण
नारायणो लोकपरायणोऽसौ ।
सम्प्रस्थितोऽद्रिं प्रति चक्रवाल-
नाम्ना प्रसिद्धं तमुपागमच्च ॥ २४ ॥

(उपजातिवृत्तम्)

आयोधयामास च तत्र भीमं
स दानवं नाम हिरन्तयक्षम् ।
शस्त्रैश्च तीक्ष्णैरतिपापवृत्तिं
देवार्दकं तं निजघान चापि ॥ २५ ॥

निहत्य चैनं समुपाजगाम
क्षीराम्बुधिं नाम निजालयं सः ।
उपागतश्चापि ददर्श तत्र
पद्मे शयानं शिशुमिन्दुवर्णम् ॥ २६ ॥

आदाय चैनं त्वरितं स दोर्भ्यां
कैलासशैलं समुपाजगाम ।
सन्दर्शयामास तमीश्वरं च
समर्पयामास च तं स तस्मै ॥ २७ ॥

अनोमतन्नित्यथ नामधेयं
तस्मै ददावीश्वर आशुतोषः ।
राजा भवत्वेष शिशुः पृथिव्या
आद्यो बलीयानिति चादिदेश ॥ २८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तस्याभवद्राजवरस्य राज-
धानी सुरम्या भुवि पुर्ययोध्या ।
महेश्वरादेशवशंवदेन
स्वयं महेन्द्रेण निवेशिता या ॥ २९ ॥

निवेशनार्थं स्वपुरात्स पुर्याः
शक्रो यदा प्रास्थित दिव्यशक्तिः ।
मध्येपथं दैववशात्तदानीं
स सङ्गतोभूदृषिभिश्चतुर्भिः ॥ ३० ॥

अछ्नगावीदाहयुगाग्रयाग-
सञ्ज्ञा अभूवन्नृषयो वरास्ते ।
तन्नामधेयादिममक्षरौघ-
माश्रित्य पुर्याः कृतमास्त नाम ॥ ३१ ॥

(प्रहर्षिणीवृत्तम्)

सम्प्राप्तो जननमनोमतन्नृपस्य
सत्पुत्रो दशरथ इत्युदारसत्त्वः ।
तस्याभूदखिलजगन्नमस्यभूतः
श्रीरामो गुणगणमण्डितस्तनूजः ॥ ३२ ॥

तस्यैवाखिलजनवन्दितस्य दिव्यं
चारित्रं विशदमुपास्य रामभक्ताः ।
गायन्ति स्वरचितकाव्यमाध्यमेन
तत्काव्यं प्रसरति रामकीर्तिनाम्ना ॥ ३३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(२)

(बेञ्जकय्युपाख्यानम्)

(उपजातिवृत्तम्)

आसीत्पुरा बेञ्जकयीतिनाम्नी
क्रूराकृती राक्षसकन्यकैका ।
सा रावणोक्ता विदधे स्वरूप-
मभिन्नरूपं जनकात्मजायाः ॥ ३४ ॥

मृतामिव स्वं परिदर्शयन्ती
तस्याः प्रवाहे स्वमवाहयत्सा ।
नद्यां वगाहं व्यतनिष्ट यस्यां
श्रीरामभद्रोऽनुदिनं प्रभाते ॥ ३५ ॥

मायावशेनैव तया स्वरूपं
धृतं मृताया जनकात्मजायाः ।
येनावगाहार्थमुपागतः स-
न्नालोक्य तां मुह्यतु रामभद्रः ॥ ३६ ॥

(इन्द्रवज्रावृत्तम्)

नष्टा प्रिया मे किमु जीवितेन
कार्यं ममेति प्रतिपन्नबुद्धिः ।
खिन्नान्तरात्मा विरमेत्स युद्धात्
प्राणांस्त्यजेद्वा वनमाश्रयेद्वा ॥ ३७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(उपजातिवृत्तम्)

इत्येव सञ्चिन्त्य सदा परेषां
प्रवञ्चनायां निपुणो दुरात्मा ।
दशाननो राक्षसकन्यकां तां
न्ययोजयत्कर्मणि तत्र घोरे ॥ ३८ ॥

यथाऽनुमानं दनुजस्य तस्य
यदाऽऽगतो दाशरथिर्विधातुम् ।
स्नानादिकं दैनिककृत्यजातं
तटे स नद्याः समवालुलोके ॥ ३९ ॥

मृतं शरीरं जनकात्मजाया
नदीप्रवाहेण समुह्यमानम् ।
तदैव संमोहमुपागतोऽभू-
दमुञ्चदश्रूणि च लुप्तधैर्यः ॥ ४० ॥

(अनुष्टुब्वृत्तम्)

स्वकीयं कुशलोदन्तं सम्प्रेष्य विदुषां वराः ।
आनन्दाम्भोनिधौ क्षिप्रं मज्जयन्त्वेव मामिति ॥ ४१ ॥

विनिवेद्य प्रभुञ्चापि सम्प्रार्थ्य भवतामहम् ।
मङ्गलानामविच्छेदं स्वां वाचमुपसंहरे ॥ ४२ ॥

शुभेच्छुः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३.६.१९८९ दिनाङ्के बैंकाकतो डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

(अनुष्टुब्वृत्तम्)

बैंकाकनगरस्थोऽयं बन्धुभ्यो दूर एव च ।
प्रियेभ्यः कृष्णलालेभ्यः स्वस्तिवाकं प्रशास्म्यहम् ॥ १ ॥

मईमासदिने प्राप्तो नवमेऽहं पुरीमिमाम् ।
मध्यरात्रे सपत्नीकस्तेन श्रान्तिर्ममाभवत् ॥ २ ॥

नानाकार्याणि कार्याणि मयाऽऽसन्ननुपस्थितौ ।
सम्पाद्यत्वस्य सुतरां मम तेषामसम्भवः ॥ ३ ॥

सम्पादितानि तान्यद्य किञ्चित्स्वस्थमना अहम् ।
अस्वस्थोऽपि शरीरेण पत्रमेतल्लिखाम्यहम् ॥ ४ ॥

थाइरामायणे याऽऽसीत् काव्यधारा प्रवर्तिता ।
किञ्चित्कालात् यथापूर्वं साऽनिर्बाधं प्रवर्तते ॥ ५ ॥

अद्यावधि मया तात ! कृता शतचतुष्टयी ।
पद्यानां नैकवृत्तेषु निबद्धानां मनोरमा ॥ ६ ॥

षष्टिर्वा सप्ततिर्वा स्युर्भूयः पद्यानि बुद्धिमन् !
मया विरचनीयानि ततो ग्रन्थोऽवसास्यति ॥ ७ ॥

थाइरामायणकथामञ्जरीति विचिन्तितम् ।
ग्रन्थस्यास्य मया नाम कदाचिद्रुचिरं भवेत् ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बृहत्कथामञ्जरीति क्षेमेन्द्रः कृतवान् कविः ।
नाम स्वस्याः कृते रम्यं तत्पद्धत्यैव चिन्तितम् ॥ ९ ॥

नाम स्वस्याः कृतेस्तात ! तद्विवेकिजनाः किमु ।
पश्येयुरुचितं रम्यं वेत्यत्र मम संशयः ॥ १० ॥

अथ नामान्तरं किञ्चिदतो रम्यतरं शुभम् ।
निर्देष्टव्यं ग्रहीष्यामि तदेवात्रेत्यसंशयम् ॥ ११ ॥

उपाख्यानानि तान्येव काव्येऽत्रावर्णयं मुदा ।
वाल्मीकिना कृते यानि कृते गोस्वामिनाऽथवा ॥ १२ ॥

तुलसीदाससंज्ञेन सतां प्राग्रहरेण हि ।
रामायणे महाकाव्ये न लभ्यन्ते कदाचन ॥ १३ ॥ (युग्मकम्)

उपाख्यानततेरस्या थाइदेशेऽत्र सम्भवः ।
कुतो जातो न वेदेदं रहस्यं साम्प्रतं जनः ॥ १४ ॥

अथ विज्ञातुमिच्छामि कच्चिद् भोः कुशली भवान् ।
शरीरकष्टं शान्तं वा शान्तिश्चेतसि वा स्थिरा ॥ १५ ॥

चेतःप्रसादः सुतरां मत आवश्यको यतः ।
'प्रसादे सर्वदुःखानां हानिर्जीवस्य जायते' ॥ १६ ॥

यावज्जीवं भवान् स्वस्थः परमं सुखमेधताम् ।
भगवन्तमिदं प्रह्वः प्रार्थये भूतभावनम् ॥ १७ ॥

शुभेच्छुः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकतो डा० कृष्णलालमहाभागान् १३.७.१९८९ दिनाङ्के प्रेषितं पत्रम्

प्रिया डा० कृष्णलालमहाभागाः,
स्वस्ति सकुटुम्बेभ्योऽत्रभवद्भ्यः ।

(अनुष्टुब्वृत्तम्)

अध्यगामि मया पत्रं भवतां हर्षवर्धनम् ।
अवापि कुशलोदन्तश्चैतेनातीव सौख्यदः ॥ १ ॥

अहमत्र सुखी कार्ये स्वकीये निरतः सदा ।
गमयामि स्वकं कालं काव्यशास्त्रविनोदतः ॥ २ ॥

तेनैव सफलं जन्म तेन सिद्धिः परा मता ।
तेनैव परमस्तात ! पुरुषार्थोऽप्यवाप्यते ॥ ३ ॥

रागद्वेषादिमग्नानां गुणिनामपि भूरिशः ।
काव्यादिविमुखानां हि कालो याति निरर्थकः ॥ ४ ॥

'क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्' ।
इत्यादेशः शास्त्रकृतां पालनीयोऽस्ति सर्वदा ॥ ५ ॥

पालनाय तु तस्यैव यत्नशीलोऽस्मि सर्वथा ।
आत्मनीनो[1] ह्ययं पन्था इति बुद्धिं समाश्रितः ॥ ६ ॥

शास्त्राण्यनन्तपाराणि वयं चात्यल्पमेधसः ।
उद्युञ्जाना अपि श्रान्ता न शक्ता बहु वेदितुम् ॥ ७ ॥

---

१. आत्मनीन आत्मने हित इत्यर्थः । 'आत्मन्विश्वजनभोगोत्तरपदात्ख' इत्यनेन हितार्थे खे सति रूपम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(शिखरिणीवृत्तम्)

'अवश्यं यातारश्चिरतरमुषित्वाऽपि विषया'
अतस्तेष्वासक्तिर्जगति नहि युक्ता कथमपि ।
यदीच्छाऽऽसक्तेश्चेत्तदिह शुभकाव्ये भवतु वा
ऽथवा शास्त्रौघे वा सुजनसङ्गे भवतु सा ॥ ८ ॥

अयं पन्थास्तावज्जगति परनिःश्रेयसकरः
पुरा विद्वच्छ्रेष्ठा विशदमिममाख्यन् परहिताः ।
अतः पाल्यः सद्भिः सततमभियोगेन सुखद-
स्तदर्थं चेष्टा मे प्रतिदिवसमेव प्रसरति ॥ ९ ॥

(अनुष्टुब्वृत्तम्)

मासेऽतीते गतोऽभूवं थाइदेशस्य दक्षिणम् ।
भागं यत्र मया दृष्टे पुरे द्वे अतिशोभने ॥ १० ॥

अति प्रत्नं तयोरेकं बहुज्ञानविवर्धनम् ।
नगरश्रीधर्मराज इति नाम दधत्पुरम् ॥ ११ ॥

दर्शनीयं मया दृष्टं बहु तत्र मुदावहम् ।
देवालयद्वयं तत्र विशेषोल्लेखमर्हति ॥ १२ ॥

शिवालयस्तयोरेकोऽपरो नारायणालयः ।
न पूजा वर्तते तत्र देवयोरुभयोरपि ॥ १३ ॥

देवार्चामूर्तयः सर्वाः सङ्ग्रहालयमाश्रिताः ।
तच्छोभां वर्धयन्त्यद्य सति कालविपर्यये ॥ १४ ॥

अत्यन्तशोभना मूर्तीर्मूर्तिकारैर्विनिर्मिताः ।
अहमालोकमालोकं या न तृप्तिं गतोऽभवम् ॥ १५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अहो कलाकुशलता भावस्याहो च सङ्गमः ।
तद्दर्शनेन मुग्धस्य वागियं मे विनिःसृता ॥ १६ ॥

न्यक्षेण कथयिष्यामि पुनस्तद्विषये बुधाः ।
इत्येवोक्त्वा समासेन वाचं स्वामुपसंहरे ॥ १७ ॥

शुभेच्छुः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकतो डा० कृष्णलालमहाभागान् प्रति २६.८.१९८९ दिनाङ्के प्रेषितं पत्रम्

प्रियेभ्यो डा० कृष्णलालमहाभागेभ्यः स्वस्ति ।

(अनुष्टुब्वृत्तम्)

प्रेषितोऽभून्मया लेखो जुलैमासत्रयोदशे ।
दिवसे स नु सम्प्राप्तो भवद्भिरथवा नहि ॥ १ ॥

नैवेत्यहं विजानामि प्रैषणी[1] कार्यसंविधा ।
नैव साधीयसी नैकदेशेष्विति मतिर्मम ॥ २ ॥

सकुटुम्बा भवन्तः स्युः कुशलेन स्थिता इति ।
प्रभुमभ्यर्थये नित्यं करुणावरुणालयम् ॥ ३ ॥

अध्यारूढा भवन्तः स्युर्मासेऽस्मिन्नेव कोविदाः ।
विभागाध्यक्षपदवीं परमानन्ददायिनीम् ॥ ४ ॥

वर्धापनास्तदर्थं मे सपत्नीकस्य भूरिशः ।
प्रमोदाम्बुधिमग्नस्य मङ्गलाभ्यर्थिनः सदा ॥ ५ ॥

यशो भूयोऽपि विततं दिक्षु चापि विदिक्षु च ।
भूयादिति शुभाशंसां प्रेषये भवतः प्रति ॥ ६ ॥

नगरश्रीधर्मराज इत्याख्यं नगरं शुभम् ।
अतीतगौरवं व्याख्यद् गमिकर्मीकृतं मया ॥ ७ ॥

---

१. थाइदेशे पोस्ट आफिस (डाकखाना) इत्यर्थेऽयमेव शब्दोऽद्यापि प्रयुज्यते ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तदेतत्पूर्वपत्रेऽहमसूसुचमितो बुधाः ।
कदाचिद्यदि तत्पत्रं भवद्धस्तगतं भवेत् ॥ ८ ॥

'वात् महाथादि' ति थाइभाषया कीर्तितो महान् ।
एको बौद्धविहारोऽस्ति तत्र नेत्रसुखावहः ॥ ९ ॥

वाच्छब्दो वाटशब्दस्यापभ्रंशोऽस्तीत्यसंशयम् ।
महाथाच्च महाधातोर्धथयोर्व्यत्यये सति ॥ १० ॥

देववाण्या अकारान्तं थाइदेश्याः प्रयुञ्जते ।
शब्दौघमनकारान्तं तादृशी तत्र पद्धतिः ॥ ११ ॥

गर्भगृहे तु वाटस्य नानास्तम्भाश्चकासति ।
रामायणीयपात्राणां प्रत्येकं यत्र चित्रणम् ॥ १२ ॥

अपरस्मिन् प्रकोष्ठे तु राजते सुगताकृतिः ।
अतीव विपुला सत्यं तद्भक्तानन्दकारिणी ॥ १३ ॥

दृश्यते तत्पुरस्त्वेका सोपानानां परम्परा ।
यत्पादमूले लसति यक्षाकृतियुगं शुभम् ॥ १४ ॥

सोपानानि समारुह्य देवमन्दिरवत्स्थितम् ।
वेश्मैकं दृश्यते यत्र द्वे मूर्ती स्तो विलक्षणे ॥ १५ ॥

कयोरेते मयेत्येवं पृच्छ्यमानेऽपि कोऽपि न ।
यथावदशकद्वक्तुं स्वमज्ञानं प्रकाशयन् ॥ १६ ॥

एवं प्रतीयते तात ! नैके देवालयाः पुरा ।
बौद्धविहाररूपेण कालेन परिवर्तिताः ॥ १७ ॥

इदं तावद् भवत्येव सति धर्मविपर्यये ।
परिवर्तनमेतादृक् सर्वत्र परिदृश्यते ॥ १८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(वसन्ततिलकावृत्तम्)

यात्येकतोऽस्तशिखरं यदि धर्म एक-
स्तत्स्थानमापतति निश्चितमन्य एव ।
धर्मद्वयस्य युगपद् व्यसनोदयाभ्यां
पूर्वस्तिरस्क्रियत इत्यति कष्टदायि ॥ १९ ॥

(अनुष्टुब्वृत्तम्)

स्वकीयः कुशलोदन्तः सम्प्रेष्यो नचिरादिति ।
भवत्स्वेतन्निवेद्याहं स्वां वाचमुपसंहरे ॥ २० ॥

शुभेच्छुः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१९.९.१९८९ दिनाङ्के, बैंकाकनगरात् शर्मण्यदेशस्थान् श्रीपायरमहाभागान् प्रेषितं पत्रम्

(उपजातिवृत्तम्)

सम्प्रेषितं स्विट्ज़रलैण्डदेशात्
पत्रं समासाद्य ममाऽऽस्त चेतः ।
चिन्ताभरेणामथितं नितान्तं
तान्तं तथाऽशान्तमतीव दुःखात् ॥ १ ॥

कष्टं महत्सोढवती प्रिया मे
पुत्री शुभा मार्गरिटाभिधाना ।
अल्पे वयस्येव तयाऽनुभूता
शल्यक्रिया हन्त ! विधेर्विधानात् ॥ २ ॥

सम्प्रार्थयेऽहं प्रभुमीशमीड्यं
निरामयत्वं सुतराममुष्याः ।
सम्पादयन्ती सुखिनी गृहस्थ-
विधिं प्रजीव्याच्छरदां शतं सा ॥ ३ ॥

गुणा अनेके विलसन्ति तस्यां
माधुर्यदाक्षिण्यपरिश्रमाद्याः ।
निसर्गजा यैः परिभूषिता सा
स्वबन्धुवर्गेऽति समादृताऽस्ति ॥ ४ ॥

वयं तु तस्याः सुतरां स्मरामो
गुणांश्च तस्याः परिकीर्तयामः ।
तस्याः सुखं नित्यमथो लषामो
दीर्घं तदायुश्च सदाऽर्थयामः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

६.३.१९९० दिनाङ्के डा० कृष्णलालमहाभागान् बैंकाकतः प्रेषितं पत्रम्

बैंकाकनगरस्थोऽहं दिल्लीस्थान् प्रियबन्धून् डा० कृष्णलालमहाभागान् सस्नेहनिर्भरं परिष्वज्य विज्ञपयामि—

(अनुष्टुब्वृत्तम्)

चिरायोदीक्षितं पत्रमासाद्य भवतां मम ।
आनन्दातिशयो जातः कश्चिद्वाचामगोचरः ॥ १ ॥

पुनर्नियुक्तिमुद्दिश्याधिकृता यदसूसुचन् ।
तेनैव वर्त्मना सत्यं वर्तितव्यं मयाऽधुना ॥ २ ॥

अप्रैलसञ्ज्ञके मासे विश्वविद्यालये भवेत् ।
अवकाश इहत्ये तच्छक्यं दिल्लीपुरीं प्रति ॥ ३ ॥

ममागमनमेतेन यथाविधि भवेद् ध्रुवम् ।
कार्यमित्येव सङ्कल्प्य तथाऽहं कर्तुमुद्यतः ॥ ४ ॥

रामकीर्तिमहाकाव्यं मुद्र्यते साम्प्रतं प्रियाः !
अवस्थितिस्तदर्थं मे कश्चित्कालमिहोचिता ॥ ५ ॥

निरुह्य तत्प्रियं कार्यं तदेकाग्रेण चेतसा ।
भवद्भिः सह सङ्गंस्ये तद्धि प्रियतमं मम ॥ ६ ॥

अत्र ग्रीष्मप्रभावो हि सुतरां परिलक्ष्यते ।
अत्युष्णा वायवो वान्ति लोकस्य भृशदुःखदाः ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अन्ते त्वप्रैलमासस्य ग्रीष्मर्तूपरमो भवेत् ।
तदा प्रारप्स्यते तात ! प्रावृट्कालोऽति सौख्यदः ॥ ८ ॥

आम्राणि नैकरूपाणि साम्प्रतं पण्यवीथिषु ।
विकर्षन्ति नृणां चेतो रस्यानि मधुराणि च ॥ ९ ॥

अन्यान्यपि फलान्यत्रादृष्टपूर्वाणि भारते ।
ग्रीष्मर्तोरनुकूलानि दृश्यन्ते पण्यवीथिषु ॥ १० ॥

आम्लं[१] च मधुरं चापि मङ्कुटाख्यं विशेषतः ।
समस्तेषु फलेष्वत्र सत्यमेव नृपायते ॥ ११ ॥

"आयोडीन" गुणाढ्यं तत्स्वादं स्वादं विलक्षणम् ।
मुकुटस्याकृतिं बिभ्रद्रसना सरसायते ॥ १२ ॥

मङ्कुटो मुकुटस्यैवापभ्रंशो नात्र संशयः ।
अनेके भारतीशब्दा गृहीता थाइभाषया ॥ १३ ॥

वंशवद्वंशशब्दोऽस्ति यथा सादृश्यमूलकः ।
तथैव शब्दोऽयमपि ध्रुवं सादृश्यमूलकः ॥ १४ ॥

फलेष्वन्येषु 'लुकङो' इत्याख्यमपरं फलम् ।
अन्तर्लीचीसमं तावद् भिन्नं तु बहुशो बहिः ॥ १५ ॥

थुर्यन्नामाऽपरं तात ! फलमत्राभिलक्ष्यते ।
तीव्रो गन्धो यदीयो नो नो रोचेत कथञ्चन ॥ १६ ॥

स्वादुङ्कारमिहत्यास्तु फलं तन्नाम भुञ्जते ।
अतीव रुच्यं तत्तेषां लोको भिन्नरुचिर्यतः ॥ १७ ॥

---

१. आ+ अम्लम् = ईषदम्लम् = आम्लम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२४.५.१९९० दिनाङ्के बैंकाकतो डा० कृष्णलालमहाभागान् प्रेति प्रेषितं पत्रम्

प्रिया डा० कृष्णलालमहाभागाः,
सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

चिराय कुशलोदन्तं भवतां नाप्नुवन्नहम् ।
चिन्तयाऽऽचान्तचित्तोऽस्मि दूरस्थः स्नेहयन्त्रितः ॥ १ ॥

अपि स्तो भवतां कच्चिद् योगक्षेमावनारतम् ।
कच्चित्कुटुम्बे सर्वोऽपि जनोऽस्ति कुशली प्रिय ? ॥ २ ॥

तपोऽपि वर्धते कच्चित्कच्चित्काव्यक्रिया तथा ।
स्वाध्यायोऽधीयते चापि कच्चित्सद्भिर्निरन्तरम् ॥ ३ ॥

विगतायां मया दृष्टो भवद्विषयको निशि ।
दुःस्वप्नो येन वृत्ता मे चिन्ता चित्तार्तिकारिणी ॥ ४ ॥

प्रार्थये देवताः सर्वा भवत्कल्याणकामुकः ।
प्रयुञ्जे स्वस्तिवाचश्च नैकशः स्वस्तिकाम्यया ॥ ५ ॥

अनिष्टं कल्पये किञ्चिद् भवतां न मनागपि ।
अतिस्नेहो ममैवायं पापशङ्की भवत्सु यः ॥ ६ ॥

राजन्तां सर्वथा स्वस्था मोदमानाः स्वके दमे ।
वर्धमानाः श्रियेत्येषा भवत्स्वाशीः प्रयुज्यते ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(उपजातिवृत्तम्)

ग्रीष्मप्रकोपः कलयाऽत्र शान्तिं
गतोऽस्ति शान्तिं जनयञ्जनेषु ।
साभ्रं नभो वाति च शीतवातो
वर्षा इहातिप्रकटप्रकर्षाः ॥ ८ ॥

हरीतिमा नेत्रविलोभनीयो
गुल्मेषु वृक्षेषु लतासु चापि ।
सर्वस्य भूयो मुदमातनोति
घर्मार्तिहारित्ववशाज्जनस्य ॥ ९ ॥

क्वचिद्यदा नाम सहस्ररश्मि-
र्घनावलीमध्यत आविरस्ति ।
तदास्य तापः सुतरामसह्यः
स्वदेशवद्देश इहापि भाति ॥ १० ॥

यद् भ्रातृजायाभिरुदीरिताः प्राग्
भवद्गृहेऽत्रागमनाय वाचः ।
किं कल्पितं ता अनुरुध्य तात !
समस्तमावश्यकसंविधानम् ? ॥ ११ ॥

(इन्द्रवज्रावृत्तम्)

काव्यस्य जातं खलु थाइभाषा-
रूपान्तरं सम्प्रति मुद्रणाय ।
तत्सज्जमास्ते नचिरेण मन्ये
सम्पन्नता तस्य भवेदवश्यम् ॥ १२ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(उपजातिवृत्तम्)

कार्यं महत्तेन समाप्तिमेता
मया कृतं घोरपरिश्रमेण ।
श्रान्तोऽप्यहं तेन नवो भवेयं
क्लेशः फलेनातनुते नवत्वम् ॥ १३ ॥

शुभाभिलाषुकः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१५.६.१९९० दिनाङ्के बैंकाकतो डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रियेभ्यो डा० कृष्णलालमहाभागेभ्यः स्वस्ति ।

(अनुष्टुब्वृत्तम्)

अवाप्य कुशलोदन्तं बहुकालेऽपि निर्गते ।
भवतामस्मि सुतरामुद्वेगाक्रान्तचित्तकः ॥ १ ॥

भवतां कुशलं ध्यायन् प्रभोश्चरणयोरहम् ।
भवतां मङ्गलं तात ! तमहर्निशमर्थये ॥ २ ॥

थाइरूपान्तरं जातं काव्यस्येत्यधुना भवेत् ।
प्रारब्धं मुद्रणं तस्य यत्र मासो व्यपेक्षितः ॥ ३ ॥

जुलैमासावसाने स्यात्तत्प्रकाशनसम्भवः ।
मुद्रणेऽधिकृता एवं जना मां प्रत्यपीपदन् ॥ ४ ॥

समाप्ते मुद्रणेऽपि स्याद् बन्धने समयोऽधिकः ।
ग्रन्थस्य क्षपितः प्राहुरित्येवं तेऽधिकारिणः ॥ ५ ॥

अतः प्रतीक्षमाणोऽहं स्थितोऽत्र व्यग्रमानसः ।
कथं दिल्ल्यां मया कालेनोपस्थेयं भवेदिति ॥६ ॥

कार्यभारो महानेष नियत्या पातितो मयि ।
तस्य सम्यग्विनिर्वाहो नैकदृष्ट्योचितो मतः ॥ ७ ॥

श्रीरामकीर्तिमाश्रित्य प्रणीतं बहुयत्नतः ।
बृहत्तरमिदं काव्यमत्रत्येभ्योऽपि रोचते ॥ ८ ॥

महाराजकुमार्यस्य थाइदेशस्य धीमती ।
हृद्यमर्थ्यं प्रशस्यं च पुरोवाकं व्यरीरचत् ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भारते थाइदेशे च स्नेहसेतुनिबन्धनम् ।
भवेदनेन काव्येन मतिरेषाऽत्र धीमताम् ॥ १० ॥

कार्यं परिसमाप्यैव सर्वमेतन्निबन्धनम् ।
प्रस्थातव्यं मयेतः स्यादित्यत्रत्यमतं मतम् ॥ ११ ॥

तदेव मनसि ध्यात्वा कार्याकार्यविवेचने ।
प्रवृत्तिमान् भविष्यामीत्येतदत्र वचो मम ॥ १२ ॥

(इन्द्रवज्रावृत्तम्)

द्वीपोत्तमे मारिशसाह्वये स्या-
दगस्त्यमासे सुतरां विशालम् ।
श्रीरामगाथामवलम्ब्य विद्वत्-
सम्मेलनं यत्र निमन्त्रितोऽस्मि ॥ १३ ॥

(उपजातिवृत्तम्)

ज्ञात्वा शुभं वृत्तमिदं भवद्भ्यो
द्रुतं सुतो मे समसूसुचन्माम् ।
येन प्रजातो मनसि प्रमोदो
शक्यो न यो वर्णयितुं गिरौघैः[1] ॥ १४ ॥

सत्सङ्गतिः पुण्यवशेन सत्यं
सञ्जायते दिव्यसुखप्रदात्री ।
उपार्जितान्येव मया भवेयुः
पुण्यानि सत्यं जननान्तरेषु ॥ १५ ॥

१. आबन्तोऽत्र गिर् शब्दो गृहीतः । गिराणाम् ओघः गिरौघः तैः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नानाऽस्फुटाः शास्त्रचयेऽतिगूढास्
तया स्फुटाः स्युर्विषया अतीव ।
विपश्चिदुद्धैः[1] सह तात ! चर्चा
प्रवर्तिता ज्ञानचयं तनोति ॥ १६ ॥

१. उद्धैः= तल्लजैः। प्रकाण्डमुद्धतल्लजावित्यमरः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दिल्लीतः श्रीदुर्गादत्तशास्त्रिणः प्रति १६.६.१९९० दिनाङ्के प्रेषितं पत्रम्

मान्याः महाकवयः,
सप्रश्रयं विलसन्तु मे प्रणामाञ्जलयः ।

(अनुष्टुब्वृत्तम्)

भवत्पत्रस्य लब्धस्य कालो बहुतिथो गतः ।
इच्छन्नप्यशकं तस्य प्रहेतुं नाहमुत्तरम् ॥ १ ॥

तत्कृतेऽहं क्षमां याचे भवतो विद्वदुत्तमान् ।
क्षन्तव्योऽहं कृतागस्कः क्षमाशीला हि साधवः ॥ २ ॥

गरीयान् कार्यभारोऽत्र तं वहामि कथञ्चन ।
अनिच्छतोऽपि मे विज्ञाः ! प्रमादो जायते यतः ॥ ३ ॥

वियोगवल्लरीं पाठं पाठं तृप्तिं न याम्यहम् ।
शीतलेनापि बलवत्तृषार्तो वारिणा यथा ॥ ४ ॥

स्वयमेव सतां चेतः सञ्जायेत तदुन्मुखम् ।
'नहि कस्तूरिकामोदः शपथेन विभाव्यते' ॥ ५ ॥

अन्तःप्रेरणया जातं काव्यं स्वाभाविकं मतम् ।
रञ्जयेत्सुतरां चेतस्तत्कवित्वविदां ध्रुवम् ॥ ६ ॥

नाद्यत्वे सन्ति भूयांसो जना एतद्विधा भुवि ।
कविकर्मसुमर्मज्ञा ये स्युस्तत्राभियोगिनः ॥ ७ ॥

स्वस्मान् मात्सर्यमुत्सार्य ग्राह्यग्रहणतत्पराः ।
दोषज्ञा अपि दोषैकदृष्टयः सन्ति नैव ये ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अल्पीयांसस्तु ये सन्ति विशुद्धहृदया भुवि ।
तदर्थमेव कवयः कवयन्ति रसोद्धुराः ॥९ ॥

(उपजातिवृत्तम्)

स्वान्तःसुखं यद्यपि मूलमस्ति
काव्यक्रियायां स्वमनःप्रियायाम् ।
तथाऽपि विद्वज्जन-कीर्तिकाम्या-
रूपोऽपरो हेतुरिह प्रकल्प्यः ॥१० ॥

सर्वैरपि प्रार्थ्यमिहावदातं
विदग्धगोष्ठीषु यशो गरीयः ।
हेतोरतस्ते रचयन्ति काव्यं
रसोत्तरङ्गं रसिकार्चनाय ॥११ ॥

श्रीरामगाथामवलम्ब्य विज्ञा !
विशालकाव्यं रचितं मयाऽपि ।
रम्यैरुपाख्यानवरैरुपेतं
थाइप्रदेशे सुतरां प्रसिद्धैः ॥१२ ॥

रामैकवृत्तं तदनेकवृत्तं
श्रोत्रैकपात्रं तदनेकपात्रम् ।
लङ्कानलङ्कारमलङ्कृतं सत्
सदा सदानन्दकरं भवेन्नु ॥१३ ॥

परस्सहस्राणि विभान्ति तस्मिन्
पद्यान्यसामान्यतयोद्गतानि ।
स्वान्तःसुखायैव विनिर्मितानि
न त्वेव लोके कविकीर्तिलोभात् ॥१४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तन्मुद्रणं सम्प्रति जायतेऽत्र
यत्पूर्णतामेष्यति शीघ्रमेव ।
सम्प्रेषयिष्यामि तदा तदात्म-
बन्धुभ्य आनन्दभृतान्तरङ्गः ॥ १५ ॥

दृक्पातमात्रेण भवन्त एतत्
सम्भावयेयुर्यदि कोविदाग्र्याः ।
फलेग्रहिः स्यान्मम यत्नपूग-
स्तत्रैव सत्यं कृतकृत्यता मे ॥ १६ ॥

सुखेन कालं गमयामि विज्ञा !
अहं स्थितो रम्यतमेऽत्र देशे ।
स्वान्तःसुखार्थं सुतरां प्रसक्तो
रात्रिन्दिवं काव्यनिबन्धनायाम् ॥ १७ ॥

तत्रैव तोषं परमाप्नुवेऽहं
न मेऽस्ति किञ्चित् करणीयमन्यत् ।
स्वाध्याय एवास्ति तपो मदीयं
निरन्तरं यत्र ममाभियोगः ॥ १८ ॥

स्वास्थ्यं न मे यद्यपि सम्यगस्ति
शरीरकार्श्यं च विभाव्यते मे ।
व्यापारयाम्येव तथाप्यजस्रं
स्वं काव्यशास्त्राभ्यसनक्रियायाम् ॥ १९ ॥
तदेकमात्रव्यसनोऽहस्मि
तत्रैव मे तुष्टिकरो विनोदः ।
तत्रैव नित्यं निरतोऽहमायुः-
शेषं सुखी यापयितास्मि नैजम् ॥ २० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

विद्वज्जनानामहमाशिषोऽत्र
सम्प्रार्थये तद्बलसम्प्रणुन्नः ।
आराधना संस्कृतवाङ्मयस्य
प्रवर्ततां मे मनसोऽनुकूला ॥ २१ ॥

सत्यव्रतोऽहं मम सत्यमेव
गीर्वाणवाण्या व्रतमस्तु सेवा ।
तदर्थमेवाखिलमर्पयेय
स्वं जीवितं स्वं यदुपार्जितं च ॥ २२ ॥

इत्येव सङ्कल्पमहं दधीय
जन्म स्वकीयं विदधीय चापि ।
कृतार्थमित्याशिषमद्य याचे
विपश्चितां कामदुघा मताऽऽशीः ॥ २३ ॥

(अनुष्टुब्वृत्तम्)

स्वकीयः कुशलोदन्तो न चिरात्प्रेष्यतामिति ।
साञ्जलिर्विनिवेद्याहं स्वां वाचमुपसंहरे ॥ २४ ॥

भवद्गुणगणावर्जितहृदयः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१६.६.१९९० दिनाङ्के बैंकाकतो पुरीक्षेत्रस्थान् डा० सदानन्ददीक्षितमहाभागान् प्रति प्रेषितं पत्रम्

प्रियेभ्यो डा० दीक्षितमहाभागेभ्यः स्वस्ति ।

(अनुष्टुब्वृत्तम्)

जूनमासश्चतुर्थेऽह्नि पुरीतः प्रेषितं दलम् ।
भवतामहमासाद्य सन्तोषं परमश्नुवे ॥ १ ॥

वृत्तजातमतो ज्ञातं न्यक्षेण परिसूचितम् ।
विलम्बेनोत्तरे चापि हेतुर्ज्ञातोऽनुपस्थितिः ॥ २ ॥

लोकभाषाकार्यवशात्पुरीक्षेत्रेऽतिपावने ।
व्यस्तानां चिररात्राय भवतां दृढचेतसाम् ॥ ३ ॥

संस्कृतस्य प्रचारो नः सर्वेषामप्यभीप्सितः ।
तथाऽप्यपेक्षितस्तस्मिन्नुद्योगो नोऽभिलक्ष्यते ॥ ४ ॥

अर्चयामो वयं विज्ञा ! वाङ्मात्रेणैव संस्कृतम् ।
न च व्यापारयामः स्वं तत्प्रचारे कथञ्चन ॥ ५ ॥

कुर्वाणा गुरु तत्कार्यं कार्यान्तरमनाश्रिताः ।
धन्यकोटिं जगत्त्रय्यामाटीकन्ते भवद्विधाः ॥ ६ ॥

अभिनन्दामि सुतरामाशीर्भिर्वर्धयामि च ।
प्रार्थये चापि साफल्यं भवतां पुरुषोत्तमम् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

स्यात्समावर्तनविधिः सम्पन्नो यावता भवेत् ।
तावता पत्रमेतत्स्याद् भवद्धस्तगतं ध्रुवम् ॥८॥

अलङ्कृता भवन्तः स्युर्विद्यावारिध्युपाधिना ।
चिराय मम चित्तेऽभूदेष सङ्कल्प आहितः ॥९॥

स एष पूर्णतां यातोऽतीवानन्दकरो मम ।
उत्कर्षाद् भवतामन्यत्किं मे प्रियतरं भवेत् ? ॥१०॥

सदा स्वस्थास्सदा तुष्टास्सदा च यशसाऽन्विताः ।
भवन्तः संस्कृतात्मानो लभन्तां पुरुषायुषम् ॥११॥

रामकीर्तिमहाकाव्यं रचितं यन्मयाऽभवत् ।
तदल्पेनैव कालेन दिष्ट्या प्राकाश्यमेष्यति ॥१२॥

पञ्चविंशतिसर्गं तद् बृहत्तरकलेवरम् ।
नानावृत्तोपरचितं नानाऽलङ्कारभूषितम् ॥१३॥

नानारसाढ्यं मधुरं नानोपाख्यानभूषितम् ।
परस्सहस्रपद्यालिविराजितमनुत्तमम् ॥१४॥

वितनिष्यति सन्तोषं विदुषामिति मे मतिः ।
त एव सम्यग्जानीयुर्विद्वज्जनपरिश्रमम् ॥१५॥

(तोटकवृत्तम्)

सदयाः कलयाऽपि कृतिं यदि मे
विबुधाः कलयन्ति कलामिव खे ।
शशिनो रुचिरां ननु तर्हि भवेन्
मम काव्यकृतौ रुचिरारचिता ॥१६॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(मालिनीवृत्तम्)

सहृदयहृदयानां तोषमेषा विदध्याद्
यदि ननु कलयाऽपि स्याच्छ्रमः सार्थको मे ।
वितरति यदि सौख्यं पान्थवृन्दाय वृक्षो
भवति सुभृशमेतत्सार्थकत्वं तदैव ॥ १७ ॥

(अनुष्टुब्वृत्तम्)

स्वकीयः कुशलोदन्तः प्रेषणीयो यदा कदा ।
इत्येवोक्त्वा समासेन गिरं स्वामुपसंहरे ॥ १८ ॥

सदा भवन्मङ्गलाभिलाषी
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१३.९.१९९० दिनाङ्के बैंकाकतो डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम् ।

प्रिया डा० कृष्णलालमहाभागाः
नैकाः शुभाशिषः ।

(अनुष्टुब्वृत्तम्)

औपचारिकपत्रेण सत्रेदं प्रेष्यते मया ।
पत्रं तत्र प्रवर्त्यं स्याद्यथाविधि यथामति ॥ १ ॥

भवद्भिः सद्भिरित्येतद्वचः सामासिकं मम ।
विषयेऽत्र नहि व्यासो विदुषामीप्सितो भवेत् ॥ २ ॥

सांस्कृतिक्या परिषदा स्वीकृते प्रार्थने मम ।
अल्पेन समयेनाहं दिल्लीं प्रतिगतो मुदा ॥ ३ ॥

सङ्गन्ताहे भवद्भिर्द्राक् लब्धाहे च सुखं ततः ।
सङ्ग इष्टैर्जनैः सत्यमुत्सवायैव केवलम् ॥ ४ ॥

अश्रुपूर्णेक्षणा अत्र सर्वे मे सहयोगिनः ।
मद्वियोगातुरास्ते हि स्निह्यन्ति सुतरां मयि ॥ ५ ॥

प्रेरयन्ति च मां नित्यं भूयोऽवस्थितये दृढम् ।
नाहं शक्तश्च तत्कर्तुं प्रेर्यमाणोऽपि भूरिशः ॥ ६ ॥

आसन्नषष्टिवर्षोऽहं रुजाक्रान्तश्च भूयसा ।
विक्लवो गात्रयष्ट्या च श्रमायस्तेन्द्रियस्तथा ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अतो निवस्तुमिच्छामि स्वजनेष्वेव केवलम् ।
आयुःशेषं च तेष्वेवेच्छामि यापयितुं सुखम् ॥ ८ ॥

निविवृत्सा ततस्तात ! दिल्लीं प्रति बलीयसी ।
तयैव सम्प्रणुन्नः संस्तां प्राप्तास्म्यचिरादहम् ॥ ९ ॥

आशासे सकुटुम्बाः स्युर्भवन्तः कुशलान्विताः ।
कुशलं भवतां सर्वविधं प्रियतमं मम ॥ १० ॥

(उपजातिवृत्तम्)

वर्षर्तुवेगोऽत्र भृशं प्रवृद्धो
मेघावृतं तेन नभो विशालम् ।
हरीतिमा नेत्रविलोभनीयः
सौख्याकरो दृष्टिपथं प्रयाति ॥ ११ ॥

घर्मस्य लेशोऽपि न लक्ष्यतेऽत्र
मन्दाः सुखा वान्ति च वर्षवाताः ।
अनेकवर्णाढ्यविकस्वराब्ज-
पूर्णाः सरस्यो मुदमावहन्ति ॥ १२ ॥

शेषं पुनः

भवद्गुणगणावर्जितहृदयः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पण्डितदुर्गादत्तशास्त्रिणः प्रति दिल्लीतः ७.१०.१९९० दिनाङ्के प्रेषितं पत्रम्

मान्या महाकवयः,

सप्रश्रयमभिवादये ।

(अनुष्टुब्वृत्तम्)

भवत्पत्रेण रम्येण सद्यः प्राप्तेन चेतसि ।
यो नाम जनितो हर्षस्स तु वाचामगोचरः ॥ १ ॥

भवन्तः कविमूर्धन्या नानाशास्त्रविशारदाः ।
नानाकाव्यप्रणेतारो नानाविद्वदभिष्टुताः ॥ २ ॥

भवद्भिः स्नेहबन्धेन बद्धां पद्यावलीमहम् ।
पाठं पाठं न तृप्यामि तद्रसास्वादनेच्छुकः ॥ ३ ॥

मासान्ते मे भवेद्विज्ञा भारतागमनं शुभम् ।
सङ्गः स्वदेशजैश्चापि भृशं प्रीतिकरो मम ॥ ४ ॥

तदैव प्रयतिष्येऽहं भवत्काव्यकृते ध्रुवम् ।
काव्यस्य तस्य संमानः सुतरामीप्सितो मम ॥ ५ ॥

स्वे देशे स्थितिमत्येव मयि स्यात्तस्य सम्भवः ।
विद्वांसो बोधनीयाः स्युस्साक्षात्तद्गुणसन्ततिम् ॥ ६ ॥

अत्रत्यानि हि कार्याणि समापयितुमुत्सुकः ।
नक्तन्दिवमहं मान्याः श्राम्याम्येव कृशोऽपि सन् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मन्ये कालेन कियताऽप्यवसाय्याखिलं गुरु ।
कृत्यजातं निवर्तिष्ये कृतकृत्यो मुदान्वितः ॥ ८ ॥

दिल्लीसङ्केतमास्थाय कोविदाग्र्यैरतः परम् ।
पत्रं देयं भवद्भिः स्यादित्येषा प्रार्थना मम ॥ ९ ॥

विद्वद्वृन्दारकेषु
विनीतस्य
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकतो डा० सदानन्ददीक्षितमहाभागान् प्रति ८.१०.१९९० दिनाङ्के प्रेषितं पत्रम्

स्वस्ति सकुटुम्बेभ्यो डा० दीक्षितमहाभागेभ्यः ।

(अनुष्टुब्वृत्तम्)

चिरायोदीक्षितं पत्रं सम्प्राप्य हृदये मम ।
प्रवाहितोऽभूत्प्रबलोऽनिर्वाच्यो मोदनिर्झरः ॥ १ ॥

लोकभाषाप्रचारार्थं सततोद्योगमास्थिताः ।
अविचार्य किमप्यन्यच्छ्लाघ्याः सत्यं भवादृशाः ॥ २ ॥

उद्योगो भवतामेष भवेत्कामं फलग्रेहिः ।
प्रार्थये श्रीजगन्नाथमेतदर्थं कृताञ्जलिः ॥ ३ ॥

कार्यमत्रत्यमचिरात्समापय्य सुविस्तृतम् ।
निवर्तिताहे मासान्ते ममैषोऽस्ति विनिर्णयः ॥ ४ ॥

षष्टिर्वर्षाणि पूर्णानि मयेतः परमायुषः ।
शेषः स्वदेश एव स्याद्याप्य इत्येव मे मतिः ॥ ५ ॥

गमितो नैकदेशेषु कालो बहुतिथो मया ।
अतः परं निवस्तुं मे स्वदेशेऽस्ति मनोरथः ॥ ६ ॥

रामकीर्तिमहाकाव्यं प्रसिद्धिं समुपागमत् ।
गते मासे परां तुष्टिं तन्मे चेतस्यचीक्लृपत् ॥ ७ ॥

पञ्चविंशतिसर्गैस्तन्निबद्धमति विस्तृतम् ।
रमणीयकथायुक्तमति रम्यकलेवरम् ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

विद्वत्प्रवेकैरत्रत्यैः सुतरामभिन्दितम् ।
परस्सहस्त्रैः पद्यौघै रस्यै रसिकरञ्जनम् ॥ ९ ॥

दिल्लीं प्राप्तः प्रहेतास्मि तद् भवत्स्वप्यसंशयम् ।
तद्दर्शनीयमन्यानप्येतदत्र वचो मम ॥ १० ॥

वर्षाकालः समाप्तिं स्यादुपेतो भारते ध्रुवम् ।
अत्र त्वेतद्विपर्यासः सुतरां परिलक्ष्यते ॥ ११ ॥

दिनद्वयात्प्राक् सञ्जाता धारासारैर्निरन्तरा ।
वृष्टिर्येन जलाप्लावः प्रादुरासीदनर्थकृत् ॥ १२ ॥

मार्गा वीथ्यः प्रतोल्यश्च सर्वा आप्लावमज्जिताः ।
यातायाते अभूतां यद्वशाद्रुद्धे समन्ततः ॥ १३ ॥

अन्यत्तु सर्वमत्रत्यं शिवं पुर्यामपीदृशम् ।
स्यादित्येवेति कलयन् स्वां वाचमुपसंहरे ॥ १४ ॥

पुनश्च -

वाच्या मद्वचसा प्रेष्ठा वधूर्नैका ममाशिषः ।
आशीर्भिर्वर्धनीयाश्च तिस्रोऽपि खलु कन्यकाः ॥ १५ ॥

पित्रोश्चरणयोश्चापि ममातीवाभिवन्द्ययोः ।
मम प्रणामपर्यायो विनिवेद्यो मुहुर्मुहुः ॥ १६ ॥

दासोपाह्वा भद्रकस्थाश्चिकित्सकधुरन्धराः ।
प्रणामं मे निवेद्याः स्युः कुशलप्रश्नपूर्वकम् ॥ १७ ॥

सदा भवदभ्युदयाभिलाषुकः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शर्मण्यदेशस्थपायरमहाभागान् प्रति बैंकाकतः २३.१०.१९९० दिनाङ्के प्रेषितं पत्रम्

प्रियायै श्रीमत्यै मार्गरीटायै श्रीपायराय च स्वस्ति ।

(द्रुतविलम्बितवृत्तम्)

दलमवाप्य भवत्प्रहितं शुभं
मनसि मोदभरो नहि माति मे ।
बहुतिथात्समयात्समवाप्य मे
कुशलवृत्तमभूद्धृदि निर्वृतिः ॥ १ ॥

स्थितिमहं कलयामि तु यद्यपि
न निकटे भवतो मम संमताम् ।
सततमङ्गलचिन्तनतत्परो-
निकट एव हृदा भवतस्त्वहम् ॥ २ ॥

अथ बहुः समयो वसतोऽत्र मे
जिगमिषामि ततो भृशमुत्सुकः ।
निजभुवं जननीमिव मे प्रियां
तदनुरागभृतेन हृदा हृतः ॥ ३ ॥

वपुषि मे कृशता परिलक्ष्यते
शिथिलताऽपि च तज्जनिताऽशतः ।
अपि जराकृतविक्लवतावशा-
दनुभवो मम सम्प्रति तादृशः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

स्वजनमध्यगतोऽपगतश्चिरात्
परिणतो वयसाऽपि हृदा सुखी ।
समवशेषमहं निजमायुषो
गमयितास्मि[१] प्रभुस्मरणे रतः ॥५ ॥

अथ कथं भवता व्यतियाप्यते
स्वसमयः कथनीयमिदं द्रुतम् ।
बलवदस्ति कुतूहलमत्र मे
तदचिराद् भवता परिशाम्यताम् ॥६ ॥

ननु भवद्भुवि शीतविडम्बना
शरदृतूज्जनिता प्रकटा भवेत् ।
हिमहतो मलिनो मुकुरो यथा
दिनकरोत्थकरप्रकरो भवेत् ॥७ ॥

इह पुनर्विपरीतमिवास्ति यद्
उपगमेऽपि ऋतोः शरदो नभः ।
परिवृतं जलदैरवलोक्यते
जलभृतैर्द्विरदोपमकान्तिभिः ॥८ ॥

चपलयाऽपलया निखिला दिशः
परिवृतास्तमसाऽपि निरन्तरम् ।
प्रवहति प्रबलाऽनिलसंहतिः
प्रलयघोषसमश्च घनारवः ॥९ ॥

प्रवहदम्बुरया सकला स्थली
परुषनिःस्वनजीवचयास्तृता ।
विकललोचनलोकविलोकिता
नयनयोरयनं परिगच्छति ॥१० ॥

१. 'हे प्रे वा' इत्याश्रित्य प्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अथ कदा शममेष्यति वर्षणं
जन इहेति भृशं विकलोऽधुना ।
स्वसमयं समयोचितसाधनैः
कथमपि प्रवियापयतेऽस्थिरः ॥ ११ ॥

(अनुष्टुब्वृत्तम्)

दिनैः कतिपयैरेव सामान्या सम्भवेत् स्थितिः ।
इत्याशाऽत्र जनस्यास्ते ह्याशा बलवती मता ॥ १२ ॥

संस्कृतेनैव पत्रस्य मदीयस्यास्य सत्वरम् ।
प्रहेयमुत्तरं विद्वद्वरेण भवतेत्यहम् ॥ १३ ॥

सम्प्रेर्य समनुध्याय कुशलं भवतस्तथा ।
बुभुत्सुर्भवतो वृत्तं स्वां वाचमुपसंहरे ॥ १४ ॥

भवद्बन्धुः
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरात् २०.११.१९९० दिनाङ्के डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया डा० कृष्णलालमहाभागाः, स्वस्ति

(अनुष्टुब्वृत्तम्)

विभागाध्यक्षया विद्वद्वरया रचितं दलम् ।
दलेनानेन सत्रैव भवद्भ्यः प्रेषये द्रुतम् ॥ १ ॥

विश्वविद्यालयोऽत्रत्यो देववाण्यनुरागतः ।
काङ्क्षत्यवस्थितिं मेऽत्र मासमेकं बुधोत्तमाः ॥ २ ॥

आग्रहः प्रबलस्तत्र सर्वेषामिति किं ब्रुवे ।
देशेऽत्र संस्कृतप्रेमा वर्धेतेति प्रियं मम ॥ ३ ॥

संस्कृतप्राणभूतानां भवतामपि तत्तथा ।
तदेतत्पत्रविषये कार्यं कार्यं यथाविधि ॥ ४ ॥

अनुरुध्यैतदेवाहमनुध्याय च मङ्गलम् ।
भवतां सकुटुम्बानां वाचं स्वामुपसंहरे ॥ ५ ॥

भवद्गुणगणावर्जितहृदयः

सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरात् २०.१२.१९९० दिनाङ्के डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया डा० कृष्णलालमहाभागाः,

स्वस्ति सकुटुम्बेभ्यो भवद्भ्यः ।

(अनुष्टुब्वृत्तम्)

पत्रेणानेन सत्रैव पत्रं सम्प्रेषये द्रुतम् ।
संयुक्तकुलसचिवमहाभागाय, तम्प्रति ॥ १ ॥

अविलम्बेन तत्प्रेर्यं कार्यसिद्धिर्भवेद्यतः ।
कार्याण्येतद्विधान्याशु कार्याणीत्येव मे मतिः ॥ २ ॥

जन्वरीमासषष्ठेऽहं दिने प्राप्तास्मि देहलीम् ।
भारतीयविमानेन व्यवस्था तादृशी मम ॥ ३ ॥

सप्तमेऽहनि विश्रम्य किञ्चित्स्वस्थमना अहम् ।
विश्वविद्यालये कार्यं प्रारप्स्ये ह्यष्टमे ध्रुवम् ॥ ४ ॥

अवकाशेन कार्यस्य विष्टम्भ इति चिन्तयन् ।
विज्ञास्तदनुसारेण प्रक्रान्तुमहमुद्यतः ॥ ५ ॥

अल्पैरेव दिनैस्तात ! सङ्गमो नौ भवेन्ननु ।
चिरायोदीक्षितः सत्यं सर्वथा नौ प्रियङ्करः ॥ ६ ॥

प्रैषणीं त्वरमाणोऽहं विनिवेद्यैतदञ्जसा ।
भवच्छुभं सदा ध्यायन् स्वां वाचमुपसंहरे ॥ ७ ॥

भवद्गुणगणावर्जितहृदयः

सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२६.४.१९९१ दिनाङ्के बैंकाकनगराद् दिल्लीस्थदेववाणीपरिषत्सचिवान् डा० रमाकान्त-शुक्लमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया बन्धुवर्याः,
सस्नेहाशिषः ।

(अनुष्टुब्वृत्तम्)

मासस्याप्रैलसञ्ज्ञस्य द्वितीयेऽह्नि समागतः ।
बैंकाकनगरं रम्यं थाइदेशनिमन्त्रणात् ॥ १ ॥

दिनेऽस्मिन्नेव षट्त्रिंशद्धायना समजायत ।
थाइराजस्य दुहिता महाचक्रीति विश्रुता ॥ २ ॥

अभिलक्ष्य तदेवात्र थाइसंस्कृतिपोषकाः ।
आयोजयन्महोत्साहादन्तरराष्ट्रियोत्सवम् ॥ ३ ॥

रुचिं रामायणे राजकुमार्या अभिलक्ष्य ते ।
उत्सवं तद्विषयकं कल्पयाञ्चक्रिरे मुदा ॥ ४ ॥

रामायणस्य पुण्यस्य यत्र यत्र प्रवर्तते ।
प्रचारस्ते सनिर्बन्धं देशं तं तं न्यमन्त्रयन् ॥ ५ ॥

स्वस्मिन् स्वस्मिन् यथा देशे स्वरूपं प्रविलोक्यते ।
रामायणस्य तत्तेऽत्र दर्शयेयुरति स्फुटम् ॥ ६ ॥

एतदर्थं बुधा नैके षड्देशेभ्यो निमन्त्रिताः ।
रामायणं स्वदेशीयं त उपस्थापयन्त्विति ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सङ्घाः कुशीलवानाञ्च कुशलानां निमन्त्रिताः ।
रामायणप्रयोगाय स्वस्वशैल्यनुसारतः ॥ ८ ॥

प्राह्णे प्रवर्तते चर्चा रामायणकथाविदाम् ।
रामायणकथां यत्र ते स्वदेश्यां विवृण्वते ॥ ९ ॥

तन्मर्मोद्घाटकांल्लेखान्प्रयत्नलिखितान्हि ते ।
एकैकशो वाचयन्ति बुधैरन्यैरभिष्टुताः ॥ १० ॥

प्रत्येकं दिवसे तावत्तृतीये लेखवाचनम् ।
भवत्विति क्रमस्तावदधिकारिभिराश्रितः ॥ ११ ॥

अपराह्णे प्रयोगं स्वं सोदाहरणकं शुभम् ।
व्याख्यान्त्यबुधबोधार्थं नानादेशकुशीलवाः ॥ १२ ॥

सायं च ते स्वदेशीयं प्रयोगकुशला भृशम् ।
रामायणं स्थिता रङ्गे कौशलेन प्रयुञ्जते ॥ १३ ॥

परीतोषश्च मोदश्च येन सञ्जायते महान् ।
सामाजिकानां सर्वेषां कश्चिद्वाचामगोचरः ॥ १४ ॥

म्यांमारो भारतं वर्षं लाओसो मलयेशिया ।
हिन्देश्या थाइदेशोऽत्र देशषट्को निमन्त्रितः ॥ १५ ॥

मुदे पराया अस्त्येव तत्तज्जनसमागमः ।
दृढं रामकथासूत्रं तेषां मर्माणि सीव्यति ॥ १६ ॥

परस्परेण सम्बन्धस्तेषामतिहितावहः ।
चर्चाप्रसङ्गे तेऽन्योन्यं बुध्यन्ते विषयान् बहून् ॥ १७ ॥

स्थिता एकत्र ते गेहे नानादिग्भ्यः समागताः ।
मित्रभावेन सन्धिं च सप्रीतिं चापि कुर्वते ॥ १८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रवर्तयन्तस्तत्रापि रामगाथाश्रितां कथाम् ।
प्रदर्शयन्ति ते स्वस्य ज्ञानस्योपार्जने रुचिम् ॥ १९ ॥

पुमांस एव नैवात्र योषितोऽपि समागताः ।
सर्वेऽपि कुशलास्तात ! नृत्ये चाभिनये तथा ॥ २० ॥

स्वशास्त्रमनुरुध्यैव स्वां कलां दर्शयन्ति ते ।
नहि तत्र विपर्यासः सूक्ष्मोऽपि परिलक्ष्यते ॥ २१ ॥

प्रयोगे रामगाथायाः कौशलेन कुशीलवाः ।
प्रवृत्तिमन्तो रङ्गस्थान् रञ्जयन्ति जनान्मुहुः ॥ २२ ॥

प्रायोऽभिनेयं ते वस्तु नैव वाचा विवृण्वते ।
तत्तु स्वाभिनयेनैव प्रस्तुवन्ति पुरो नृणाम् ॥ २३ ॥

गाथका अपरे तावत् स्थितास्तेभ्यः पृथक् क्वचित् ।
गायन्ति बहुगीतानि वस्तु यानि विवृण्वते ॥ २४ ॥

तिष्ठन्ति सह तैश्चापि वादका वाद्यकोविदाः ।
ये गीतकाले वाद्यानि वादयन्ति पृथक् पृथक् ॥ २५ ॥

कांस्यतालञ्च भेरीं च तन्त्रीर्नैकविधास्तथा ।
तूर्याणि च मृदङ्गांश्च स्वस्मिन् देशे सुविश्रुतान् ॥ २६ ॥

नानाकृतीन् विचित्रांस्ते नानास्वरमनोहरान् ।
वादयन्ति महोत्साहात् कुशलाः स्वस्य कर्मणि ॥ २७ ॥

पात्राणां प्रस्तुतौ रामगाथायाः पद्धतिं पृथक् ।
समाश्रयन्ति कुशलास्तत्तद्देशकुशीलवाः ॥ २८ ॥

क्वचिच्छद्ममुखैस्तावत्तत्तदाकृतिसूचकैः ।
आवृत्य स्वं मुखं पात्रप्रस्तुतिं ते प्रकुर्वते ॥ २९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

क्वचिच्चोद्वा कराभ्यां ते कृत्तचर्ममयाकृतीः ।
तत्तत्पात्रगतं रूपं प्रस्तुवन्ति पुरो नृणाम् ॥ ३० ॥

(उपजातिवृत्तम्)

प्रवर्तमानस्य पुरेऽतिरम्ये
बैंकाकनाम्ना प्रथिते पृथिव्याम् ।
सम्मेलनस्यान्तरराष्ट्रियस्य
चर्चामहं कर्तुमभिप्रवर्ते ॥ ३१ ॥

आग्नेयदेशेषु महान् प्रचारः
स्वदेशवद्दाशरथेः कथायाः ।
प्रयुञ्जते तामतिकौशलेन
तस्यां जनाः स्वां रुचिमादधानाः ॥ ३२ ॥

कथं प्रयोगो भवतीतरेषु
देशेषु तस्या इति बोद्धुकामाः ।
सम्मेलनस्यातिविशालरूप-
स्यायोजनेऽत्रत्यजना मनोऽदुः ॥ ३३ ॥

निमन्त्रयामासुरतोऽत्र ते षड्-
देशेभ्य आनन्दपरा अनेकान् ।
कुशीलवान् रामकथासुविज्ञान्
रसानिवास्यां भुवि संस्थितान् षट् ॥ ३४ ॥

स्वस्यां कलायां निपुणाः स्वशक्त्या
विवृण्वते रामकथां स्वशैल्या ।
एते, ततो जायत एव कश्चिद्
हर्षस्य वर्षो जनमानसेषु ॥ ३५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रामायणं तेऽति रसात्कदाचित्
प्रयुञ्जते पुत्तलिकामुखेन ।
रुच्चैस्तथा छद्ममुखैः कदाचित्
नृत्यैरथो वा विविधैः सुरम्यैः ॥ ३६ ॥

आलोकमालोकमिदं समस्तं
सामाजिकस्तृप्यति नैव कश्चित् ।
तृप्तिर्भवेच्छ्रेयसि नैव कस्या-
पीत्यत्र सन्देहलवो न कश्चित् ॥ ३७ ॥

कुशीलवा एव निमन्त्रिता नो
सन्त्यत्र नाना विबुधा अपीति ।
सम्मेलनस्यास्य विशिष्टताऽस्ति
प्रख्यापयेद्या महिमानमस्य ॥ ३८ ॥

विद्वज्जनास्ते विशदं क्रमेण
व्याख्यान्ति रामस्य कथां स्वदेश्याम् ।
भवन्ति तेषां प्रतिपादनानि
ज्ञानस्य वृद्धेर्जननानि भूयः ॥ ३९ ॥

सर्वत्र रामस्य कथैव यद्य-
प्यास्ते तथाऽप्यत्र महान् विभेदः ।
संलक्ष्यते तत्प्रतिपादनायां
रूपं पृथग् या प्रददाति तस्यै ॥ ४० ॥

दृष्टान्तरूपेण समासबुद्ध्या
भेदाः प्रदर्श्यन्त इहातिमुख्याः ।
बोधो भवेद्येन सुधीजनानां
भिन्ना कथं रामकथाऽन्यदेश्या ॥ ४१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

देशान्तरे रामकथाप्रसङ्गे
काँश्चित्प्रसङ्गाननुपवर्णयामः ।
स्वरूपतो वा क्रमतोऽथवा ये
स्वदेश्यरामायणतोऽतिभिन्नाः ॥ ४२ ॥

'फलक् फलाम्' इत्यभिधानभाजि
लाओसदेशे प्रथिते पुराणे ।
रामायणे वर्णित इत्थमस्ति
मायाविमारीचवधप्रसङ्गः ॥ ४३ ॥

कृत्वा यदा हेममृगस्य रूपं
रामाश्रमाभ्याशमुपैति यावत् ।
मारीचनामाऽसुरपाश एष
तावत्स सीताक्षिपथं प्रयाति ॥ ४४ ॥

विलोक्य तं विस्मितमानसा सा
नेतुं तमाह स्वपतिं विमुग्धा ।
असम्भवं हेममृगस्य जन्मे-
त्यवोचदेषोऽवरजं च विद्वान् ॥ ४५ ॥

तद्वाक्यमस्या अपि कर्णमापद्
यत्क्रोधमस्या ज्वलयाम्बभूव ।
स्वेच्छाविघातात्कुपिता स्वभर्तु-
स्तूणीरतोऽसौ शरमाचकर्ष ॥ ४६ ॥

वक्षःस्थलं विध्यति यावदेषा
तेनातिघोरेण शरेण तावत् ।
चुक्रोश रामः सुतरां भयार्तः
शरं च तस्याः करतोऽपनिन्ये ॥ ४७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अत्याहितं भोः। किमिति त्वयैवं
चिकीर्षितं चेति वचोऽभ्युवाच ।
तवाग्रहश्चेदयमेव ताव-
न्मृगं त्वदर्थं समुपानयामि ॥४८ ॥

उक्त्वैवमेतां रघुवंशनाथो
मृगस्य शीघ्रं खलु पृष्ठतोऽभूत् ।
कालेन चासौ कियताऽपि तस्मिन्
बाणं प्रवीरो विमुमोच घोरम् ॥४९ ॥

क्षतो भवंस्तेन स आर्तवाचं
हा लक्ष्मणेत्येवमुवाच दुष्टः ।
उवाच सम्बोध्य विदेहजां च
हा नाम सीते ! इति चापि वाचम् ॥५० ॥

आकर्ण्य तां तत्क्षणमेव ताव-
च्छ्रीराममार्गानुगतस्तरस्वी ।
श्रीलक्ष्मणस्तत्स्थलमाससाद
यत्राऽऽस्त स भ्रातृवरः प्रियोऽस्य ॥५१ ॥

विलोक्य मारीचमयं श्वसन्तं
बाणेन तावत्प्रजहार वीरः ।
रामस्तदाऽन्यं विमुमोच बाणं
तस्मिन् स्वके राक्षसरूपमाप्ते ॥५२ ॥

एवं स विद्धः प्रखरैः शरैस्त्रिः
प्राणान् मुमोचासुरवंशजातः ।
रामो निवृत्तः सहलक्ष्मणश्च
विदेहजाशून्यकुटीरकं स्वम् ॥५३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

हिन्देशियायामिदमेव तावत्
किञ्चिद्भिदाऽऽख्यानवरं प्रसिद्धम् ।
तत्रास्ति मारीचवधः शरेण
सौमित्रिणाऽस्तेन सुदारुणेन ॥५४ ॥

रामे हि मारीचमनु प्रयाते
सौमित्रिरेनं द्रुतमन्वगच्छत् ।
आलोक्य मारीचमसौ मुमोच
प्राणान्तकं बाणमथो अमुष्मिन् ॥५५ ॥

तत्रैव काचित्खलु कुम्भकर्ण-
कथाप्रसङ्गेऽपि भिदाऽस्ति लक्ष्या ।
प्रस्थानतोऽसौ समराङ्गणार्थं
पूर्वं स्वभार्यां समया प्रयाति ॥५६ ॥

सा चाङ्गवस्त्रं प्रददाति तस्मै
मुखं कराभ्यां च वृणोति नैजम् ।
दीना विवर्णा च कथञ्चिदेवा-
भ्युपैति पत्युर्गमनं रणार्थम् ॥५७ ॥

एवञ्च तत्रासुरयोषितोऽपि
विदेहजातां परितः स्थिता याः
लङ्कापुरेऽशोकवनस्थले ता
बीभत्सरूपं कलयन्ति नैव ॥५८ ॥

ता अप्सरोवत्सकलाः सुवेशाः
सुभूषणाः कोमलकान्तरूपाः ।
हिन्देशियारामकथाप्रसङ्गे
सामाजिकानां पुरतो विभान्ति ॥५९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बीभत्सरूपा नहि दर्शनीयाः
स्त्रियः समुद्वेगकरं भवेत्तत् ।
सामाजिकानामिति तत्र कश्चिद्
विलक्षणः सम्प्रथते प्रवादः ॥ ६० ॥

एवञ्च सीताहरणाद्दशास्यः
प्रागव्रजद्रामकुटीं ततश्च ।
सुप्तेषु रामादिषु गुल्मकादीन्
दण्डेन सन्ताडितवान् बलेन ॥ ६१ ॥

एवं व्यधादेष परीक्षणार्थं
शक्तेर्निजायाः कुशलोऽपि युद्धे ।
अल्पोऽपि शत्रुर्न भवेदुपेक्ष्य
इत्येवमात्मन्यधि सम्प्रधार्य ॥ ६२ ॥

रामायणे कम्बुजदेशगेऽपि
लक्ष्यो विशेषो विदुषामवश्यम् ।
तथा हि तत्रास्त्युपवर्णितं य-
न्न शक्तिमानप्युपसत्तुमासीत् ॥ ६३ ॥

शक्तो दशास्यो जनकस्य पुत्री-
मत्युष्णतां चान्वभवत्तदारात् ।
यदा यदा तामुपसर्त्तुमैच्छत्
तदा तदा सोऽन्वभवत्तथैव ॥ ६४ ॥

इच्छाभिपूर्तौ दनुजस्य तस्याः
सतीत्वतेजोऽभवदन्तरायः ।
सामीप्यमस्या न कथञ्चिदेव
शशाक सम्प्राप्तुमतो दनूजः ॥ ६५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रामायणस्यैव कथाप्रसङ्गे
विवक्षितो नो विषयोऽपरोऽपि ।
विपश्चितां येन भवेदवश्यं
ज्ञानस्य वृद्धिः सुतरामभीष्टा ॥ ६६ ॥

'फलक् फलाम्' इत्यभिधां दधानो
विनिर्मितो वर्षशतद्वयात् प्राक् ।
लाओसदेशे किल विंशनाख्ये
ग्रन्थः पुरे दृष्टिपथं प्रयाति ॥ ६७ ॥

प्राकाश्यमद्यापि न सम्प्रयातो,
विलक्षणस्तिष्ठति मातृकास्थः ।
ग्रन्थालये राष्ट्रिय एष नैव
ज्ञातोऽन्यदेशस्थविदां कथञ्चित् ॥ ६८ ॥

ग्रन्थोऽस्त्ययं देवगिरा निबद्धों-
ऽशतस्तथा पालिगिरा च दिव्यः ।
तद्वर्ण्यवस्तु प्रविजानते भो !
लाओसदेश्या न कथञ्चनापि ॥ ६९ ॥

जानन्ति ते पालिगिरं परन्तु
जानन्ति नो देवगिरं ययाऽस्य ।
ग्रन्थस्य भूयान् रचितोऽस्ति भागो
यो रामगाथां विवृणोति दिव्याम् ॥ ७० ॥

देशस्य तस्यास्त्यधुना न दीर्घा
विंशन्नभिख्या खलु राजधानी ।
पुरी पुराऽऽसीदपरैव लम्प्र-
बानाभिधा तत्पदमास्थिता या ॥ ७१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नैकानि देवायतनानि तत्र
नैकास्तथा सौगतिका विहाराः ।
नैकानि हर्म्याणि च शोभनानि
येष्वङ्किता रामकथा विचित्रा ॥ ७२ ॥

परश्शतान्यद्भुतरूपभाञ्जि
चित्राणि तत्राक्षिरसायनानि ।
आलोकमालोकमपारहर्षः
सञ्जायते चेतसि कोविदानाम् ॥ ७३ ॥

अद्यापि नेमानि मनोहराणि
चित्रीकृतानीति विचित्रमेतत् ।
विलक्षणोऽयं विधिरत्र देशे
देशान्तराज्ञातचरो विभाति ॥ ७४ ॥

हिन्देशियानामनि देशवर्ये
'प्रम्बान्' समाख्येषु सुरालयेषु ।
नैकत्र चान्यत्र सुखावहानि
दृश्यानि रामायणतो विभान्ति ॥ ७५ ॥

तद्देशभागस्थजना अजस्रं
प्रयुञ्जते रामकथां विचित्राम् ।
परम्पराप्राप्तपथेन गुर्वीं
रुचिं दधाना हृदयेन तत्र ॥ ७६ ॥

शिलासु वा भित्तिषु वा कृतानि
कृतानि वा दारुमयालयेषु ।
ककाविनाभिख्यलघुस्वरूप-
काव्येषु वाऽथो उपवर्णितानि ॥ ७७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

आलोकमालोकमुपैति लोको
भक्त्यानतो विस्मयपारवश्यम् ।
अहो ! महान् रामकथाप्रभावो-
ऽस्त्यत्रेति वाचञ्च मुहुः स वक्ति ॥७८ ॥

पुराऽभिलेखो लिखितोऽत्र देशे
पुरातनोऽस्त्यष्टमवर्षशत्याम् ।
रामायणस्यास्ति तु यत्र चर्चा
स एव तावत् प्रथमं प्रमाणम् ॥७९ ॥

देशेऽत्र रामायणसंस्तवस्य
ततः परस्तात्प्रसृताऽत्र धारा ।
सुपावना व्योमतरङ्गिणीव
मुदावहा रामकथोत्तमस्य ॥८० ॥

आसीत् पुरा वाक्पतिराजनामा
यथार्थनामा कविधुर्य एकः ।
यः प्राकृतेनारचयत् स्वकाव्यं
श्रीरामगाथामभिलक्ष्य रम्याम् ॥८१ ॥

अवर्णयत्तत्र स रावणस्य
वधं दनूजस्य चकार चापि ।
नाम स्वकाव्यस्य स रावणेति-
पूर्वं वधेत्यन्तगतं विपश्चित् ॥८२ ॥

गाथैतदीयैव ध्रुवं गृहीता
हिन्देशियावासिभिरात्मदेशे ।
द्वीपद्वयेऽस्यैव यवे च पूर्वं
बाल्यां च भाषान्तरसङ्क्रमोऽभूत् ॥८३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अत्रैव द्वीपद्वयके विशिष्टः
संलक्ष्यते रामकथाप्रचारः ।
नैकाभिरत्राभिनयन्त्यभिज्ञाः ।
शैलीभिरेतां रसिकैस्समीड्याः ॥ ८४ ॥

बाल्यामिमे प्रस्तुवतेऽतिरम्या-
मिमामहो ! छद्ममुखावृतास्याः ।
कुशीलवाः सम्प्रति नृत्यनाट्य-
रूपेण वायाङभिधेन दक्षाः ॥ ८५ ॥

यवे पुनर्द्वीपवरेऽपरे तु
प्रयुञ्जते पुत्तलिकामुखेन ।
नाट्येन छद्मास्ययुतेन तावद्
रम्येण वायाङभिधानभाजा ॥ ८६ ॥

छायायुतं पुत्तलिकादिनाट्य-
मप्येतदर्थं किल तत्र विज्ञैः ।
प्रयुज्यते पूर्वपरामभिख्यां
वायाङिति ख्याततमां दधानम् ॥ ८७ ॥

प्रयुज्यते रामकथैकवारं
मासे जकार्ताभिधराजधान्याम् ।
आराम एकत्र तमन्मिनीति-
ख्याते रसश्चाप्यनुभूयतेऽस्याः ॥ ८८ ॥

देशे तु तावन्मलयेशियाख्ये
प्रवर्तते रामकथाप्रचारः ।
भागेषु त्रिष्वेव न चापरत्र
केडाह्कलन्तानमलक्ककेषु ॥ ८९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

द्वीपाद्यवाख्यात्प्रथिमानमाप्ता-
ऽतिपावनी रामकथाऽत्र देशे ।
छायायुतं नाट्यमपोष्यतात्र
तद्देशयात्रागतसार्थवाहैः ॥ ९० ॥

देशेऽत्र वायाङ्कुलितेतिसञ्ज्ञा
नाट्यस्य तस्य प्रथिमानमाप्ता ।
आहिण्डमाना नटनर्तका यां
प्रयुञ्जते ग्राम्यजनेऽधुनाऽपि ॥ ९१ ॥

विनिर्मितास्तत्र भवन्ति चर्म-
मय्यो ध्रुवं पुत्तलिका अनेकाः ।
ता एव तावत् खलु नर्तयन्ति
गीतैश्च ते रामकथां वदन्ति ॥ ९२ ॥

रामायणस्यात्र हिकायतश्री-
रामेति संज्ञा प्रथिताऽस्ति देशे ।
इस्लामधर्मश्च तथाऽऽर्यधर्मो
धर्माविमौ द्वाविह सङ्गतौ स्तः ॥ ९३ ॥

वैचित्र्यमेतन्मलयेशियायाः
सर्वाञ्जनान् स्मेरमुखान् करोति ।
नान्यत्र देशे परिलक्ष्यते भो-
येतादृशो भूषणभूष्यभावः ॥ ९४ ॥

तदीयरामायणमाह तुष्टाद्
अल्लात आसाद्य वरं दशास्यः ।
अजेयतां प्राप नहीश्वराच्च
तत्राऽस्त्यहो ! कीर्तित ईश्वरोऽल्लाः ॥ ९५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ब्रह्मेति पूर्वं परिकीर्तितस्या-
धुना च म्यांमारभिधानकस्य ।
देशस्य तावद्रमणीयगाथां
रामायणीं सम्प्रति चर्चयामः ॥ ९६ ॥

तत्रापि दृग्गोचरतामुपैति
काचिद्भिदा रामकथान्तरेभ्यः ।
तामेव तावद् रुचिरैः प्रसङ्गै-
र्द्वित्रैः समासेन निरूपयामः ॥ ९७ ॥

ऋषिः सरामः सहलक्ष्मणश्चा-
योध्यापुरात्पुण्यनिजाश्रमाय ।
प्रतिष्ठमानः समुपैति विश्वा-
मित्राभिधानोऽर्धपथे तडाकम् ॥ ९८ ॥

नेदं शुभं नात्र कदाचिदेव
निमज्ज्यतामित्यभिधाय रामम् ।
स लक्ष्मणश्चापि ययौ महर्षिः
पूजादि निर्वर्तयितुं यतात्मा ॥ ९९ ॥

अत्रान्तरे तत्र ऋषी कुतश्चि-
त्समागतौ द्वौ निषिषेधतुस्तौ ।
बालौ प्रवेष्टुं सरसि प्रमाथि-
न्यनिष्टसम्भावनया प्रणुन्नौ ॥ १०० ॥

स्वे अङ्गवस्त्रे क्रमशः सरोऽम्भ-
स्युभौ ऋषी चिक्षिपतुः क्रमेण ।
क्षणाच्च ते संज्वलिते अदृश्ये
बभूवतुश्चेत्यतिचित्रमासीत् ॥ १०१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मायासरस्यां प्रविलोक्य दृश्यं
रोमाञ्चकार्येतदतीव भीतौ ।
नहि प्रवेष्टुं मन आदधीतां
द्वयोस्तयोस्ताविति बुद्धिरासीत् ॥ १०२ ॥

ऋष्योस्तयोस्तावमत्य विश्वा-
मित्रस्य वाक्यं च [१] प्रविष्टवन्तौ ।
तस्यां सरस्यां तत उत्थितौ च
क्षणेन तावद्युवतामवाप्तौ ॥ १०३ ॥

किरीटिनौ कुण्डलिनौ सुवेशौ
स्वं स्वं च वर्णं प्रविधारयन्तौ ।
हरीतिमा सम्प्रबभूव रामे
सुवर्णवर्णोऽथ च लक्ष्मणोऽभूत् ॥ १०४ ॥

कथानकं चापरमत्र देशे
नूलं समालक्ष्यत एवमेव ।
मनोविनोदाय सुधीजनानां
भवेत्तदप्यत्र न संशयोऽस्ति ॥ १०५ ॥

स्वयंवरार्थं जनकः सुताया
निमन्त्रयामास नृपाननेकान् ।
तस्मिन्प्रसङ्गे भृगुनन्दनेऽपि
सम्प्रापयामास निमन्त्रणं सः ॥ १०६ ॥

देशस्य कस्यापि बभूव राजा
रामः प्रतापी भुवि जामदग्न्यः ।
ऋषिर्नहीति प्रतिकूलरूपा
म्यांमारदेशीयकथाऽतिचित्रा ॥ १०७ ॥

१. हे प्रे वा इत्याश्रित्य प्रयोगः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सम्प्रेषितं भूमिपतौ बभूव
निमन्त्रणं स्वं मिथिलाधिपेन ।
यदा तदाऽयं क्वचिदद्रिशृङ्गे
तप्तुं तपोऽभूत्समभिप्रवृत्तः ॥ १०८ ॥

निमन्त्रणार्थं प्रहिते स्वपत्रे
सीताकृतिं तज्जनकोऽङ्कयद् या ।
अशोभयत्पत्रमवर्णयच्च
सीतास्वरूपं परिणेतुमिच्छून् ॥ १०९ ॥

आसाद्य पत्रं जनकेन सृष्टं
रामस्तपस्वी किल जामदग्न्यः ।
साक्षात् तपोविघ्नमिवाकलय्य
दूरीचकारैतदनादरेण ॥ ११० ॥

तद्वायुवेगेन हृतं तदा स-
ल्लङ्कापुरीं नीतमभूज्जवेन ।
विधेर्वशात्तत्पतितं च हस्ते
तच्छासितू रावणनामकस्य ॥ १११ ॥

आलोक्य सीताकृतिमेष लुब्धः
स्वयंवरार्थं समभिप्रतस्थे ।
कालेन रम्यां मिथिलाभिधानां
स राजधानीं जनकस्य चाप ॥ ११२ ॥

आप्त्वा च तां चापलसम्प्रणुन्नः
स रुद्रचापोद्धरणे प्रवृत्तः ।
उत्थापने तस्य बभूव शक्तो
ज्यारोपणे नैव तु यत्नतोऽपि ॥ ११३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उत्थापयन्तं प्रविलोक्य चापं
विदेहपुत्रीं भयमाविवेश ।
दुष्टस्य हस्ते खलु मा स्म पप्तं
दुःखाय मे तत्सुतरां भवेन्नु ॥ ११४ ॥

शङ्काग्रहग्राहनिपीड्यमाना
मृद्वी प्रकृत्या विमनायिताऽभूत् ।
नेत्रे कराभ्यां पिदधे च तन्वी
सा सान्त्व्यमानाऽपि सखीजनेन ॥ ११५ ॥

जाते दशास्ये विफलप्रयत्ने
चापं सुमित्रातनयोऽजिघृक्षत् ।
उत्थापने चास्य बभूव शक्तो
ज्यारोपणे नैव तु यत्नतोऽपि ॥ ११६ ॥

ततोऽनु रामो ननु हेलयैव
धनुस्तदुत्थाप्य चकार सज्यम् ।
विदेहपुत्र्या भृशमाश्वसत्या
स्मेरास्यया सस्पृहमीक्ष्यमाणः ॥ ११७ ॥

रामस्य सुग्रीवकपेरकस्मात्
समागमं चापि विचित्ररूपम् ।
सन्धिं प्रियं वर्णयति द्वयोश्च
म्यांमाररामायणमन्यथैव ॥ ११८ ॥

आहिण्डमानो विपिनान्तरेषु
विदेहजान्वेषणसम्प्रयुक्तः ।
कस्मिंश्चिदह्नि श्रमकर्शितः सन्
निद्रावशं दाशरथिर्जगाम ॥ ११९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शीर्षोपधानं किल तस्य तत्र
बभौ सुमित्रातनयाङ्क एव ।
निद्रावशं यातवतोऽग्रजस्य
सर्वात्मनाऽसौ कुशलं निदध्यौ ॥ १२० ॥

अत्रान्तरे तत्र समापपात
घोरा कुतश्चिद्वनमक्षिका हा !
या पृष्ठमांसं प्रविदार्य सद्यः
पपौ सुमित्रातनयस्य रक्तम् ॥ १२१ ॥

पीडामसह्यामनुभूतवान-
प्येषोऽतिधीरो विचचाल नैव ।
न विव्यथे वा न च वा चकम्पे
सर्वं तदाश्चर्यकरं बभूव ॥ १२२ ॥

तद्दृश्यमालोक्य विचित्ररूपं
न दृष्टपूर्वं क्वचनापि लोके ।
स्वराजधान्या अपसारितः सन्
भ्रात्रा भृशं क्रोधवशं गतेन ॥ १२३ ॥

तस्यैव शाखामधिरुह्य तिष्ठन्
वृक्षस्य यस्यास्त तले शयानः ।
सीतापतिर्, वानरयूथमुख्यो
सुग्रीवराजो व्यचिचिन्तदित्थम् ॥ १२४ ॥

अहो ! अधन्यः सुतरामहं, भो !
भ्राताऽपि मे द्रुह्यति मह्यमेव ।
भ्राता त्विह भ्रातरमात्मनोऽपि
प्राणैः परित्रातुमभिप्रवृत्तः ॥ १२५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एवं तदा चिन्तयतोऽस्य तत्र
स्थूलाश्रुबिन्दुप्रकरः पपात ।
विनिद्रितो येन ककुत्स्थवंश्यः
शाखाविरूढं कपिमालुलोके ॥ १२६ ॥

अदृष्टपूर्वं प्रविलोक्य तं प्रा-
गनिष्टरूपं प्रवितर्कयन् सः ।
स्वं कार्मुकं हस्तगतं चकार
तं वानरं दण्डयितुं महात्मा ॥ १२७ ॥

आलोक्य तत्तत्क्षणमेव भीतः
शाखामृगः पादपमूलमेत्य ।
आमूलचूलं प्रविकम्पमानः
रामस्य यातः किल पादमूलम् ॥ १२८ ॥

बद्धाञ्जलिः स प्रणनाम वाक्यैस्-
तुष्टाव तं सान्त्वपरैस्तथा च ।
निवेदयामास समस्तवृत्तं
रोषं तदीयं परिहर्तुकामः ॥ १२९ ॥

भ्रात्रोर्निरीक्ष्य प्रकटं प्रगाढं
परस्परस्नेहपरम्परां वाम् ।
भ्रात्रा मदीयेन ममावमानं
कृतं समालोच्य च मेऽन्तरङ्गम् ॥ १३० ॥

दुःखातिभाराद् द्रवितं तथाऽभूद्
यथाऽश्रुबिन्दुप्रकरोऽपतन्मे ।
नान्योऽत्र हेतुः परिकल्पनीय-
श्चित्तद्रवान्मे सुतरामसह्यात् ॥ १३१ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सुग्रीव एवं निजवृत्तजातं
तस्मै यथावत्समुदाजहार ।
भ्राताऽस्य वाली कृतवान् पुरा यत्
तस्मिन्, स्वदेशाच्च बहिश्चकार ॥ १३२ ॥

आकर्ण्य गाथां करुणां महात्मा
सीताधिनाथः करुणार्द्रचेताः ।
आश्वासयत्सान्त्वपरैर्वचोभिः
साह्यं च तं प्रत्यशृणोत्प्रवीरः ॥ १३३ ॥

तथैव तं प्रत्यशृणोत् स्वसाह्यं
विदेहजान्वेषणकर्मणि द्राक् ।
सुग्रीवनामा कपियूथमुख्यः
सन्धिस्तयोरेवमभूदभीष्टः ॥ १३४ ॥

(वसन्ततिलकावृत्तम्)

रामायणस्य विविधा रुचिराः प्रसङ्गा
देशान्तरेष्वनुभवं सुधियां प्रयान्तु ।
एतद्धियाऽऽकलनमत्र निदर्शनाय
केषाञ्चिदेव कृतमस्ति समासबुद्ध्या ॥ १३५ ॥

नद्यो यथा विविधदिग्भ्य उपस्रवन्ति
वारांनिधिं च सलिलेन समेधयन्ति ।
देशान्तरेषु विततानि कथानकानि
पुष्णन्ति रामचरितं महितं तथैव ॥ १३६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रामायणं विविधदेशनिवासिलोका
आत्मीयमित्यनुभवन्ति तदेकचित्ताः ।
किं स्यात्ततः प्रियतरं जगतीतले यद्
रामाभिरामचरिते रमते जनौघः ॥ १३७ ॥

स्नेहाधीनः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरात् २७.४.१९९१ दिनाङ्के थाइदेशमहाराजकुमारीं प्रति प्रहितं पत्रम्

मान्यायै थाइदेशराजकुमार्यै स्वस्ति ।

(अनुष्टुब्वृत्तम्)

अष्टाविंशेऽह्नि मासस्याप्रैलाख्यस्य व्रजाम्यहम् ।
कृत्यजातं समाप्यात्र कृती देशमहं स्वकम् ॥ १ ॥

षट्त्रिंशद्वर्षसम्पूर्तिमभिलक्ष्य कृते महे ।
रामायणेन सम्बद्धे यदुपास्थिषि तन्मम ॥ २ ॥

अकल्पत प्रमोदाय ज्ञानसंवर्धनाय च ।
एवंविधाः समारम्भा हितमातनुयुर्बहु ॥ ३ ॥

रामायणस्य सर्वत्र प्रचारो दृष्टिगोचरः ।
तज्जनैरन्यदेशस्थैरात्मीयमिति गृह्यते ॥ ४ ॥

किन्नाम तादृशं तत्र यन्मनांसि स्पृशत्यलम् ।
जनानां नैककोटीनां भूमण्डलनिवासिनाम् ॥ ५ ॥

किं कथाऽतीव रुचिरा किंवाऽऽदर्शो मनोहरः ।
भावावलिरुदात्ता वा रसाः किं वा पृथक् पृथक् ॥ ६ ॥

(उपजातिवृत्तम्)

कथासु नैकास्वपि रोचिकासु
किमर्थमत्राभिनिवेश एषः ।
जनस्य भूयानिति नैव शक्यं
वक्तुं दृढं केनचनापि लोके ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सत्यं जनः स्वप्रतिबिम्बमत्र
पश्यन् विशेषाग्रहमादधाति ।
यज्जीवने स्वेऽनुभवत्यजस्रं
तदेव सम्पश्यति सोऽत्र सर्वम् ॥ ८ ॥

अन्तर्विरोधा निजजीवनेऽस्य
शुभाशुभा वा द्विविधा प्रवृत्तिः ।
उच्चावचा भावतरङ्गिणी वा
रामायणे तत्सकलं चकास्ति ॥ ९ ॥

(इन्द्रवज्रावृत्तम्)

रामोऽथवा स्याद्दशकन्धरो वा
देवो भवेद् वा दनुजोऽथवा भोः ।
वैविध्यमस्त्येव जगत्यवश्यं
नास्त्यत्र संशीतिलवोऽपि कश्चित् ॥ १० ॥

(उपजातिवृत्तम्)

वैविध्यमेतत् सकलेऽपि तावद्
रामायणे दृष्टिपथं प्रयाति ।
तदेव सत्यं जनमानसानि
बलात्समाकर्षति जीवलोके ॥ ११ ॥

रामः कथं सर्वगुणाभिरामो
राज्याभिषेकाय निमन्त्रितोऽपि ।
तद्वञ्चितः सन् विपिनेषु नाना
वर्षाणि बभ्राम सुदुर्गमेषु ॥ १२ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तत्रापि चापन्नहि तं मुमोच
सीतावियोगः कठिनस्तमाप ।
तथापि धैर्याद्द्रहयाम्बभूव
नात्मानमेष प्रबलान्तरात्मा ॥ १३ ॥

सन्धिं समाधाय स वानराद्यै-
र्भार्यासमन्वेषणसम्प्रयुक्तः ।
निःसाधनोऽप्यव्यथितो दनूजान्
ससाधनानप्यनयद्विनाशम् ॥ १४ ॥

विलक्षणं तत्प्रतिभाति सर्वं
चेतश्च सर्वस्य चमत्करोति ।
महात्मनस्तच्चरितं महीयो
गायन्ति लोका अत एव मुग्धाः ॥ १५ ॥

(इन्द्रवज्रावृत्तम्)

नाग्नेयदेशेषु समेऽपि लोकाः
कुर्वन्ति रामे भगवत्त्वबुद्धिम् ।
सङ्कीर्तयन्तोऽप्यवतारमेनं
नारायणस्याखिललोकभर्तुः ॥ १६ ॥

(उपजातिवृत्तम्)

प्रवृत्तिरेषां न चरित्रगाने
तस्यास्ति तस्मिन्भगवत्त्वबुद्ध्या ।
तस्मिन्महापूरुषबुद्धिरेव
तांस्तत्र सम्प्रेरयते निकामम् ॥ १७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

धैर्य्यं च वीर्य्यं च पराक्रमश्चा-
नुत्सिक्तता च प्रियवादिता च ।
सत्यं च सत्यं गुरुवश्यता च
गुणा अनेकेऽस्य हरन्ति लोकम् ॥ १८ ॥

(इन्द्रवज्रावृत्तम्)

हेतोरतस्ते ग्रहिलाश्चरित्र-
गानेऽस्य बाढं पुरुषोत्तमस्य ।
तृप्तिं न विन्दन्ति निरन्तरं ते
सङ्कीर्तयन्तोऽपि चरित्रमस्य ॥ १९ ॥

(उपजातिवृत्तम्)

आबालवृद्धं प्रथिताऽस्य गाथा
पुनर्नवेवास्ति पुनर्नवा च ।
अनन्तकालं भुवि संस्थितेयं
लोकोपकाराय भविष्यतीत्योम् ॥ २० ॥

शुभेच्छुः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२०.५.१९९१ दिनाङ्के पुरीस्थान् डा० सदानन्ददीक्षितमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया डा० दीक्षितमहाभागाः,

शुभाशिषः ।

(अनुष्टुब्वृत्तम्)

एकविंशेऽह्नि मासस्य मार्चाख्यस्यैषमः शुभम् ।
भवद्भिः प्रेषितं पत्रं यथाकालमवाप्नवम् ॥ १ ॥

न्यक्षेण तेन वृत्तं चाज्ञासिषं येन मे हृदि ।
अन्योन्यसङ्गमे यद्वत् तद्वज्जातो मुदां भरः ॥ २ ॥

पूर्णस्वास्थ्यं भवेल्लब्धं भवद्भिरिति चिन्तये ।
आयासः परिहर्तव्यस्तथापीति मतिर्मम ॥ ३ ॥

स्वस्थे शरीरे कार्याणि कर्तुं शक्यानि नान्यथा ।
अतस्तत्रावधातव्यं सविशेषं विपश्चिता ॥ ४ ॥

कृशे शरीरे कस्यापि साहाय्यं नोपलभ्यते ।
सत्यमेवोच्यते ! प्राज्ञैः कृशे कस्याऽस्ति सौहृदम् ॥ ५ ॥

अतस्तात प्रकर्तव्यो यथाशक्ति परिश्रमः ।
कृतेऽतिक्रम्य शक्तिं स शरीरं सादयेन्ननु ॥ ६ ॥

मया नैतत्कृतं सत्यं पूर्वे वयसि तेन मे ।
शरीरसादो येनाहं परितप्येऽधुना भृशम् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रबोधितोऽपि पितृभिर्मद्धिताकाङ्क्षिभिर्भृशम् ।
नात्रावाधां स्वकार्यौघपरोऽबुधविचेष्टितः ॥ ८ ॥

चटकाभिर्हृते धान्ये भवेत्क्षेत्रस्य या दशा ।
वार्धके तप्यमानस्य तादृश्येवास्ति मे दशा ॥ ९ ॥

नानारुजाभिराक्रान्तः कृशगात्रोऽधुनाऽस्म्यहम् ।
दृढा सङ्कल्पशक्तिर्मे तेन जीवामि कर्मठः ॥ १० ॥

अपूर्णाः सन्ति मे ग्रन्था अनेके ते प्रयत्नतः ।
लोकसङ्ग्रहकामेन नेतव्याः पूर्णतां मया ॥ ११ ॥

कालिदासपरो ग्रन्थोऽधुनाऽवसितमुद्रणः ।
अल्पेन समयेनैव प्राकाश्यं समुपैष्यति ॥ १२ ॥

प्राकाश्यं नेतुमिच्छामि स्वकीयं पत्रसङ्ग्रहम् ।
यो मया रचितः पद्यैः काले काले मनोहरैः ॥ १३ ॥

प्रहितानि मया पत्राण्यनेकानि सुहृज्जनान् ।
पद्यबद्धानि वर्षेषु नैकेषु विगतेषु भोः ॥ १४ ॥

सहस्रादधिका सङ्ख्या पद्यानां तात ! वर्तते ।
येषु स्पृष्टा मया नैके विषया ज्ञानवर्धकाः ॥ १५ ॥

यत्र यत्र मया यातं यद्वा यद्वा च वीक्षितम् ।
यच्च यच्चानुभूतं तत्सर्वं तेषूपवर्णितम् ॥ १६ ॥

सेयं विचित्रा सामग्री परेषामपि हस्तगा ।
भवेदिति धिया तस्याः प्राकाश्यमभिरोचये ॥ १७ ॥

एवं कृते सुरक्षा स्यादस्याः सार्थकता च मे ।
श्रमस्येति मतिस्तात तदर्थं मत्प्रचोदिका ॥ १८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

स्वकीयः कुशलोदन्तः सूचनीयोऽविलम्बतः ।
इत्येवोक्त्वा समासेन गिरं स्वामुपसंहरे ॥ १९ ॥

शुभेच्छुरहं
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

खेकड़ास्थ डा० रामकिशोरमिश्रमहाभागान् प्रति ३०.६.१९९१ दिनाङ्के प्रेषितं पत्रम्

मान्या महाकवयः,
जयतु भारती ।

(अनुष्टुब्वृत्तम्)

आसाद्य भवतां पत्रं प्रसीदामितमामहम् ।
काव्यामृतरसास्वादमासाद्य रसिको यथा ॥ १ ॥

रामकीर्तिमहाकाव्यपरिशीलनतत्पराः ।
भवन्त इति विज्ञाय हर्षो माति न मे हृदि ॥ २ ॥

(मालिनीवृत्तम्)

सहृदयहृदयं चेत्काव्यमेतन्मदीयं
हरति सफलता स्यादस्य सत्यं तदैव ।
हरति रुचिरगन्धा केतकी लोकचित्तं
न तु सुरुचिररूपः किंशुको गन्धहीनः ॥ ३ ॥

कालिदासाश्रया विज्ञाः ! कृतिः प्राकाश्यमेष्यति ।
जुलैमासेऽवश्यमेव तां प्रहेतास्मि वोऽचिरात् ॥ ४ ॥

देवयानीपुरोवाकं रचयिष्याम्यहं ध्रुवम् ।
तन्मुद्रितांशः प्रूफस्थोऽमुद्रितांशश्च मे द्रुतम् ॥ ५ ॥

प्रहेय इत्युदीर्याहं प्रार्थ्य चापि भवच्छुभम् ।
सद्यः पत्रोत्तराकाङ्क्षी स्वां वाचमुपसंहरे ॥ ६ ॥

भवद्गुणगणावर्जितहृदयः
सत्यव्रतः शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३१.८.१९९१ दिनाङ्के नाभापुरस्थ श्री शुकदेवशर्ममुनीन् प्रति प्रेषितं पत्रम्

मान्या विद्वद्वर्या,
जयतु भारती ।

(अनुष्टुब्वृत्तम्)

आसाद्य मङ्गलापूर्वनक्षत्रापरसञ्ज्ञकम् ।
भवद्भिः प्रेषितं काव्यं प्रहर्षः परमो मम ॥ १ ॥

सरसं मधुरं चेदं नूलार्थेन च शोभितम् ।
पाठं पाठं परस्तोषो जायते मम मानसे ॥ २ ॥

कवीनां क्रान्तदर्शित्वं यदुक्तं कोविदैः पुरा ।
तत्कृतावत्रभवतां सर्वतः परिलक्ष्यते ॥ ३ ॥

भवतां भावगाम्भीर्यं सूक्ष्मां दृष्टिं च निर्मलाम् ।
तत्त्वतः सम्परिज्ञातुं विज्ञोऽपि शिथिलायते ॥ ४ ॥

सूक्तयो ग्रथिता नैका गम्भीरार्थप्रबोधिकाः ।
ताभिः काव्योत्तमं सत्यं भवदीयं सुशोभते ॥ ५ ॥

सर्वथा साधुवादार्हा अभिनन्द्याश्च सर्वशः ।
भवन्तो रचनेनास्य काव्यस्य कविसत्तमाः ॥ ६ ॥

अन्या अपि कृतीर्द्रष्टुमिच्छा जागरिता मम ।
भवतामित्युदीर्याहं स्वां वाचमुपसंहरे ॥ ७ ॥

भवद्बन्धुः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

८.९.१९९१ दिनाङ्के पण्डितदुर्गादत्तशास्त्रिणः प्रति प्रेषितं पत्रम्

मान्या महाकवयः,

सप्रश्रयं नमस्करोमि ।

(अनुष्टुब्वृत्तम्)

बृहत्सप्तपदीग्रन्थो मया प्राप्तो गते दिने ।
अवाप्तस्तेन चामन्दानन्दो वाचामगोचरः ॥ १ ॥

नानाग्रन्थप्रणेतारः कवीनां धुरि कीर्तिताः ।
अद्भुतप्रतिभावन्तो भवन्तो भान्ति भूतले ॥ २ ॥

स्वकीयेऽभिनवे ग्रन्थे कथाः सप्त निरूपिताः ।
शैल्याऽभिनवया सद्भिः सच्चित्तावर्जिकाः सदा ॥ ३ ॥

पाठं पाठं कथा एता आत्मबोधोऽपि सम्भवेत् ।
रञ्जनं मनसश्चापि समेषां साहितीजुषाम् ॥ ४ ॥

इत्येव विनिवेद्याहं समासेनात्र कोविदाः ।
कुशलं भवतां ध्यायन् स्वां वाचमुपसंहरे ॥ ५ ॥

भवद्गुणावर्जितहृदयः
सत्यव्रतः शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१.१०.१९९१ वर्षे श्रीशुकदेवशर्ममुनीन् प्रति प्रेषितं पत्रम्

मान्या मुनिवर्य्याः,
सस्नेहं प्रणतयः ।

(अनुष्टुब्वृत्तम्)

पद्यबद्धं समासाद्य भवत्पत्रमहं गतः ।
आनन्दस्य परां कोटिं काञ्चिद्वाचामगोचराम् ॥ १ ॥

(इन्द्रवज्रावृत्तम्)

आसाद्य वेतालपराजयाख्यं
नाट्योत्तमं माति न मे मुदन्तः ।
अब्धौ यथा चन्द्रमरीचिलाभे
वीचीतरङ्गाकुलिते जलौघः ॥ २ ॥

(उपजातिवृत्तम्)

सन्तः स्वकीयाभिरनुत्तमाभिः
समेधयन्ते कृतिभिः शुभाभिः ।
यत्सांस्कृतं वाङ्मयमित्यतोऽहं
धन्यान् वदान्यान् भवतो वदामि ॥ ३ ॥

ये संस्कृतं वाचममुदीरयन्ति
मृतां निजाज्ञानवशाद् विमूढाः ।
तेषां कृते नूतनपुस्तकानि
नूनं भवेयुः प्रबलोत्तराणि ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

कालेन तावत्कृतिरल्लमेतत्
सम्यक् परीक्ष्याहमवश्यमेव ।
भावं स्वकं सूचयितास्मि विज्ञाः !
एतावदुक्त्वा विरमामि वाचः ॥ ५ ॥

सुरसरस्वतीसमाराधनैकव्रतः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१०.१०.१९९१ दिनाङ्के उल्हासपुरस्थान् डा० रामचन्द्र (हरिशरण) शाण्डिल्यमहाभागान् प्रति प्रेषितं पत्रम्

मान्या महाकवयः,
सुरभारती विजयतेतराम् ।

(उपजातिवृत्तम्)

यात्राप्रसङ्गीयमवाप्य काव्यं
मनो ममास्ते सुतरां प्रसन्नम् ।
आमूलचूलं परिशीलितं त-
दास्वादितश्चापि रसस्तदीयः ॥ १ ॥

आसादितं तेन सहैव काम-
दूतं मया काव्यमतीव रम्यम् ।
आप्लावितस्तद्रसधारयाऽह-
मानन्दकोटिं परमामगच्छम् ॥ २ ॥

विलक्षणा रीतिरिहाश्रिताऽस्ति
काव्यद्वये याऽन्यकविश्रिता नो ।
अनन्यसाधारणशक्तिमन्तः
सन्तो भवन्तः प्रतिभानवन्तः ॥ ३ ॥

रम्यो भवद्गीःप्रसरोऽस्ति रम्या
शैली तथा रम्यतरं च वस्तु ।
आभाति सर्वं ननु रम्यमेव
काव्यद्वयेऽत्र प्रतिभाविलासैः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कालप्रभावाद्ध्वसितप्रभावा
गीर्वाणगीर्यद् ध्रियतेऽधुनाऽपि ।
निरन्तरं तत्र कृताभियोगा
भवादृशा एव निबन्धनानि ॥ ५ ॥

एतदुक्त्वा समासेन प्रणम्य च बुधानहम् ।
भवतः स्नेहसंसिक्तान् स्वां वाचमुपसंहरे ॥ ६ ॥

विद्वदाश्रवः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२२.१.१९९२ दिनाङ्के पण्डितदुर्गादत्तशास्त्रिणः प्रति प्रेषितं पत्रम्

मान्या महाकवयः,
सप्रणयं प्रणमस्यामि ।

(अनुष्टुब्वृत्तम्)

दशमेऽह्न्यस्य मासस्य भवद्भिः प्रेषितं दलम् ।
आसाद्य परमां कोटिमध्यरुक्षमहं मुदः ॥ १ ॥

धन्या भवन्तः सततं साहित्याराधने रताः ।
येन सर्वत्र विततं भवतां यश उत्तमम् ॥ २ ॥

बृहत्सप्तपदीग्रन्थाः पञ्च प्राप्ता मया सुखम् ।
अर्पयिष्यामि तान् सर्वान् सुपात्रेभ्यो यथाविधि ॥ ३ ॥

सुपात्राणां भवेत्तेषां तृप्तिस्तेनेत्यसंशयम् ।
सुधारसस्य निष्यन्दास्तर्पयेयुर्न कं भुवि ॥ ४ ॥

नववर्षमिदं भूयाच्छ्रेयसे भवतामिति ।
सम्प्रार्थ्य पार्वतीजानिं गिरं स्वामुपसंहरे ॥ ५ ॥

सुरसरस्वतीसमाराधनैकव्रतः
सत्यव्रतः शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वृन्दावनस्थान् आचार्य गौरकृष्णशास्त्रिमहाभागान् प्रति १०.३.१९९२ दिनाङ्के प्रेषितं पत्रम्

मान्या डा० गोस्वामिमहाभागाः,
जयतु श्रीहरिः ।

(अनुष्टुब्वृत्तम्)

'विरहिणी व्रजाङ्गना'-काव्यमासाद्य शोभनम् ।
सञ्जातः परमानन्दः कश्चिद्वाचामगोचरः ॥ १ ॥

प्रसन्ना भवतां शैली प्रसन्ना च पदावली ।
प्रसन्नचेतसः कुर्यात्सर्वानपि सचेतसः ॥ २ ॥

मन्दाक्रान्तानिबद्धेऽत्र काव्येऽमन्दमुदावहे ।
काव्यस्य मेघदूतस्यच्छाया सर्वत्र दृश्यते ॥ ३ ॥

तदीयानि पदान्यत्र वाक्यानि च विशेषतः ।
संयोजितानि निपुणं मोदं कमपि तन्वते ॥ ४ ॥

वर्धापनशतं सद्भ्यो विनिवेद्य कृताञ्जलिः ।
भवद्बन्धुरहं वाचं स्वकीयामुपसंहरे ॥ ५ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२९.४.१९९२ दिनाङ्के पण्डितदुर्गादत्तशास्त्रिणः प्रति प्रेषितं पत्रम्

मान्या भ्रातृवर्याः,
सादरं नतिततयः ।

(अनुष्टुब्वृत्तम्)

पत्रमासीषदं प्राह्णेऽपरेद्युर्भवतामहम् ।
येनाजायत मे मोदः कश्चिद्वाचामगोचरः ॥ १ ॥

श्रीरामकीर्तिकाव्यार्थं मूल्यरूपेण यद्धनम् ।
सम्प्राहायि तदाप्याहं भृशमुद्विग्नमानसः ॥ २ ॥

ज्येष्ठा मे भ्रातरः श्रेष्ठाः प्रेष्ठाश्चेति कथं न्वहम् ।
मूल्यं भवद्भ्यो गृह्णीयां नैतन्मय्युपपद्यते ॥ ३ ॥

धनं वो न्यासरूपेण मयि स्थास्यति निश्चितम् ।
नैतदङ्गीकरिष्यामि भवद्भ्यः कथमप्यहम् ॥ ४ ॥

(उपजातिवृत्तम्)

दिल्लीमुपेतेषु पुनर्भवत्सु
प्रत्यर्पयिष्याम्यहमेतदद्धा ।
येन प्रकामं विशदो मम स्यात्
प्रत्यर्पितन्यास इवान्तरात्मा ॥ ५ ॥

सम्प्रेषयिष्येऽहमकालहीनं
काव्यं भवद्भ्यो बुधसत्तमेभ्यः ।
दृक्पातमात्रं भवताममुष्मिन्
सम्भावना स्यादिति तर्कयामि ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वृत्तैरनेकै रुचिरैर्निबद्धं
श्रीरामवृत्तौघनिरूपणाढ्यम् ।
यद्यावहेत्प्रीतिमिदं भवत्सु
नूनं मम स्यात्सफलः प्रयत्नः ॥७ ॥

इत्येतदुक्त्वैव समासतोऽहं
सर्वात्मना प्रार्थ्य भवच्छुभं च ।
विद्वज्जनस्नेहरसाप्लुतोऽहं
वाचं स्वकीयामुपसंहरामि ॥८ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१६.६.१९९२ दिनाङ्के पुरीस्थ डा० केशवचन्द्रदाशमहाभागान् प्रति प्रेषितं पत्रम्

प्रिया डा० दाशमहाभागाः,
सस्नेहाशिषः ।

(उपजातिवृत्तम्)

परेद्यवि प्राप्य भवत्प्रणीत-
मीशाभिधानं रमणीयकाव्यम् ।
आमूलचूलं परिशील्य तच्च
प्रमोदकोटिं परमां गतोऽहम् ॥ १ ॥

नवीनशैल्या रचितं तदेतत्
स्वच्छन्दवृत्तं सुमनःप्रमोदम् ।
गभीरभावाश्लथचारुबन्धं
बध्नाति चेतो रससञ्चयेन ॥ २ ॥

वर्धापना मे बहुशो भवद्भ्यो
ऽभिनन्दनानां च शतानि सद्भ्यः ।
काव्यैरनेकैः सुरवाचमेवं
समेधयन्तां सुखिनो भवन्तः ॥ ३ ॥

प्रियाः पुरीक्षेत्रकृताधिवासाः
सर्वेऽपि मे बन्धुजना वदान्याः ।
नमस्कृतिं मे विनिवेदनीया
इत्येतदुक्त्वा विरमामि वाचः ॥ ४ ॥

शुभेच्छुः
सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३.११.१९९२ दिनाङ्के वडोदरास्थान् डा० राजेन्द्रनाणावटीमहाभागान् प्रति प्रेषितं पत्रम्

प्रेयांसो राजेन्द्रनानावटीमहाभागाः,

विलसन्त्वत्रभवत्सु ममाशिषां राशयः ।

(अनुष्टुब्वृत्तम्)

दीपावलीशुभाशंसाः स्नेहपूरेण पूरिताः ।
भवद्भिः प्रेषिताः प्राप्य प्रमोदः परमो मम ॥ १ ॥

प्रभूतं सुखमेधन्तां 'लतया'ऽऽवेष्टिताश्चिरम् ।
श्रिया च परया युक्ताः कीर्त्या चापि समन्विताः ॥ २ ॥

मेधयाऽनुगता नित्यं धृत्या चापि वशे कृताः ।
भवन्त इति हृष्टेन मयाऽऽशीः सम्प्रयुज्यते ॥ ३ ॥

भवद्गुणगणावर्जितहृदयः

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

३.११.१९९२ दिनाङ्के मुज़फ़्फ़नगरस्थान् डा० उमाकान्तशुक्लमहोदयान् प्रति प्रेषितं पत्रम्

मान्या महाकवयो

जयतु भारती ।

(अनुष्टुब्वृत्तम्)

दीपावलीशुभाशंसाः स्नेहपूरेण पूरिताः ।
भवद्भिः प्रेषिताः प्राप्य परं मोदं समश्नुवे ॥ १ ॥

संस्कृतस्य प्रदीपोऽद्य निर्वास्यन्निव लक्ष्यते ।
जनानां विमुखत्वेन देवभाषामिमां प्रति ॥ २ ॥

सङ्कीर्तयन्ति ये चापि कण्ठेन महता गुणान् ।
अस्या गिरो न तेऽप्यस्या हृदयेन समर्थकाः ॥ ३ ॥

एतद्गिरः प्रदीपं चेज्ज्वलयेद्दीपमालिका ।
सर्वेषामपि नः सत्यं सफलाः स्युर्मनोरथाः ॥ ४ ॥

इत्येव विनिवेद्याहं सम्प्रार्थ्य च शिवं प्रभुम् ।
भवतां सकुटुम्बानां स्वां वाचमुपसंहरे ॥ ५ ॥

भवद्गुणगणावर्जितहृदयः
सुरसरस्वतीसमाराधनैकव्रतः
सत्यव्रतः शास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१९.२.१९९३ दिनाङ्के बैंकाकनगरात् डा० कृष्णलालमहाभागान् प्रति प्रेषितं पत्रम्

डा० कृष्णलालमहाभागाः,

सस्नेहाशिषः

(अनुष्टुब्वृत्तम्)

चिराय कुशलोदन्तं भवतां नाप्तवानिति ।
तं प्राप्तुं सुतरामस्मि सोत्कण्ठः परदेशगः ॥ १ ॥

आशासे सर्वथा स्वस्था मोदमानाः स्वके दमे ।
यापयन्ति भवन्तः स्वं कालं शास्त्रादिशीलने ॥ २ ॥

अत्र स्थितोऽहमप्येवं स्वं कालं व्यतियापये ।
नूत्नसंस्कृतसाहित्यमधीयानो मुदान्वितः ॥ ३ ॥

नाना ग्रन्था मया तात ! काव्यरूपकरूपिताः ।
आमूलचूलं यत्नेन निपुणं परिशीलिताः ॥ ४ ॥

शब्दावली प्रयुक्ता या तेषु चाभाणका अपि ।
तदभ्युच्चयकामः सन् स्वं व्यापारितवानहम् ॥ ५ ॥

सङ्गृहीता प्रयत्नेन सामग्री साम्प्रतं मयि ।
वर्तते ग्रन्थरूपेण तस्याः परिणतिर्भवेत् ॥ ६ ॥

इतीच्छा प्रबला चित्ते तदर्थं च प्रयत्नवान् ।
अहमस्मीति विदुषो भवतः प्रतिपादये ॥ ७ ॥

स्ववार्तं विनिवेद्याहं भवतां मङ्गलं तथा ।
सम्प्रार्थ्य सर्वभूतेशं स्वां वाचमुपसंहरे ॥ ८ ॥

सदा मङ्गलाभिलाषी
सत्यव्रतः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२.४.१९९३ दिनाङ्के वृन्दावनस्थश्रीरङ्गलक्ष्म्यादर्शसंस्कृतमहाविद्यालयप्राचार्यान् डा० मुरारिलालचतुर्वेदिमहाभागान् प्रति प्रेषितं पत्रम्

प्राचार्यमहाभागाः,

जयतु श्रीहरिः ।

(अनुष्टुब्वृत्तम्)

आसीषदं भवत्पत्रमगमं च मुदं पराम् ।
अनूनः सङ्गमान्नूनं बान्धवानां दलागमः ॥ १ ॥
प्रियं मे सुतरां सत्यं पत्रिकायाः प्रकाशनम् ।
अनेकदा तदर्थं स्वो भाव आविष्कृतो मया ॥ २ ॥
गुरुभिश्च विनेयैश्च प्रणेया लेखसन्ततिः ।
स्वोपज्ञा विषयांस्तांस्तान् विमृश्य निपुणं धिया ॥ ३ ॥
महाविद्यालयीया च कीर्तिर्वर्धिष्यते ध्रुवम् ।
हर्षोत्तरङ्गमस्माकं या चेतो वितनिष्यति ॥ ४ ॥
महाविद्यालयस्यास्य प्रतिष्ठा सुप्रतिष्ठिता ।
स्याद्रङ्गनाथकृपया दिक्षु चापि विदिक्षु च ॥ ५ ॥
एतन्नोऽभीप्सितं विज्ञा ! एतेन च कृतार्थता ।
अस्माकं यत्पूगस्येत्येतन्निःसंशयं वचः ॥ ६ ॥
शास्त्रज्ञशिक्षयाऽभ्यासे छात्राणां समुदीयुषी ।
शेमुषी लेखसन्दृब्धौ तान् ध्रुवं प्रेरयिष्यति ॥ ७ ॥
सत्कर्माभिरतिस्तेन तेनैव च महद्यशः ।
इत्येवोक्त्वा समासेन गिरं स्वामुपसंहरे ॥ ८ ॥

महाविद्यालयसर्वविधाभ्युदयाभिलाषुकः

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१४.४.१९९३ दिनाङ्के खेकड़ास्थ डा० रामकिशोरमिश्रमहाभागान् प्रति प्रेषितं पत्रम्

मान्या महाकवयः,

जयतु भारती ।

(अनुष्टुबवृत्तम्)

पत्रेणानेन सत्रैव पत्रमन्यदपेक्षितम् ।
प्रहिणोम्यविलम्बेन कार्यगौरवमाश्रितः ॥ १ ॥

आङ्ग्ल्योपनिबद्धं तद् भवेद्धिन्द्येति नो विदन् ।
लोकप्रसिद्धं पन्थानमेवेहाशिश्रियं बुधाः ! ॥ २ ॥

स्वतन्त्रे भारते वर्षेऽप्याङ्गलीं मन्वते बहु ।
अधिकारिण एतस्मात्सैवात्र मयकाऽऽश्रिता ॥ ३ ॥

यद्यत्र दर्शनं भिन्नं भवतां स्यात्तदा त्वहम् ।
हिन्द्यैव प्रेषयिष्यामि सद्य एवापरं दलम् ॥ ४ ॥

अन्यथा यदि वाञ्छेयुः समावेश्यमपेक्षितम् ।
निर्देश्यं तत्करिष्यामि तथैवेति वचो मम ॥ ५ ॥

मङ्गलं भवतां भूतभावनं प्रभुमर्थये ।
योगक्षेमं च सततं स्वां गिरं चोपसंहरे ॥ ६ ॥

भवद्गुणगणावर्जितहृदयोऽहं

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अभिनन्दनपद्यानि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

डा० धर्मेन्द्रनाथशास्त्रिणां पञ्चसप्ततिवर्षपूर्त्यवसरे रचितानि पद्यानि । तिथिसङ्केतोऽत्र नास्ति ।

(शार्दूलविक्रीडितं वृत्तम्)

लोके यस्य चकास्ति हारि चरितं सौजन्यजन्यं यशो
यो धत्ते, मतिवैभवस्य सुतरां यश्च प्रमाणे स्थितः ।
वन्द्यस्तर्कशिरोमणिर्निशितधीर्धर्मेन्द्रनाथाभिधो
विद्वान् शास्त्रवनालिसन्ततलसच्छार्दूलविक्रीडितः ॥ १ ॥

(उपगीतिवृत्तम्)

धर्मेन्द्रनाथनामा नामायं कृतिप्रवेकोऽद्य ।
वर्षाणि पूरयित्वा पञ्चोत्तरसप्ततिं जयति ॥ २ ॥

(इन्द्रवज्रावृत्तम्)

काव्येषु शास्त्रेषु कृतश्रमोऽयं
लोकाभिवन्द्यो विबुधाग्रगण्यः ।
विद्यार्थिसंसेवितपादपद्मो
जीव्यात् प्रहृष्टः शरदां शतानि ॥ ३ ॥

(रुचिरावृत्तम्)

रुचिराकृतिभिः कृतिभिः कृतिभि-
र्भुवि लब्धयशाः सततं मुदितः ।
हृदये स्मृतिभिः स्थिरतां गमितः
स्तुतिसत्कुसुमाञ्जलिभिः प्रणतः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

डा० धर्मेन्द्रनाथशास्त्रिणां पञ्चसप्ततिवर्षपूर्त्यवसरे रचितानि पद्यानि । तिथिसङ्केतोऽत्र नास्ति ।

(शार्दूलविक्रीडितं वृत्तम्)

लोके यस्य चकास्ति हारि चरितं सौजन्यजन्यं यशो
यो धत्ते, मतिवैभवस्य सुतरां यश्च प्रमाणे स्थितः ।
वन्द्यस्तर्कशिरोमणिर्निशितधीर्धर्मेन्द्रनाथाभिधो
विद्वान् शास्त्रवनालिसन्ततलसच्छार्दूलविक्रीडितः ॥ १ ॥

(उपगीतिवृत्तम्)

धर्मेन्द्रनाथनामा नामायं कृतिप्रवेकोऽद्य ।
वर्षाणि पूरयित्वा पञ्चोत्तरसप्ततिं जयति ॥ २ ॥

(इन्द्रवज्रावृत्तम्)

काव्येषु शास्त्रेषु कृतश्रमोऽयं
लोकाभिवन्द्यो विबुधाग्रगण्यः ।
विद्यार्थिसंसेवितपादपद्मो
जीव्यात् प्रहृष्टः शरदां शतानि ॥ ३ ॥

(रुचिरावृत्तम्)

रुचिराकृतिभिः कृतिभिः कृतिभि-
र्भुवि लब्धयशाः सततं मुदितः ।
हृदये स्मृतिभिः स्थिरतां गमितः
स्तुतिसत्कुसुमाञ्जलिभिः प्रणतः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रतिभाप्रविभानभृतः सुभृशं
स्वयशः सुयशा विविधं विबुधः ।
स्पृहणीयचरित्रतयाऽत्र जग-
त्यविगीतनिपीतसुनीतिसुधः ॥ ५ ॥

श्रीचिन्तामणिद्वारकानाथदेशमुखमहाभागान्प्रति तेषां विश्वविद्यालयानुदानायोगाध्यक्षपद-
नियुक्त्यवसरे प्रेषिता शुभाशंसा । तिथिसङ्केतोऽत्र नास्ति ।

(इन्द्रवज्रावृत्तम्)

शास्त्रेष्वधीती निपुणप्रतीति-
र्यस्य प्रिया भारतभारतीति ।
प्राचामपाचां विदुषां सुवाचा-
माचामकः प्राग्रहरो विभाति ॥ १ ॥

(उपेन्द्रवज्रावृत्तम्)

अलौकिकी कर्मविधानरीति-
र्दिगन्तविश्रान्तनितान्तकीर्तिः ।
मृदुस्वभावः प्रथितोऽसि लोके
सदा सदाचारविचारयुक्तः ॥ २ ॥

(उपजातिवृत्तम्)

त्वया सनाथा सुरभारतीय-
मभ्युन्नतिं कामपि विन्दतीति ।
आशंसमानो विरमामि वाच-
श्चिन्तामणिश्चिन्तितमेव सूते ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

श्रीमदनलालकुमारियामहाभागान् प्रति प्रेषिता नववर्षशुभाशंसा । तिथिसङ्केतोऽत्र नास्ति

नववर्षं शुभं भूयात्

अस्मिन्नवसरे श्रीमदनलालं प्रत्येतद्वचः—

(मालिनीवृत्तम्)

मदयति मदनश्चेत् पुष्पचापेन लोकान्
नहि किमपि विचित्रं चापसाध्यं तदेतत् ।
निजगुणगणशोभासौष्ठवेन त्वमार्य !
मदयसि मदनस्त्वं तेन लोके स्मृतोऽसि ॥ १ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रो० सरूपसिंहमहाभागानां दिल्लीविश्वविद्यालयकुलपतिपदे नियुक्तिमुद्दिश्य समर्पितम्
अभिनन्दनपत्रम्

(उपजातिवृत्तम्)

हस्तापचेयामितकीर्तिमन्तो
विद्वद्वरा गुण्यतमा भवन्तः ।
सरूपसिंहाभिधया लसन्तो
दिव्यां च लोकम्पृणतां भजन्तः ॥ १ ॥

प्रमाणभूता भुवि सज्जनानां
माधुर्यदाक्षिण्यगुणाकराश्च ।
सौजन्यजन्येन यशोभरेण
विभूषिताश्चापि सुपूजिताश्च ॥ २ ॥

सङ्कीर्तनार्थं भवतां गुणानां
शक्तो भवेत्किन्नु सहस्रजिह्वः ?
भावातिरेकेण तथाऽपि नोऽद्य
प्रसह्य वाचो मुखरा भवन्ति ॥ ३ ॥

वरीयसां वश्चतुरस्रशोभा
विद्यासु नैकासु सुखं प्रवृत्ता ।
बुद्धिर्नवोन्मेषगुणेन युक्ता
करोति सर्वांश्चकितान् गुणज्ञान् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उपार्जने ज्ञानचयस्य नित्यं
सक्ताः सुधीवर्यसदानुरक्ताः ।
गौराङ्गभाषासततप्रसक्ताः
सन्तोऽपि सन्तोऽमरवाचि रक्ताः ॥५ ॥

न केवलं ज्ञानचये पटुत्वं
प्रशासनेऽपि प्रविलोक्यते तत् ।
अभूतपूर्वः खलु वो गुणोऽयं
धात्रा कृतो लोकहिताय नूनम् ॥६ ॥

कार्यस्य भारं वहतां सतां वः
खेदो न वा श्रान्तिरथापि लक्ष्या ।
स्मेराननाः दिव्यगुणा भवन्तो
निरन्तरं लोकहिते प्रसक्ताः ॥७ ॥

(वसन्ततिलकावृत्तम्)

आनन्दयन्ति तिलका इव ये लसन्तः
सन्तो वसन्ततिलकानवधीरयन्तः ।
तान् भारतस्य तिलकान् विबुधाग्रगण्यान्
पद्यप्रसूनतिलकैर्वयमर्चयामः ॥८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रो० शेरसिंहसुपुत्र्याः उज्वलाशर्ममहाभागायाः सुपुत्रस्य सिद्धार्थस्य कृते ३०.१०.१९७३ दिनाङ्के प्रेषिताः शुभाशंसाः

(उपजातिवृत्तम्)

सौम्याकृतिं बुद्धिमतां वरं च
सिद्धार्थमालोक्य महान् प्रहर्षः ।
पूर्वेण पुण्येन निजेन जातः
स्वदेशसेवाव्रतिनां कुलेऽयम् ॥ १ ॥

(इन्द्रवज्रावृत्तम्)

सिद्धार्थ ! सिद्धिः परमा भवेत्ते
सिद्धार्थनाम्ना त्वमसि प्रसिद्धः ।
सिद्धार्थवत् ख्यातिमुपेयिवांश्च
जीव्याः शतं त्वं शरदां शतानि ॥ २ ॥

मातामहस्ते परमो यशस्वी
मातामही चापि विदां वरेण्या ।
तातश्च तीव्रप्रतिभानयुक्तो
माता च दिव्यां धिषणां बिभर्ति ॥ ३ ॥

(उपजातिवृत्तम्)

एवंविधस्त्वं 'विमला'न्तरात्मा
पुण्यात्मसेवाप्रसितो यशस्वी ।
वेदादिशास्त्राभ्यसनप्रसक्तः
कुले स्वमातुश्च पितुश्च पाहि ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(मालिनीवृत्तम्)

विमलमिह चरित्रं प्रोज्ज्वलां चापि कीर्तिं
वितरतु भगवांस्ते लोकलोकाधिदेवः ।
कमलमिव विकासं प्राप्नुहि त्वं प्रभाते
भुवि भवतु च सिद्धः सिंहवद्विक्रमस्ते ॥५ ॥

(वसन्ततिलकावृत्तम्)

धर्मे मतिर्भवतु ते सततोत्थितस्य
रागादिदोषपरिवर्जितमानसस्य ।
आनन्दधाम परमं त्वमुदात्तरूपं
तत्सत्पदं प्रतिपदं स्वमुपाश्रयस्व ॥६ ॥

पुण्यात्मनस्तव पुनः प्रकृतिप्रियस्य
लक्ष्मीर्यशः सुखमलं सकलं समृध्यात् ।
उद्यन्तमिन्दुमकलङ्कमिवापरं त्वां
दृष्ट्वा नृचित्तकुमुदानि समुल्लसन्तु ॥७ ।

(अनुष्टुब्वृत्तम्)

जातेर्देशस्य भाषायाः पित्रोर्गुरुजनस्य च ।
भूयाः सेवापरो नित्यमित्याशीस्ते प्रयुज्यते ॥८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१९७६ वर्षे दिल्ल्यां जनकपुर्यां समायोजिते कस्मिंश्चिदुत्सवे सभापतीन् पण्डितकमलापति-त्रिपाठिमहाभागानुद्दिश्य व्याहृतानि स्वागतपद्यानि

(द्रुतविलम्बितवृत्तम्)

विविधशास्त्रचयप्रतिभापति-
जर्गति कीर्तितहृद्ययशःपतिः ।
सफलताधिपतिर्जगतीतले
जयति दिव्यगुणः कमलापतिः ॥ १ ॥

सफलताफलकल्पतरुर्महान्
विविधचारुविचारविभूषितः ।
भरतभूमिजनादरभाजनं
जयति दिव्यगुणः कमलापतिः ॥ २ ॥

(उपजातिवृत्तम्)

रेलादिमन्त्रालयसुव्यवस्था-
विधानसम्प्राप्तयशा मनस्वी ।
नक्तन्दिवं लोकहिते प्रवृत्तश्-
चकास्ति यो विप्रकुलावतंसः ॥ ३ ॥

(वसन्ततिलकावृत्तम्)

बिभ्रत् सदैव तिलकं रुचिरं ललाटे
शोभां वसन्ततिलकादधिकां दधानः ।
यो भारतस्य तिलकस्तमुदारभावं
पद्यप्रसूनतिलकैर्वयमर्चयामः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(शार्दूलविक्रीडितम्)

बाढं गाढमगाढ गूढविषयं यः सांस्कृतं वाङ्मयं
स्वच्छन्दं विचरन्नमन्दमतनोच्छार्दूलविक्रीडितम् ।
वैशिष्ट्यं शशितुल्यमस्ति जनताप्रह्लादनं यस्य च
स श्रीमान् कमलापतिर्विजयतां माधुर्यवारांनिधिः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

श्रीशिवराममूर्तिमहाभागस्य पद्मभूषणोपाधिसत्कृतिमभिलक्ष्य कृतम्

अभिनन्दनम्

(उपजातिवृत्तम्)

शिवस्य रामस्य च दिव्यमूर्ती
यस्मिन् स्वयं दृष्टिपथं प्रयातः ।
एवंविधोऽस्मास्वतिहृद्यमूर्ति-
र्विराजते श्रीशिवराममूर्तिः ॥ १ ॥

शिवो जगत्याः शिवमातनोति
रामश्च तस्या रमयत्यथान्तः ।
शिवश्च रामश्च यथार्थनामा
विराजते श्रीशिवराममूर्तिः ॥ २ ॥

(इन्द्रवज्रावृत्तम्)

सम्पद्यमाने खलु प्राच्यविद्या-
सम्मेलने सर्वजनाभिनन्द्ये ।
धार्वाडनाम्ना प्रथिते सुरम्ये
निर्वाचितोऽध्यक्षपदे पुरेऽयम् ॥ ३ ॥

(उपजातिवृत्तम्)

कलासु दाक्ष्यं सकलासु यस्या-
भिलेखशास्त्रे च परं पटुत्वम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गीर्वाणवाणीप्रणयः परश्च
नूलार्थचिन्ताप्रसिता मतिश्च ॥ ४ ॥

स्वधर्मनिष्ठा परमा च यस्य
श्रद्धा च शास्त्रेषु परिश्रमश्च ।
स्वसंस्कृतौ चापि परोऽनुरागो-
स्त्येवंविधोऽयं शिवराममूर्तिः ॥ ५ ॥

पद्मस्य शोभा खलु यस्य वक्त्रे
विद्या तथा भूषणमद्वितीयम् ।
राज्येन तावत् खलु तत्समीक्ष्य
तदक्षरोपाधिरदाय्यमुष्मै ॥ ६ ॥

(इन्द्रवज्रावृत्तम्)

एवंविधं शास्त्रविदां धुरीणं
धर्म्ये स्थितं मार्गवरे च रम्ये ।
विद्वद्वरेण्यं शिवराममूर्तिं
श्राद्धाप्रसूनैर्वयमर्चयामः ॥ ७ ॥

सत्यव्रतशास्त्री
दिल्लीविश्वविद्यालयसंस्कृतविभागाचार्योऽध्यक्षः,
कलासङ्कायाध्यक्षश्च ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

५.६.१९७६ दिनाङ्के प्रेषिता श्रीकृष्णवल्लभाचार्याभिनन्दनसप्तपर्णी

(गीतिवृत्तम्)

कृष्णः परिपालयिता
जगतः सचराचरस्य सकलस्य ।
वन्द्यो भवति विशेषात्
तत्किं न तद्वल्लभोऽपि वन्द्यः स्यात् ? ॥ १ ॥

(अनुष्टुब्वृत्तम्)

महाकविर्महाविद्वान् महासत्त्वो महामतिः ।
श्रीकृष्णवल्लभाचार्यो महाकीर्तिविराजते ॥ २ ॥

(द्रुतविलम्बितवृत्तम्)

दिशि दिशि प्रथिता धवला गुणा
सकलविश्वगता महसां चयाः ।
बुधवरस्य कुशाग्रधियो ध्रुवं
भुवि यशःप्रकरं प्रवितन्वते ॥ ३ ॥

(आर्यागीतिवृत्तम्)

नन्दति विश्वं सर्व-
मभिनन्दनेऽस्य शास्त्रविबुधस्य ।
अभिलक्ष्य नन्दनमिति
पदस्याभिनन्दनस्यापरोऽप्यर्थः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(अनुष्टुब्वृत्तम्)

नानाग्रन्थप्रणेताऽयं बुधानां मूर्धनि स्थितः ।
श्रीकृष्णवल्लभाचार्यः पुरुषायुषमाप्नुयात् ॥ ५ ॥

इति शुभाशंसा
सुरसरस्वतीसमाराधनैकव्रतस्य
सत्यव्रतस्य शास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२५.१२.१९७६ दिनाङ्के सुप्रभातपत्रिकाया विशिष्टाङ्कमभिलक्ष्य जम्बूपुरवास्तव्यान् रामकृष्णशास्त्रिणोऽव्ययोपाह्वान् प्रति प्रेषिता

अभिनन्दनसप्तपर्णी

(अनुष्टुब्वृत्तम्)

सुप्रभातसमाख्यायाः पत्रिकाया मनोहरः ।
विशिष्टोऽङ्कोऽचिरेणैव प्राकाश्यं समुपैष्यति ॥ १ ॥

इत्येतद् वृत्तमासाद्य परं हर्षमुपागतः ।
धन्यान् वदामि भवतः सदा सत्कार्यसंरतान् ॥ २ ॥

(इन्द्रवज्रावृत्तम्)

जम्बूपुरेऽवस्थतिमाकलय्य
गीर्वाणवाणीप्रणयप्रणुन्नाः ।
तस्याः प्रचाराय कृतप्रयत्नाः
सन्तो भवन्तोऽव्ययकीर्तिमन्तः ॥ ३ ॥

(उपजातिवृत्तम्)

दशां वराकीं कृपणां प्रपन्ना
गीर्वाणगीर्यद् ध्रियतेऽधुनाऽपि ।
भवादृशामेव भवन्ति तत्र
निमित्तभूता ननु सत्प्रयत्नाः ॥ ४ ॥

रामस्य कृष्णस्य च पावनेऽस्मिन्
स्वर्गापवर्गस्य निमित्तभूते ।
देशे पुनः संस्कृतसत्प्रतिष्ठा
भवेदयं मे मनसोऽभिलाषः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(अनुष्टुब्वृत्तम्)

संस्कृतस्य प्रसारः स्याद्दिक्षु चापि विदिक्षु च ।
पूर्ववद् गौरवं तच्च लभतामिति कामये ॥ ६ ॥

(वसन्ततिलकावृत्तम्)

या रात्रिरावृतवती तमसां समूहै-
र्वाणीं चिराय भुवि संस्कृतनामधेयाम् ।
साऽपैतु सम्प्रति तमोहरमाविरास्ताम्
अत्यन्तहर्षकरमेव च 'सुप्रभातम्' ॥ ७ ॥

इति शुभाशंसा
सुरसरस्वतीसमाराधनैकव्रतस्य
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२१.२.१९७७ दिनाङ्के प्रेषितं श्रीकुन्दनलालशर्मशुभाशंसाष्टकम्

(उपजातिवृत्तम्)

शास्त्रेष्वधीती निपुणप्रतीती
रम्याकृती रम्यविचारवांश्च ।
आदर्शभूतो भुवि सज्जनानां
विराजते कुन्दनलालशर्मा ॥ १ ॥

वर्षाणि नाना विदुषां वरेण
नीतानि वेदाभ्यसनेन येन ।
स विद्वदग्र्यः परिनिष्ठितात्मा
विराजते कुन्दनलालशर्मा ॥ २ ॥

यदीयलेखान् विबुधा निपाठं
निपाठमायान्ति परं प्रहर्षम् ।
यदीयवैदुष्यविमुग्धभावा
यं संप्रशंसन्ति च मुक्तकण्ठम् ॥ ३ ॥

तस्यास्य नित्याभिरतस्य शास्त्रा-
नुशीलने पण्डिततल्लजस्य ।
सम्माननायां स्वत एव वृत्ता
वयं समस्ताः सुहृदः प्रहृष्टाः ॥ ४ ॥
सम्मानितस्यास्य जनस्य मानः
कैमर्थिकः स्यादिति नैव वाच्यम् ।
प्रकाशरूपो नहि तिग्मरश्मि-
र्दीपेन धूपेन च पूज्यते किम् ? ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(अनुष्टुब्वृत्तम्)

बृहतो वैदिकस्यायमितिहासस्य निर्मितौ ।
सहस्रद्वयपृष्ठस्य बृहन्तं तनुते श्रमम् ॥ ६ ॥

फलेग्रहिर्भवेदस्य श्रमो नातिचिरादिति ।
प्रार्थये पार्वतीजानिं भक्तिप्रवणचेतसा ॥ ७ ॥

(भुजङ्गप्रयातवृत्तम्)

यशःसौरभं सन्ततं सन्ततं स्याद्
भवेच्चास्य हर्षप्रकर्षप्रवर्षः ।
प्रियो बान्धवानां समेषां जगत्यां
समानां शतं व्यश्नुवीतायमायुः ॥ ८ ॥

इति शुभाशंसा
सुरस्वतीसमाराधनैकव्रतस्य
सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रोफेसरश्तीतनक्रॅनमहाभागानां पञ्चाशे जन्मदिवसे प्रेषितम् २९.६.१९८३दिनाङ्के

अभिनन्दनाष्टकम्

(इन्द्रवज्रावृत्तम्)

यूरोपभूमण्डलमध्यवर्ती
पारं समृद्धेः परमभ्युपेतः ।
नानानदीप्रस्रवणैः सुरम्यः
शर्मण्यदेशः सुतरां विभाति ॥ १ ॥

ट्यूबिंगनाख्यं नगरं चकास्ति
सौभाग्यशाल्युत्तममत्र देशे ।
नेकारनद्या निकटे निविष्टं
संवीजितं शीतलमन्दवातैः ॥ २ ॥

तत्रैव विख्याततमोऽस्ति विश्व-
विद्यालयो ज्ञाननिधिः पुराणः ।
विद्यार्थिनो ज्ञानपिपासवो यं
दिग्भ्यो विदिग्भ्यः समुपाव्रजन्ति ॥ ३ ॥

(उपजातिवृत्तम्)

तदङ्गभूतं खलु भारतीय-
विद्याधरं पीठवरं चकास्ति ।
गीर्वाणवाणीपरिशीलनोत्का
आयान्ति यच्छात्रगणाः समन्तात् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

राथाभिधैर्ग्लासनपाभिधानै-
थीमेऽभिधैश्चापि मनीषिवर्य्यैः ।
वर्षाणि नाना परिवर्धितं यद्
यशः समन्तात् स्वकमातनोति ॥ ५ ॥

(इन्द्रवज्रावृत्तम्)

तस्याधुनाऽध्यक्षपदे नियुक्तः
शास्त्राटवीसञ्चरणप्रसक्तः ।
भक्तः प्रभोर्विज्ञजनानुरक्त:
श्तीतन्क्रॅनो मान्यवरश्चकास्ति ॥ ६ ॥

(उपजातिवृत्तम्)

ह्रीरार्जवं सत्यमुदारता च
परोपकारप्रतिबद्धता च ।
कलासु दाक्ष्यं सकलासु चास्मि-
न्नविप्रवासेन गुणा वसन्ति ॥ ७ ॥

(इन्द्रवज्रावृत्तम्)

जीव्यादयं वर्षशतं सुखेन
ऋद्धिं समृद्धिं च समश्नुवीत ।
इत्येदर्थं प्रभुमर्थयेऽहं
पञ्चाशजन्मावसरे शुभेऽस्य ॥ ८ ॥

इति हृदयोद्गारा एतदभिन्नहृदयस्य
सदामङ्गलाभिलाषिणः
सत्यव्रतशास्त्रिणः
CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri ट्यूबिंगनगरम्

२८.३.१९८७ दिनाङ्के थाइदेशमहाराजकुमार्यास्त्रयस्त्रिंशं जन्मदिवसमुपलक्ष्य
समर्पिताः शुभाशंसाः

(उपजातिवृत्तम्)

प्रभातवेलेव विभासितार्था
क्षीरोदवेलेव विशुद्धरूपा ।
सर्वंसहेलेव दृढा स्वमार्गे
जीव्याः सुखं त्वं शरदां शतानि ॥ १ ॥

ज्ञानार्जनोन्मीलितसर्वविद्या
सूक्ष्मेक्षिकोद्भासितशास्त्रतत्त्वा ।
प्रकाशयन्ती यशसा दिगन्तान्
जीव्याः शतं त्वं शरदां शतानि ॥ २ ॥

(अनुष्टुब्वृत्तम्)

त्रिंशे जन्मोत्सवे रम्ये शुभे तव शुभेप्सुना ।
स्नेहात् सत्यव्रतेनेयमाशीराशिः प्रयुज्यते ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मुरादाबादनगरस्थश्रीगोकुलदासहिन्दुकन्यामहाविद्यालयरजतजयन्त्युत्सवमभिलक्ष्य प्रेषिता

तिथिनिर्देशरहिता

अभिनन्दनसप्तपर्णी

(आर्यावृत्तम्)

गोकुलदासहिन्द्विति कन्याविद्यालयस्य रम्यस्य ।
रजतजयन्तीकाले हृदि हर्षो नः समुल्लसति ॥ १ ॥

(इन्द्रवज्रावृत्तम्)

विद्या तृतीयं मनुजस्य नेत्रं
विद्या परो बन्धुरुदीरितोऽस्ति ।
विद्या सदैवाभ्युदयस्य हेतु-
र्विद्याविहीनः पशुभिः समानः ॥ २ ॥

(उपजातिवृत्तम्)

कुमारिकाभ्यः प्रददाति विद्यां
विद्यालयोऽयं सुकुमारिकाभ्यः ।
आचारपूताः परिपाठयन्ति
प्राध्यापिका अत्र विचारशीलाः ॥ ३ ॥

छात्राश्च जुष्टा अनुशासनेन
विद्यां प्रहृष्टाः समुपार्जयन्ति ।
तासां भृशं ज्ञानचये प्रसक्ति-
र्मिथोऽनुरक्तिश्च मुदावहे नः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

क्रीडासु लोकोपकृतौ तथा च
परं प्रकर्षं समुपेतवत्यः ।
छात्रा इहत्याः सुमनोरमस्य
विद्यालयस्य प्रथयन्ति कीर्तिम् ॥ ५ ॥

(इन्द्रवज्रावृत्तम्)

भूयोऽपि वृद्धिं समुपाश्नुवीत
स्वस्मिंश्च भूयो यश आदधीत ।
ज्योत्स्नेव चन्द्रस्य गुणैश्च भूयः
आह्लादयेदेष नृणां मनांसि ॥ ६ ॥

(अनुष्टुब्वृत्तम्)

इत्येषा प्रार्थना सत्यं विनयानतचेतसः ।
सत्यव्रताभिधानस्य दूरयातस्य शास्त्रिणः ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

थाइदेशमहाराजकुमार्याः पञ्चत्रिंशं जन्मदिवसमुपलक्ष्य २९.३.१९८९ दिनाङ्के प्रेषिताः

शुभाशंसाः

(उपजातिवृत्तम्)

नैकान् गुणानात्मनि धारयन्ती
लोकप्रिया लोकहिताय रक्ता ।
मेधास्मृतिभ्यामनपेतभावा
सिरिन्धरेतिप्रथिता विभासि ॥ १ ॥

(इन्द्रवज्रावृत्तम्)

त्रिंशच्च चत्वारि च यापयित्वा
वर्षाणि, वर्षे तव यः प्रवेशः ।
नूले, स ते बन्धुजनस्य सत्यं
हर्षप्रकर्षं हृदि तन्तनीति ॥ २ ॥

(उपजातिवृत्तम्)

लोकास्त्वदीयेषु गुणेषु रक्ता
भक्ताश्च भावाञ्जलिमपर्यन्तः ।
अनामयं ते कुशलं च नित्यं
सम्प्रार्थयन्ते प्रभुमीशमीड्यम् ॥ ३ ॥

(इन्द्रवज्रावृत्तम्)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

संवर्धमाना शशिनः कलेव
जीव्याः सुखं त्वं शरदां शतानि ॥ ४ ॥

वर्धापनाभिः प्रतिवर्षमेवं
हर्षप्रदे जन्मदिनेऽर्पिताभिः ।
वर्धापिता ज्ञानचये निमग्ना
कालं स्वकीयं गमयेः सुखेन ॥ ५ ॥

आराधिता प्राणपणेन वाचां
देवी प्रसन्ना त्वयि नित्यमस्तु ।
उद्घाट्य तुभ्यं च निजं रहस्यं
सर्वं तवानुग्रहमातनोतु ॥ ६ ॥

(उपजातिवृत्तम्)

इत्येव प्रार्थनमस्ति मान्ये !
शुभावहे जन्मदिने शुभे ते ।
दीर्घं च जीव्याः सुखमाप्नुयाश्च
दिगन्तविश्रान्तयशाश्च भूयाः ॥ ७ ॥

सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अभिभाषणपद्यानि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मम साहित्य अकादमी सम्मानमुपलक्ष्य दिल्लीस्थेन भारतीयविद्यासंस्थानेन डा० वी० के० आर० वी० राव महोदयानामध्यक्षतायां ३०.८.१९६९ दिनाङ्के समायोजितेऽभिनन्दनोत्सवे पठितानि पद्यानि

(अनुष्टुब्वृत्तम्)

शुक्लाम्बरधरां शुक्लां वीणापुस्तकधारिणीम् ।
भक्तक्षेमङ्करां नित्यं वाग्देवीं प्रणमाम्यहम् ॥ १ ॥

(उपजातिवृत्तम्)

दिगन्तविश्रान्तयशःप्रकाशा
वैदुष्यभारं दधतः सुखेन ।
ध्रुवं धरायां धिषणावताराः
श्रीरावपादाः प्रणतेर्ममार्हाः ॥ २ ॥

ह्रासं क्रमाद् यत्समुपागताऽपि
गीर्वाणवाणी न गता विलोपम् ।
तत्रानुरागातिशयो निमित्तं
भवादृशामेव बुधोत्तमानाम् ॥ ३ ॥

(अनुष्टुब्वृत्तम्)

भवादृशानां विदुषां लोकानुग्रहकाङ्क्षिणाम् ।
सदा सत्प्रेरणारूपं काव्यं मेऽस्तीति मे मतिः ॥ ४ ॥

गुरुगोविन्दसिंहस्याविगीतं चरितं मया ।
गीर्वाणानां गिरा गीतं विदुषां मुदमावहत् ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मम साहित्य अकादमी सम्मानमुपलक्ष्य दिल्लीस्थेन भारतीयविद्यासंस्थानेन डा० वी० के० आर० वी० राव महोदयानामध्यक्षतायां ३०.८.१९६९ दिनाङ्के समायोजितेऽभिनन्दनोत्सवे पठितानि पद्यानि

(अनुष्टुब्वृत्तम्)

शुक्लाम्बरधरां शुक्लां वीणापुस्तकधारिणीम् ।
भक्तक्षेमङ्करां नित्यं वाग्देवीं प्रणमाम्यहम् ॥ १ ॥

(उपजातिवृत्तम्)

दिगन्तविश्रान्तयशःप्रकाशा
वैदुष्यभारं दधतः सुखेन ।
ध्रुवं धरायां धिषणावताराः
श्रीरावपादाः प्रणतेर्ममार्हाः ॥ २ ॥

ह्रासं क्रमाद् यत्समुपागताऽपि
गीर्वाणवाणी न गता विलोपम् ।
तत्रानुरागातिशयो निमित्तं
भवादृशामेव बुधोत्तमानाम् ॥ ३ ॥

(अनुष्टुब्वृत्तम्)

भवादृशानां विदुषां लोकानुग्रहकाङ्क्षिणाम् ।
सदा सत्प्रेरणारूपं काव्यं मेऽस्तीति मे मतिः ॥ ४ ॥

गुरुगोविन्दसिंहस्याविगीतं चरितं मया ।
गीर्वाणानां गिरा गीतं विदुषां मुदमावहत् ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

इति जातः परो मोदः सन्तोषश्चातुलो मम ।
'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा' ॥ ६ ॥

भवत्स्नेहाभिभूतात्मा प्राञ्जलिः प्रब्रवीम्यहम् ।
भवाब्धितरणे सत्यं भवत्स्नेहोऽस्तु मे तरिः ॥ ७ ॥

भवादृशां हि विदुषामाशिषोऽस्म्यभिलाषुकः ।
नातः परतरं किञ्चिदन्यदिष्टमिहास्ति मे ॥ ८ ॥

(शार्दूलविक्रीडितवृत्तम्)

बाढं देवगिरार्चनार्पितमनास्तद्भक्तसेवी तथा
वाग्देवीचरणाब्जनित्यचरणे भृङ्गस्वरूपायितः ।
शास्त्रार्थप्रविवेकभूविचरणे सारङ्गसारायितः
स्वेष्टाराधनतत्परो गुरुरतो नित्यं भवेयं बुधाः ॥ ९ ॥

(अनुष्टुब्वृत्तम्)

एतदर्थं प्रयोज्या मय्याशिषो बुधसत्तमैः ।
प्रार्थनैषैव मेऽद्यास्ति कामोऽयं मे समृध्यतु ॥ १० ॥

सर्वेभ्योऽपि भवद्भ्योऽन्ते प्रणामाञ्जलिमर्पये ।
अभिभूतान्तरात्मा च स्वां वाचमुपसंहरे ॥ ११ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दिल्लीस्थे हस्तिनापुरमहाविद्यालये तदीयसंस्कृतपरिषद उद्घाटनावसरे परिषदा समायोजिते प्रोफेसरपदोपलब्ध्यभिनन्दनोत्सवावसरे च १०.९.१९७० दिनाङ्के पठितानि पद्यानि

(अनुष्टुब्वृत्तम्)

भक्ताः सुरसरस्वत्या भवन्तः सर्व एव हि ।
अहं च भक्तभक्तोऽस्मि भवद्दर्शनलालसः ॥ १ ॥

विभागाध्यक्षपदवीमध्यासितवतो मम ।
हर्षो यो भवतां जातस्तेन तुष्याम्यहं भृशम् ॥ २ ॥

भवादृशानां सुहृदां शुभाशंसा फलेग्रहिः ।
सञ्जातेत्येव मयका वक्तव्यं नात्र संशयः ॥ ३ ॥

(वसन्ततिलकावृत्तम्)

आशीर्वचो हि भवतां भवतापहारि
यत्प्राप्तमद्य मयका परमोपकारि ।
जातोऽस्मि तेन सुतरां मुदितान्तरङ्गो
दिव्यं निधिं हि समवाप्य न कः प्रहृष्येत् ॥ ४ ॥

(अनुष्टुब्वृत्तम्)

तोयगर्भा यथा मेघा धातुगर्भा यथाद्रयः ।
कल्याणगर्भा विदुषां तथैव ह्याशिषो मताः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(भुजङ्गप्रयातवृत्तम्)

तथा यत्न आस्थेय आस्थावताऽत्र
मया साह्यमास्थाय विद्वद्वराणाम् ।
जनानां यथा संस्कृतौ संस्कृते च
प्रवृत्तिर्भवेत् सन्ततं सम्प्रवृद्धा ॥ ६ ॥

(उपजातिवृत्तम्)

भवादृशानां सुहृदां गरीयान्
स्नेहो मयि स्याच्चिरसम्प्ररूढः ।
सदा च शास्त्राध्ययने प्रवृत्तिर्
दृढा च भक्तिर्जगदीश्वरेऽस्तु ॥ ७ ॥

देहलीस्थस्य
सत्यव्रतशास्त्रिणः

६.९.१९७०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

११.९.१९७० दिनाङ्के दिल्लीविश्वविद्यालयसंस्कृतविभागेन समायोजिते प्रोफेसरपदोपलब्ध्यभिनन्दनोत्सवे पठितानि पद्यानि

(अनुष्टुब्वृत्तम्)

सुहृद्वर्यैर्विपश्चिद्भिर्भाषणार्थं निमन्त्रितः ।
श्लोकैः कतिपयैरेव वचः स्वं वक्तुमुद्यतः ॥ १ ॥

परीवारेण मम यो मयि स्नेहः प्रदर्शितः ।
कृतज्ञताभराक्रान्तस्तेनास्मि सुखितो भृशम् ॥ २ ॥

स्निग्धोऽस्मि भवतां स्निग्धा भवन्तः सर्व एव मे ।
स्नेहः परस्परमयं प्रत्यहं वृद्धिमश्नुताम् ॥ ३ ॥

संस्कृतस्य प्रचाराय बद्धोद्योगा वयं समे ।
उन्नतिं हि गिरस्तस्याः सन्ततं कामयामहे ॥ ४ ॥

विभागविषये साध्वी व्यवस्था सम्प्रवर्तताम् ।
एतदर्थं भवत्साह्यव्यपेक्षा सुतरां मम ॥ ५ ॥

सर्वे सञ्चिन्त्य सञ्चिन्त्य कार्यं कुर्याम शोभनम् ।
दृढं संग्रथिता भूत्वा सूत्रे मणिगणा इव ॥ ६ ॥

उद्यानमिदमस्माकं नाना पुष्पैः सुशोभितम् ।
नानाप्रस्रवणैश्चापि दिव्यगन्धि मनोहरम् ॥ ७ ॥

नन्दनोद्यानवद्रम्यं नेत्रोत्सवकरं सदा ।
आश्चर्यभूतं लोकस्य राजधान्यां विराजते ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एतदुत्थः परिमलो दिशो नाना श्रयत्विति ।
कामना भवतां मे च शीघ्रं तां पूरयेत्प्रभुः ॥ ९ ॥

व्यवस्थाविषये किञ्चिद् वक्तव्यमिति चिन्तयन् ।
अत्यल्पैरक्षरैरेव वचस्तत्र प्रवर्तये ॥ १० ॥

कलाशालासु बह्वीषु प्रतिवर्षमनेकशः ।
विभागेन हि कर्तव्या अध्यापकनियुक्तयः ॥ ११ ॥

कृत्याकृत्ये विचार्येह मतमीदृशमस्ति मे ।
क्रमः कश्चित्समास्थेयो विभागहितकारकः ॥ १२ ॥

एम्० ए० कक्षापरीक्षायां प्रथमां श्रेणिमीयुषाम् ।
प्राप्तपीएच्ड्युपाधीनां नियुक्तिः प्रथमं भवेत् ॥ १३ ॥

निबन्धं प्रस्तुतवतां पीएच्ड्यर्थं ततः परम् ।
भवेन्नियुक्तिश्छात्राणां प्रथमां श्रेणिमीयुषाम् ॥ १४ ॥

पदकादिविजेतॄणां विशिष्टस्थानभागिनाम् ।
भवेदेम्० ए० परीक्षायां नियुक्तिस्तदनन्तरम् ॥ १५ ॥

आस्थीयमान एतस्मिन् क्रमे लोकसुखावहे ।
पक्षपातेन विधुरे सर्वः सन्तोषमेष्यति ॥ १६ ॥

अथ शोधप्रवृत्त्यर्थं वचः किञ्चन वच्म्यहम् ।
सुरवाचि प्रवीणानां प्रवाचां विदुषां पुरः ॥ १७ ॥

(भुजङ्गप्रयातवृत्तम्)

नवीना प्रवृत्तिर्भवेच्छोधकार्ये
नवीनं च कार्यं बुधैरत्र कार्यम् ।
विचार्यं तथा सम्प्रधार्यं स्वचित्ते
ततः कार्यसिद्धिर्भवेदस्मदीया ॥ १८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(मालिनीवृत्तम्)

समितिरिह यदि स्याच्छोधकार्यार्थमेका
सपदि बुधजनानां नो जनानां हिताय ।
अनुदिनमथ कार्यं तद्गतं या विचार्य
करणमकरणं वा निश्चिनोत्वस्मदर्थे ॥ १९ ॥

(आर्यावृत्तम्)

एवं विधीयमाने शोधप्रवृत्तिरास्माकीना स्यात् ।
मणिरिव शाणोल्लीढः समुज्ज्वला च सुग्राह्या च ॥ २० ॥

अथ किञ्चिद्वक्तव्यं शिष्टं वक्तव्यमेवेति ।
नाना विषयसुनिपुणा कोविदा विभावयन्त्वेतत् ॥ २१ ॥

स्मार्या मनसि च कार्या ग्राह्या निजजीवने च भृशम् ।
साधुः समन्वयः स्यादिति गीः प्रियदर्शिनो राज्ञः ॥ २२ ॥

(उपेन्द्रवज्रावृत्तम्)

समन्वयेनैव हि कार्यसिद्धिः
समन्वयेनैव च नः प्रतिष्ठा ।
समन्वयेनैव वयं स्थिताश्च
समन्वयोऽस्माद् धृदि धारणीयः ॥ २३ ॥

(उपजातिवृत्तम्)

इत्येव विज्ञान् विनिवेद्य सर्वान्
सप्रश्रयं प्राञ्जलिरर्थयेऽहम् ।
ध्रुवं भवद्भिः शुभकामवद्भिः
सद्भिश्च भाव्यं मयि सर्वदैव ॥ २४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(अनुष्टुब्वृत्तम्)

गरीयान् कार्यभारो हि निर्वोढव्यो मया बुधाः ।
भगवान् पार्वतीजानिः शक्ति मेऽच्छां प्रयच्छतु ॥ २५ ॥

निरन्तरं सुहृद्भिश्च प्रयोज्याः शुभकामनाः ।
मयीति प्रार्थये प्रह्वः स्वां वाचं चोपसंहरे ॥ २६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२१.९.१९७० दिनाङ्के हिन्दुकालेजेऽभिभाषणम्

(दोधकवृत्तम्)

दिल्लिपुरीसमवस्थितमद्य
हिन्दुकलालयमागत एष ।
मोदभरेण जनो भृतचित्तो
वाक्यविशेषनिवेदनसक्तः ॥ १ ॥

(वसन्ततिलकावृत्तम्)

छन्दोमयीं मधुमयीं गिरमाकलय्य
बीजाकरीं हि जगतः सचराचरस्य ।
छन्दोमयीं गिरमहं बिबुधाः ! प्रपन्नः
कश्चिद् भवेन्ननु तया भवतां विनोदः ॥ २ ॥

(आर्यागीतिवृत्तम्)

कवयोऽत्र सदसि सन्ति
श्रीरामकृष्णभट्टाद्या रसिका जनाः ।
कवयाम्यहं तथापि
कोकिलविरुतेषु न रुवन्ति किं विहगाः ॥ ३ ॥

(उपगीतिवृत्तम्)

अध्यक्षपदे मेऽभू-
न्नियुक्तिरिति यो भवन्मोदः ।
हृष्टं चित्तं तस्मा-
दब्धिजलं शशिकरैरिव मे ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(आर्यावृत्तम्)

प्रणयाद्वा बहुमानाद्-
वाऽऽशीर्या मयि प्रयुक्तेह बुधैः ।
मुदितस्तां कलयेऽहं
खनिमिव दीर्घां शुभस्य मम ॥ ५ ॥

(अनुष्टुब्वृत्तम्)

संस्कृतस्य प्रचाराय बद्धोद्योगोऽस्मि कोविदाः ।
सर्वात्मना यतिष्येऽहं तत्रेति वचनं मम ॥ ६ ॥

(उपजातिवृत्तम्)

विद्यां विना नास्ति सुखं नराणां
ध्रुवं जगत्यामिति वेदनीयम् ।
धर्मार्थमोक्षेषु कृताभियोगैः
सदैव विद्याभ्यसनं विधेयम् ॥ ७ ॥

(भुजङ्गप्रयातवृत्तम्)

प्रकारैश्चतुर्भिर्भवत्यागमाद्यैः
पुमर्थप्रसिद्ध्येह विद्योपयुक्ता ।
वचस्याह्निके पस्पशाख्येऽत्र पूज्या
महाभाष्यकाराः प्रमाणं भवन्ति ॥ ८ ॥

(अनुष्टुब्वृत्तम्)

अयमागमकालो वस्तस्माज्ज्ञानार्जने श्रमः ।
विधातव्यो ध्रुवं छात्रैर्योऽवश्यं स्यात्फलेग्रहिः ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

श्री'रामकृष्ण'वचसा युष्माभिः 'शुक्ल'रूपिणी ।
'योगं'[१] कञ्चित्समास्थाय समभ्यर्च्या सरस्वती ॥ १० ॥

भक्त्योपास्याश्च गुरवो गूढार्थज्ञानदायिनः ।
एतावदेव मे वाक्यमेतावदनुशासनम् ॥ ११ ॥

१. अत्र प्रसङ्गेन हिन्दुकलाशालाऽध्यापकानां श्रीरामकृष्णभट्टानां, डा० राजेन्द्र-शुक्लानां, डा० योगेश्वरदत्तशर्मणां च निर्देशः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कालिदाससमारोहावसरे नागरिकसम्मानवेलायाम् उज्जयिन्यां १३.११.१९७० दिनाङ्के पठितानि पद्यानि सद्योरचितानि

(शार्दूलविक्रीडितवृत्तम्)

सायाह्नेऽद्य मया समागतवता दृश्यं व्यलोक्यद्भुतं
रम्यं हृद्यमथो सदा सुमनसां प्रीतेः परं वर्धनम् ।
श्रीमन्तः कविवर्यधुर्यभिगता विद्वद्वरेण्याः पुरो
वर्त्तन्ते मम किन्वतः परमहो हर्षप्रदं सम्भवेत् ॥ १ ॥

(स्वागतावृत्तम्)

श्रीमतां सुमनसां पुरतोऽद्य
वर्तते सुमनसामिह राशिः ।
यैः सुगन्धिमरुतः खलु पूतास्-
ते पुनन्ति सुरभीणि सुमानि ॥ २ ॥

(अनुष्टुब्वृत्तम्)

उपस्थितेषु विद्वत्सु कविषु प्रथितेष्वहो !
मयापि किञ्चिद्वक्तव्यं हन्त चित्रा विधेर्गतिः ॥ ३ ॥

(वसन्ततिलकावृत्तम्)

श्रुत्वा ह्यनेककविकोकिलकूजितानि
तृप्तिर्भवेत्सुमनसां न मनाङ् मनःसु ।
काव्यामृतं दिविषदामपि लोभनीयं
स्यादित्यतोऽद्य मुदितोऽस्मि परं च तुष्टः ॥ ५ ॥

(अनुष्टुब्वृत्तम्)

इत्येतदेव भवतां निवेद्याहं पुरः सताम् ।
सम्प्रार्थ्य च महाकालं स्वां वाचमुपसंहरे ॥ ६ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१९७५ वर्षे दिल्लीविश्वविद्यालयेन समायोजिते संस्कृतनाट्यसमारोहे मुख्यातिथिपदमलंकुर्वतां पूर्वजर्मनीस्थबर्लिनविश्वविद्यालयसंस्कृतप्राध्यापकानां प्रो० डा० वोल्फगांग मार्गनराथ (Wolfgang Morgenroth) महाभागानां सम्मानार्थं व्याहृतानि पद्यानि ।

(उपजातिवृत्तम्)

योरूपभूमाविटलीतिनामा
ख्यातिं गतो देशविशेष एकः ।
गतोऽहमासं गतवर्ष एव
तत्र स्वराष्ट्रप्रहितः सुखेन ॥ १ ॥

ट्यूरीनपुर्यां खलु तत्र देशे
दिग्भ्यो विदिग्भ्यः समुपागतानाम् ।
बभूव सप्ताहमतीव रम्यं
सम्मेलनं संस्कृतपण्डितानाम् ॥ २ ॥

उपस्थितोऽत्रान्यतमोऽयमेषु
ख्यातिं गतो मार्गनराथनामा ।
शास्त्रेष्वधीती निपुणप्रतीति-
र्विपश्चितां प्राग्रहरस्तदाऽऽसीत् ॥ ३ ॥

श्रीबापनाम्ना पिशलेन चापि
विदां वरेण्येन च वेबरेण ।
आचार्यपीठं जगति प्रसिद्ध-
मध्यासितं विज्ञवरैर्यदास्त ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तदेव विद्वानधुनैष सौम्यो
ऽध्यास्तेऽतिसूक्ष्मेक्षिकयोपपन्नः ।
विद्वद्वराणां धुरि कीर्तनीयः
कीर्तिं गतश्चापि परां जगत्याम् ॥ ५ ॥

ट्यूरीनपुर्यां प्रथमं बभूव
विपश्चितैनेन मदीयसङ्गः ।
आभाषणं चापि बभूव तत्र
क्षणान् प्रगाढं कतिचिन्मनोज्ञम् ॥ ६ ॥

सम्बन्धमाभाषणपूर्वमाहु-
रित्येतदाख्यत् कविकालिदासः ।
वचो यथार्थं सुतरां तदस्ति
क्रान्तं कवेर्दर्शनमत्र भाति ॥ ७ ॥

सम्बन्ध आभाषणपूर्वकोऽभूद्
विपश्चितैनेन ममापि तत्र ।
सम्बन्धबन्धे सति च प्रजातं
मैत्र्यं मनोमोदकरं प्रकामम् ॥ ८ ॥

मैत्र्येण तेनैव हृदि स्थितेन
मुख्यातिथित्वाय निमन्त्रणं स्वम् ।
प्रादामहं विज्ञवराय चास्मा-
ययं च तत्सत्वरमभ्युपागात् ॥ ९ ॥

सोऽयं सुधीवर्य उपस्थितोऽस्मा-
स्वद्येति सत्यं कृतिनो वयं स्मः ।
सत्सङ्गतिः पुण्यवशेन जाता
कृतार्थतां निश्चितमादधाति ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वोल्फगांग मार्गनराथसम्मानपद्यानन्तरं पठितानि पद्यानि

(आर्यावृत्तम्)

नाट्योत्सवे सुरम्ये परिषदिहास्तेऽभिरूपभूयिष्ठा ।
अर्चामस्याः कुर्मो हृदयेन च मधुरवाग्भिश्च ॥ १ ॥

नाट्यकुतूहलयुक्ते रङ्गे तावत्प्रसत्तिमुपयाते ।
सत्यं यत्नो बलवानप्यस्माकं भवेत्सफलः ॥ २ ॥

(वसन्ततिलकावृत्तम्)

विद्याविलासलसिता विलसन्ति नाना-
विद्वद्वरा इह धराप्रविभूषणानि ।
तान्वीक्ष्य माति नहि मोदभरो मनस्सु
वार्धेर्यथा शशिकरप्रकरेण वारि ॥ ३ ॥

(उपजातिवृत्तम्)

विपश्चितां दर्शनमेव पुण्यं
तत्सङ्गतिः पुण्यतराऽस्ति चापि ।
पुण्यं च नः पुण्यतरं च नोऽद्य
यद्दर्शनं प्रापि च सङ्गतिश्च ॥ ४ ॥

(अनुष्टुब्वृत्तम्)

लोकान्तरङ्गरमणा श्रीराधारमणा अपि ।
अद्यास्मासु विराजन्ते परया कृपया युताः ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रभातचन्द्रशर्माणः प्रभातस्फूर्तिधारिणः ।
अस्मत्सन्निहिता अद्य प्रतिभाताखिलार्थकाः ॥ ६ ॥

अक्षयं हि यशो येषामक्षया शक्तिरेव च ।
तेऽक्षयकुमारजैना अद्य संनिहिता इह ॥ ७ ॥

तेषां तथेतरेषां च विदुषां स्वान्तरङ्गतः ।
स्वागतं व्याहराम्यद्य स्वं वचश्चोपसंहरे ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१९७६ वर्षे दिल्लीविश्वविद्यालयसंस्कृतविभागेन समायोजिते संस्कृतनाट्यसमारोहे पठितानि पद्यानि

मान्या महामहिमश्रीरवीन्द्रघरबरनमहाभागाः,
श्रीरत्नलालजोशीमहाभागाः,
श्रीनारायणदत्ततिवारिमहाभागा
उपस्थिताः प्रेयांसो विद्वांसश्छात्राश्च,

(अनुष्टुब्वृत्तम्)

समेषां भवतामत्र गैर्वाणीविदुषां हृदा ।
नाट्योत्सवे सुरम्येऽद्य स्वागतं व्याहराम्यहम् ॥ १ ॥

उत्सवोद्घाटनार्थाय स्वीकृत्य प्रार्थनां हि नः ।
रवीन्द्राख्या विदां वर्या अस्मास्वद्य समागताः ॥ २ ॥

(आर्यावृत्तम्)

सम्प्रति किञ्चिदुच्यते
वचनं सुधियो विभावयन्तु तदु ।
आयोज्यते त्रिदिवसो
ऽस्माभिर्नाट्योत्सवो ह्येषः ॥ ३ ॥

(अनुष्टुब्वृत्तम्)

त्रिष्वहःसु प्रयोक्ष्यन्ते रूपकाणि नवात्र वै ।
तानि सन्तो निरीक्षन्तां सदसद्व्यक्तिहेतवः ॥ ४ ॥
अभिनेत्र्योऽभिनेतारः सर्वेऽस्मच्छात्रका इह ।
कुशीलवकलायां हि न तेषां कौशलं भवेत् ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तथाऽपि कृतयत्नास्ते स्वं प्रयत्नं भवत्पुरः ।
समुपस्थापयिष्यन्ते भवन्मोदो भवेद्यतः ॥ ६ ॥

इत्याशंसन् बुधा नात्र विषये बहु वच्म्यहम् ।
सर्वेषां भवतां भूयः स्वागतं व्याहरामि च ॥ ७ ॥

सम्प्रत्याङ्गलभाषायां वचोऽहं स्वं प्रवर्तये ।
मुख्यातिथीनामन्येषां सौकर्यं परिलक्षयन् ॥ ८ ॥

(आर्यावृत्तम्)

कविराजशेखरवच उद्धृत्याहं समापये स्ववचः ।
उक्तिविशेषः काव्यं भाषा या भवति सा भवतु ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

धारवाडनगरे १९७६ वर्षे नवाम्बरे मास्यखिलभारतीयप्राच्यविद्यासम्मेलनस्याष्टाविंशेऽधि-वेशने तदीयलौकिकसंस्कृतवर्गस्याध्यक्षीयभाषणोपन्यासात्पूर्वं पठितानि पद्यानि

(अनुष्टुब्वृत्तम्)

विद्वद्गणैः समाकीर्णं शास्त्राणां पारदृश्वभिः ।
सद एतद्विभात्यद्य नभस्तारागणैरिव ॥ १ ॥

विद्वद्गणाभिजुष्टा या प्रसूनालिरिवालिभिः ।
सभा बद्धाञ्जलिस्तस्यै नमोवाकं प्रशास्म्यहम् ॥ २ ॥

आदिष्टोऽहं विपश्चिद्भिर्भवद्भिः कृतबुद्धिभिः ।
यथामति प्रयत्नेन किञ्चिद्वक्तुं समुद्यतः ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अमेरिकादेशान्तर्गतफिलाडेल्फियानगरस्थपेन्सिल्वेनियाविश्वविद्यालये समायोजिते षष्ठे विश्वसंस्कृतसम्मेलनेऽर्वाचीनसंस्कृतविषयिकायां चर्चागोष्ठ्याम् १४.१०.१९८४ दिनाङ्केऽध्यक्षीयभाषणोपन्यासात्पूर्वं पठितानि पद्यानि

(उपजातिवृत्तम्)

शास्त्राम्बुधेः पारमुपेयिवांसः
समेयिवांसोऽत्र विदां वरेण्याः ।
प्राचामपाचां विदुषां सुवाचा-
माचामकाः प्राग्रहरा जयन्ति ॥ १ ॥

समागमेनात्र सुखं समेषा-
मस्तीति सन्देहलवो न कश्चित् ।
सङ्गः सतां पुण्यतमो जगत्यां
सत्यं कमप्युत्सवमादधाति ॥ २ ॥

अर्वाक्तनैर्विज्ञवरैः कृतस्य
महीयसः संस्कृतवाङ्मयस्य ।
विद्वद्वराणां भवतां पुरस्ताद्
भाषाविवेकार्थमहं प्रवृत्तः ॥ ३ ॥

पुराणमित्येव न साधु सर्वं
न चापि सर्वं नवमित्यवद्यम् ।
इत्येव सञ्चिन्त्य कवेर्वचोऽहं
नूत्नाः कृतीर्द्रष्टुमभूवमुत्कः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

आलोडमालोडमिमा अनेका
वैचित्र्यमेतासु किमप्यवापम् ।
तदेव सद्भिः सह संविभक्तुं
सुदूरदेशात्समुपागतोऽस्मि ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दिल्लीस्थकिरोड़ीमलकालेजे कस्मिंश्चिदुत्सवे पठितानि पद्यानि । तिथिनिर्देशोऽत्र नास्ति

(अनुष्टुब्वृत्तम्)

किरोड़ीमलकालेजे समागत्य मयाऽद्य हि ।
यद्दृष्टं यच्छ्रुतं वाऽपि तेन तुष्यति मे मनः ॥ १ ॥

औपचारिकमेवेदं वचो नैवेति मन्यताम् ।
यथानुभवमेवात्र वचो व्याह्रियते मया ॥ २ ॥

अर्थगौरवसम्पन्नकाव्यशोभाविभूषितः ।
रवेर्भा इव दीप्तोऽभूद् भारविर्नाम काव्यकृत् ॥ ३ ॥

तत्काव्यान्मधुरा गीता पद्यालिर्मधुराक्षरा ।
श्रोत्रयोरमृतायन्ती हरत्येव बलान्मनः ॥ ४ ॥

भवतां सहयोगेन प्रतिस्पर्धा फलेग्रहिः ।
सञ्जाता येन दत्तोऽयं क्षणस्तोषप्रदः क्षणम् ॥ ५ ॥

सम्भावयेऽहमाशीर्भिर्नैकाभिः प्रतियोगिनः ।
विशेषतस्तु तान् यैर्हि पुरस्कारो जितोऽधुना ॥ ६ ॥

अतीव रुचिरेणाद्य हृदयावर्जकेन च ।
श्लोकपाठेन मुग्धोऽहं नान्यत्किञ्चिद्विचिन्तये ॥ ७ ॥

अतो न बहु वच्म्यत्र वाचो विग्लापनेन किम् ।
व्याहरन् साधुवादान् स्वां वाचं विरमयाम्यहम् ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

श्रीचिन्तामणिद्वारकानाथदेशमुखप्रशस्तिः । तिथिनिर्देशोऽत्र नास्ति

(शार्दूलविक्रीडितवृत्तम्)

श्रीविद्योभयसङ्गमं मतिमतां धुर्येषु सङ्कीर्तितं
मान्यैः कोविदसत्तमैरनुदिनं ध्याताङ्घ्रिपद्मद्वयम् ।
चिच्छक्तेः परमास्पदं सुमनसां संमोहनं चेतसां
तान्तक्लान्तजनार्तिहारिणमथो विद्वत्समाजोत्सवम् ॥ १ ॥

मन्त्रं लोकनमस्कृतं निजमनोवाञ्छाप्रदं सर्वहृन्-[1]
नित्यानन्दकरं महामहिमभिः सम्पूजितं सर्वदा ।
देशेऽस्मिन्विबुधैः प्रशंसिततमं लब्धप्रतिष्ठं बुधं
शस्याचारविचारचारुचरितं चेतश्चमत्कारकम् ॥ २ ॥

मुख्यं बुद्धिमतां प्रमां कृतधियां सन्देहभाजां नृणां
स्वोत्थानन्दविवर्धनेन वपुषा कान्त्या श्रिया संयुतम् ।
विद्वन्मौलिकिरीटमण्डनमथो तेजोभिराप्लावितं
वन्दे देशमुखं प्रियं गुणगणैरासेवितं सर्वदा ॥ ३ ॥

(युग्मकम्)

---

१. अनुनासिकस्य (८ ।४ ।४५) असिद्धत्वान्णत्वं (८ ।४ ।२) न भवेत् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रकीर्णपद्यानि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शिमलास्थस्यराजकीयनेहरूमहाविद्यालयस्य प्रारभ्यमाणायाः पत्रिकायाः श्यामलसुधायाः कृते शुभाशंसा

(अनुष्टुब्वृत्तम्)

जाह्नवीव त्रिपथगा भाषात्रयसुशोभिता ।
पत्रिका श्यामलसुधा सुधेव स्वाद्यतां बुधैः ॥

४.१.१९७१ दिने तनूजस्य शरच्चन्द्रस्यानुरोधेन सद्योनिर्मितं पद्यम्

(अनुष्टुब्वृत्तम्)

शरच्चन्द्रः समाधिस्थः सुतरामद्य शोभते ।
रघुवंशमधीयानः सर्वं साध्ववबुध्यते ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरस्थचुलालौङ्कौर्न विश्वविद्यालये सहयोगिनीं तस्सनीमुद्दिश्य १६.११.१९७७ दिनाङ्के सद्योरचितानि पद्यानि

(अनुष्टुब्वृत्तम्)

उष्णपेयमतिस्वादु सुतरां रुचिवर्धनम् ।
तस्सन्या स्नेहभावेन समानीतं कृते मम ॥ १ ॥

चुलालौङ्कोर्ननाम्न्यस्मिन् विश्वविद्यालये शुभे ।
आगतः सम्प्रसीदामि न कश्चिदिह संशयः ॥ २ ॥

अत्रत्या देवभाषायाः शिक्षका मयि हार्दिनः ।
मम तुष्टिः परा तेन दूरबन्धोरपि ध्रुवम् ॥ ३ ॥

वस्तुतो बन्धुभावो नो देशकालावपेक्षते ।
हृदयस्यैष सम्बन्धो यत्र कुत्रापि सम्भवेत् ॥ ४ ॥

स्वसृवत्स्नेहभावं मे तस्सनी सहयोगिनी ।
दधाति मयि तेनाहं कया वाचा स्तुयां नु ताम् ॥ ५ ॥

भावो जन्मान्तरीणो हि स्थिरः सम्बन्ध उच्यते ।
दृष्ट्वा बन्धुं प्रियं जन्मन्यस्मिञ्जागर्ति यः क्षणात् ॥ ६ ॥

नित्यं चिन्तयति ह्येषा सुखं च सुविधां च मे ।
अचिरादेव सम्पर्के वृत्तेऽपि सह मे तया ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कन्यारत्नं हि तां मन्ये ज्ञानार्जनपरायणाम् ।
सदा सेवापरां श्लक्ष्णवाचं बुद्धिमतीं तथा ॥ ९ ॥

एतादृश्याः स्वसुर्योगक्षेममारोग्यमेव च ।
प्रार्थये पार्वतीजानिं शास्त्री सत्यव्रताभिधः ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१९७८ वर्षे थाइदेशे भारतीयैर्नारायणमूर्तिर्बैंकाकनगरे प्रतिष्ठापिता ।

तदवसरे रचितानि पद्यानि । एतानि मूर्तिपीठे चतुर्दिशमुत्कीर्णानि ।

(वसन्ततिलकावृत्तम्)

श्यामाभिधेऽतिरमणीयतमे प्रदेशे
कोशीन्द्ररत्ननगरे नगराधिराजे ।
नारायणः सरसिजासनसन्निविष्टः
केयूरवांल्लसति शुक्लवपुः किरीटी ॥ १ ॥

छत्रं तनोत्युपरि यस्य सुचारु शेषो
यो राजते धृतगदाब्जसुशङ्खचक्रः ।
यश्चापि पात्यखिलविश्वमनन्तरूपो
ऽनन्तैर्जनैरहरहर्भुवि पूज्यते च ॥ २ ॥

कोशीन्द्ररत्ननगरस्य निवेशितस्य
संवत्सरद्विशतपूर्तिमभिप्रजाताम् ।
संलक्ष्य मोदभरितैः खलु भारतीयैः
संस्थापिता भगवतोऽत्र पवित्रमूर्तिः ॥ ३ ॥

सेयं प्रवासिजनमानसमानरूपा
तत्स्नेहमूर्तिरिव पुण्यतमा पृथिव्याम् ।
श्यामाय तैः सबहुमानमभिप्रदत्ता
तस्यानिशं विविधमङ्गलमातनोतु ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शर्मण्यदेशीयकार्यकालसमाप्त्यवसरे शर्मण्यदेशीयैः श्रीपायरमहाभागैः समायोजिते सौप्रस्थानिकोत्सवेऽभिभाषणम्

(उपजातिवृत्तम्)

शास्त्रेषु पारं परमभ्युपेतान्
सूक्ष्मेक्षिकाद्योतिततद्रहस्यान् ।
प्राचामपाचां विदुषां सुवाचा-
माचामकान् विज्ञवरान् नमामि ॥ १ ॥

(स्वागतावृत्तम्)

पायरस्य निलयं समुपेताञ्
श्रीमतो विविधशास्त्रविदोऽत्र ।
प्राञ्जलिर्बुधजनान् भवतोऽद्य
सादरं कृतधियः प्रणतोऽस्मि ॥ २ ॥

(रथोद्धतावृत्तम्)

पण्डितस्य नववेश्म शोभनं
पायरस्य विबुधस्य सुन्दरम् ।
पुस्तकैर्बहुविधैर्विराजते
पुस्तकीभवति पण्डितो यतः ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(प्रहर्षिणीवृत्तम्)

नूत्नेऽस्मिन् परमशुभे गृहेऽधिवासः
संभूयात्परमशुभाय पायरस्य ।
लोकेऽस्मिन्परमभिवर्द्धयेच्च कीर्तिम्
इत्येवं प्रभुमहमर्थये तदर्थम् ॥ ४ ॥

(उपजातिवृत्तम्)

ट्यूबिंगनाख्ये नगरेऽधिवासः
सुखाय मेऽभूत्परमाय विज्ञाः !
यस्य स्मृतिः स्थास्यति मेऽन्तरङ्गे
माध्वीकमाधुर्यधरा चिराय ॥ ५ ॥

काष्ठं च काष्ठं च यथा पयोधौ ।
संयुज्यते चापि वियुज्यते च ।
तथैव लोकः स्वयमेव लोके
संयुज्यते चापि वियुज्यते च ॥ ६ ॥

संयोगकाले मनसि प्रहर्षो
वियोगकाले सुमहच्च दुःखम् ।
सुखस्य दुःखस्य परम्परैषा
चित्रा विचित्रा विहिता विधात्रा ॥ ७ ॥

वियोगकाले समुपस्थिते मे
विदूयतेऽन्तःकरणं प्रकामम् ।
आन्दोलितं भावनया च भूयो
वातेरितः पोत इवाम्बुराशौ ॥ ८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दूरस्थितोऽहं भवितास्मि यद्य-
प्यकालहीनं वपुषा भवद्भ्यः ।
तथापि सत्यं भवितास्म्यदूरे
समीपता कायमपेक्षते किम् ? ॥ ९ ॥

(द्रुतविलम्बितवृत्तम्)

स्मृतिपथे यदि सम्भवति स्थितिः
क्षणमभिन्नहृदो भवतां मम ।
नियतमेव विभावयितास्म्यहं
सकलजीवनमेव फलेग्रहि ॥ १० ॥

(वियोगिनीवृत्तम्)

अथ योगवियोगभागयं
शुभमनुचिन्त्य विसृज्यतां जनः ।
गृहगमनाय चार्थ्यतां विभुः
'पुनरस्तु त्वरितं समागमः' ॥ ११ ॥

इति हृदयोद्गारा
भवदभिन्नहृदयस्य
सत्यव्रतशास्त्रिणः

ट्यूबिंगनगरम्
२४.६.१९८३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

श्रीमतीभिः पुष्पात्रिवेदिमहाभागाभिर्विरचितस्याग्निशिखाकाव्यस्य विषये सम्मतिः
(दिनाङ्कः १६.१२.१९८४)

(अनुष्टुब्वृत्तम्)

काव्यमग्निशिखेत्याख्यं समास्वाद्य मनोहरम् ।
अमन्दानन्दसन्दोहे निमग्नोऽहमसंशयम् ॥ १ ॥

(उपजातिवृत्तम्)

मनोहरं काव्यमिदं निपाठं
निपाठमायाति मनो न तृप्तिम् ।
भूयो रसास्वादनतत्परं सद्
बध्नाति भूयोऽपि च तत्र भावम् ॥ २ ॥

विद्वज्जनाकर्षणकेन्द्रभूता
विराजमाना गुणराजिभिश्च ।
वागत्र सत्यं प्रसभं मनांसि
हरेत्समेषामिति मे प्रतीतिः ॥ ३ ॥

रसैः सुपुष्टं समलङ्कृतं च
निर्दोषलेशं सुतरां च हारि ।
काव्यं भवत्या दृढसन्धिबन्धं
नेत्रद्वयासेचनकं विभाति ॥ ४ ॥

एतद्विधैः काव्यवरैरनेकै-
रापूरयेदत्रभवत्युदारम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सारस्वतं कोषमिति प्रपन्नो
नीलाचलेशं प्रभुमर्थयेऽहम् ॥ ५ ॥

सत्यव्रतशास्त्री

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२८.३.१९८७ तिथौ थाइदेशमहाराजकुमार्या भारतदेशात्प्रस्थानकाले समर्पितानि सौप्रस्थानिकपद्यानि

(उपजातिवृत्तम्)

कामप्यपूर्वां श्रियमादधाना
लोकप्रिया लोकहिताय रक्ता ।
गुणैरनेकैः परिवेष्टिता च
सिरिन्धरेति प्रथिता विभासि ॥ १ ॥

दिदृक्षया भारतदेशमाप्ता
निमन्त्रिता भारतशासनेन ।
अह्नां त्वमष्टादश यापयित्वा
देशं स्वकं सम्प्रति सम्प्रयासि ॥ २ ॥

न केवलं शिष्यवराऽसि मे त्वं
पुत्र्यप्यसीत्यत्र न संशयोऽस्ति ।
पुत्र्या वियोगेन पितुर्यथा स्याद्
दुःखं तथैवास्ति ममापि चित्ते ॥ ३ ॥

दिनानि यानि व्यतियापितानि
त्वया समं देवि ! मया सुखेन ।
न विस्मरिष्यामि कथञ्चनापि
तानीति निर्मायमहं ब्रवीमि ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

त्वद्विप्रयुक्तान्निजबान्धवांस्त्वं
हर्षाप्लुतान् कर्तुमितः प्रयासि ।
त्वद्विप्रयोगाश्रुविलुप्तधैर्यं
म्लानाननं सम्प्रति मां विहाय ॥ ५ ॥

यात्रा शुभा ते सुखदा च भूया-
च्छ्रेयश्च देयाद्दिविषद्गणस्ते ।
हर्षप्रकर्षस्त्वयि चापि वृष्याद्
हृद्यं यशस्ते च सदा समृध्यात् ॥ ६ ॥

इति शुभकामनाः
सदा मङ्गलाभिलाषिणः

सत्यव्रतशास्त्रिणः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रूसदेशक्रान्तिमभिलक्ष्य कदाचिद्रचितानि पद्यानि । भूयो रचनाभिलाषेऽपि न प्रवृत्ता रचना कार्यान्तरव्यासङ्गवशात्

रूसक्रान्तिः

(उपजातिवृत्तम्)

यूरेशियाख्ये स्थितिमान् विशालो
खण्डे भुवः सर्वजनप्रसिद्धः ।
नानानदीभिश्च नदैश्च जुष्टो
रूसाख्यदेशः सुतरां विभाति ॥ १ ॥

अकृष्टपच्यं नहि यत्र सस्यं
हिम्याः सदा यत्र च वान्ति वाताः ।
उद्योगशीलां जनतां वितन्व-
च्छैत्यं न सौभाग्यविलोपि यत्र ॥ २ ॥

अनारतं श्राम्यति यत्र लोकः
स्वकृत्यजाते सुतरां प्रसक्तः ।
रक्तध्वजो देशहिताय रक्तो
हृष्टश्च पुष्टश्च सदा च तुष्टः ॥ ३ ॥

मदीयमेवेति न कश्चिदत्र
द्रव्यार्जनायोद्यममातनोति ।
समं विभज्यार्जनमेव सन्तः
साम्येति नाम्ना समुदीरयन्ति ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भूमिः समेषां विभवः समेषा-
मुद्योगयन्त्राणि तथा समेषाम् ।
हितं समेषामिति सत्यमेव
प्रवर्तते तत्र हि साम्यवादः ॥ ५ ॥

बाल्यात्प्रभृत्यातरुणं जनौघो
गृह्णाति शुल्केन विनैव शिक्षाम् ।
धनी न वा यत्र न वा दरिद्रो
सर्वे समं भावमुपाश्रयन्ति ॥ ६ ॥

राज्यं प्रजारञ्जनमेव यत्र
व्यष्टेर्हितं यत्र हितं समष्टौ ।
सर्वः सुखी स्यादिति सत्प्रवृत्त्या
सर्वः स्वकं कर्म समातनोति ॥ ७ ॥

वृद्धा जराजर्जरिताः कृशाङ्गाः
क्लिष्टा भृशं कष्टकरैश्च रोगैः ।
तेषां समेषामुपचारहेतोः
सच्छासनेन क्रियते व्यवस्था ॥ ८ ॥

नूत्ना व्यवस्था नवजीवनं वा
क्रान्तिः कदाऽभूत्पुनरत्र देशे ।
कथं प्रवृत्तेति समस्तमेतद्
गीर्वाणवाण्येह समुद्गिरामि ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ट्यूबिंगननगरम्

(इन्द्रवज्रावृत्तम्)

यूरोपभूमण्डलमध्यवर्ती
पारं समृद्धेः परमभ्युपेतः ।
नानानदीप्रस्रवणैः सुरम्यः
शर्मण्यदेशः सुतरां विभाति ॥ १ ॥

(उपजातिवृत्तम्)

विराजमानं गिरिमेखलासु
सौन्दर्यमत्यद्भुतमादधानम् ।
नेकारनद्या निकटे निविष्टं
ट्यूबिंगनाख्यं पुरमस्ति तत्र ॥ २ ॥

विराजितं पादपराजिभिर्यद्
विभूषितं श्यामलभूमिभागैः ।
अभ्रंलिहाग्रैर्भवनैरनेकै-
रलङ्कृतं नेत्रसुखं ददाति ॥ ३ ॥

आकीर्णपुष्पस्तबका वसन्ते
दीर्घा अपूर्वा सुषमां दधानाः ।
पूर्णैः फलानां तरुभिः प्रपूर्णा
विभान्ति यत्रत्यविहारवीथ्यः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कारण्डवैः पाण्डुभिरानमद्भिः
सुखेन यद्वारिणि सन्तरद्भिः ।
मध्येपुरं पूर्णजला वहन्ती
यत्रास्ति नेकारनदी सुरम्या ॥ ५ ॥

ट्यूबिंगनवर्णनमितिसमाख्या-
दप्रकाशितात्काव्यात्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

२६.३.१९९० दिनाङ्के रचितं दिल्लीतः प्रकाश्यमानायां संस्कृतामृतम् पत्रिकायां प्रकाशितम्

श्रीकिशोरीलालस्मृत्यष्टकम्

(उपजातिवृत्तम्)

लब्ध्वा जनिं पञ्चनदप्रदेशे
दीनार्तसेवानिरतेन येन
यशोऽर्जितं दिक्षु भृशं किशोरी-
लालाह्वयं तं सुतरां स्मरामः ॥ १ ॥

स्वजन्मभूमौ सुरवाचमेषो
ऽवहेलनां प्राप्तवतीं विलोक्य ।
तान्तान्तरङ्गः सुतरां तदर्थं
प्रयत्नमातिष्ठत यावदायुः ॥ २ ॥

संस्थाप्य गुण्यो निजजन्मभूमौ
सम्मेलनं संस्कृतवाच एषः ।
तस्याः प्रसारे निरतो बभूव
तदास्त तस्मै प्रथमो नु कल्पः ॥ ३ ॥

मूलस्य संरक्षणमस्ति याव-
च्छाखादिसंरक्षणमस्ति तावत् ।
इत्येव सम्यग् हृदि सम्प्रधार्य
स मूलसंरक्षणतत्परोऽभूत् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मूलं हि नः संस्कृतमेव सत्यं
सर्वं हि तत्रैव समाहितं नः ।
तद्रक्षणे भारतसंस्कृतिः स्यात्
संरक्षितेत्यत्र न संशयोऽस्ति ॥ ५ ॥

सङ्कल्पमेवं मनसि प्रधार्या-
विचार्य कार्यान्तरमेष विद्वान् ।
तद्रक्षणे पुण्यतमे महात्मा
व्यापारयामास निरन्तरं स्वम् ॥ ६ ॥

उदेति तस्य स्मृतिरद्य चित्ते
भृशं तदुद्वेल्लयतीव चापि ।
लोकान् स्वपुण्यौघजितान् गतेऽपि
भूलोक एष स्थितिमान् स्वकीर्त्या ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१२.९.१९९२ दिनाङ्के दिल्लीसंस्कृतअकादम्या समायोजितेऽखिलभारतीय संस्कृतपत्रकार-सम्मेलनोद्घाटनावसरे पठितानि पद्यानि

(अनुष्टुब्वृत्तम्)

शुक्लाम्बरधरां शुक्लां वीणापुस्तकधारिणीम् ।
भक्तक्षेमङ्करां नित्यं वाग्देवीं प्रणमाम्यहम् ॥ १ ॥

(उपजातिवृत्तम्)

दिगन्तविश्रान्तयशोविलासान्
गीर्वाणगीःसुप्रकटप्रकाशान् ।
महापुरीं भारतराजधानीं
दिल्लीमुपेतान् भवतो नमामः ॥ २ ॥

गतेऽपि वर्षे समभूदिहैव
गोष्ठी वरिष्ठा भवतां ततो नः ।
महान् प्रमोदो हृदि यो न माति
वाचा च यो वर्णयितुं न शक्यः ॥ ३ ॥

(इन्द्रवज्रावृत्तम्)

सम्पादकाः संस्कृतपत्रिकाणां
सन्तो भवन्तो विबुधाग्रगण्याः ।
सम्पादकाः सन्ति हितस्य सत्यं
गीर्वाणवाण्या विषमेऽद्य काले ॥ ४ ॥

(उपजातिवृत्तम्)

कष्टानि सोढ्वापि बहूनि नित्यं
प्रचारयन्तो भुवि देववाणीम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

स्वपत्रिकामाध्यमतोऽतिधीरान्
वयं कृतज्ञा भवतो नताः स्मः ॥ ५ ॥

सत्यप्यभावे बहुसाधनानां
वैमुख्यभावेऽपि तथा जनानाम् ।
ह्रासे च लोकस्य रुचेः प्रजाते
कालप्रभावात् प्रति देववाणीम् ॥ ६ ॥

निरन्तरं तत्परिवर्धनोत्कास्-
तस्याः प्रचाराय च बद्धनिष्ठाः ।
स्वकष्टजातं विगणय्य भूरि
सन्तो भवन्तोऽत्र नमस्यभूताः ॥ ७ ॥

लेखस्य कष्टं च धनस्य कष्टं
कष्टं तथा मुद्रणसंविधायाः ।
सञ्चालनं संस्कृतपत्रिकाणा-
मसंशयं कष्टपरम्परैव ॥ ८ ॥

सोढ्वाऽपि तां कष्टपरम्परां ये
दिवानिशं तत्र कृताभियोगाः ।
संसेवनीया सुरभारतीति
वन्दामहे तान् भवतोऽत्र भक्त्या ॥ ९ ॥

दिनत्रयं यावदिह स्थितानां
सुखेन गच्छत्विति नोऽभिलाषः ।
सुखेन सिद्धिं समुपैतु कार्य-
मिहत्यमित्येव न इष्टमस्ति ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बैंकाकनगरस्थ थाइभारतपत्रिकायां १९९० वर्षे प्रकाशिता
श्रीबुद्धदेवप्रशस्तिः

(इन्द्रवज्रावृत्तम्)

शास्तेतिनाम्ना प्रथिमानमाप्तो
बुद्धः प्रबुद्धो जनताहिताय ।
पन्थानमुत्कृष्टतमं जगत्या-
मुद्भावयामास विचित्रबुद्धिः ॥ १ ॥

(उपजातिवृत्तम्)

जनास्तमेतं जगतीतलेऽत्र
विभिन्नदेशारचिताधिवासाः ।
असङ्ख्यसङ्ख्याः परिपालयन्ति
जन्म स्वकीयं च कृतार्थयन्ति ॥ २ ॥

(इन्द्रवज्रावृत्तम्)

लब्ध्वा जनिं राजकुलेऽपि येन
रोगं च मृत्युं च जरां च वीक्ष्य ।
वैराग्यमार्गः समुपाश्रितोऽभूद्
दुःखान्तकृत्कृत्स्नसुखानि हित्वा ॥ ३ ॥

(उपजातिवृत्तम्)

तपस्यताऽनेन तपश्चिराय
बुद्धत्वमापद्य विलक्षणेन ।
सिद्धार्थताऽलाभि यथार्थतोऽपि
यशोधरत्वं भुवि चाप्यनन्यम् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

भूतेष्वहिंसा मुदिता च मैत्री
चेत्यादि लोकानशिषत्स धर्मम् ।
धर्मं च बुद्धं च तथा च सङ्घं
गच्छन्तु सर्वे शरणं हिताय ॥ ५ ॥

स्वस्येति यो वाचमुदाजहार
लोकम्पृणां लोकहितानुरक्तः ।
नितान्ततान्ते जनताऽन्तरङ्गे
प्रावाहयत्सौख्यतरङ्गिणीं यः ॥ ६ ॥

धर्मोपदेशोऽस्य महाजनस्य
सार्धान् सहस्रद्वयवर्षपूगान् ।
प्रवर्तमानं मुदमातनोति
तनोति कल्याणपरम्परां च ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शान्दोरवरेशनाम्नो हंगरीदेशीयमहाकवेः कवितायाः संस्कृतपद्यरूपान्तरम्

प्रबलवेगवती धारा

(उपजातिवृत्तम्)

लघौ श्लथे वाऽम्बुद उच्चकैः स्वं
दीपं दधाना च विभज्यमाना ।
द्विधा प्रकाशेन निशीथकाले
शिलोच्चये नृत्यविधौ प्रसक्ता ॥ १ ॥

क्षौमं वसाना मृदु चापि वासो
वगुण्ठिता चारुणिमानिलेन ।
धारा वहत्येव निरन्तरालं
सन्दीर्णसम्प्रोच्चशिलान्तरालम् ॥ २ ॥

एषा द्रुतं धावति देवदारु-
द्रुमावलीमध्यमतोऽस्ति पृच्छा ।
तवोद्भवो नाम कुतोऽयमीदृग्
यत्तेऽङ्गवस्त्रं हरते न जातु ॥ ३ ॥

समुद्रवातो, न शिलाग्रभाग-
शिरासु सङ्क्रामति ते च बिम्बम् ।
विदारका नाम भवन्ति यत्र
स्वयं विदीर्णत्वपदं प्रयाताः ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तटानुवर्तीनि च नैव बिम्बं
सानूनि जातु स्पृशतीति चित्रम् ।
तवाकृतिर्नैव बिभर्ति चापि
मरुस्थली कामपि हन्त ! मुद्राम् ॥ ५ ॥

कुटीरमत्यन्तमसुन्दरं भोस्-
तवागमे प्रेमपदं बिभर्ति ।
सम्प्रस्थिता कुत्र नु दिव्यरूपे
किञ्चापि वा वाञ्छसि नोऽग्निना त्वम् ॥ ६ ॥

जाज्वल्यमाना न मदीयदन्तास्-
त्वत्पादमूलान्तिकमेतुमीशाः ।
तरस्यहो ! अग्निविषोपरि त्वं
प्रदग्धरोज़ाख्यसुमेषु चापि ॥ ७ ॥

सन्दृश्यतेऽङ्गारकराशिरद्धा
शीतं तया भस्म पतत्समन्तात् ।
कृष्णश्च लोभोऽथ च दुःखमद्धा
ऽवशिष्यते केवलमेतदेव ॥ ८ ॥

(अनुष्टुब्वृत्तम्)

नानाद्युतत्त्वरूपे त्वं किं तद्गेहं नु मां वद ।
आकारयसि यत्र त्वं ममागमनकाङ्क्षया ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शान्दोरवरेशनाम्नो हंगरीदेशीयमहाकवेः कवितायाः संस्कृतपद्यरूपान्तरम्

आन्तरिकादनन्तात्परम्

(उपजातिवृत्तम्)

यदा कदाऽन्तःस्थितिकादनन्तात्
पश्यामि तारागणमम्बरेऽहम् ।
मन्दप्रकाशं, जलदं तथा च
निरन्तरं स्वाननमाध्यनेन ॥ १ ॥

(इन्द्रवज्रावृत्तम्)

नेत्रद्वयं श्रान्तमिति प्रपद्य
तिष्ठाम्यहो ! अन्यजना इवाहम् ।
बाह्येन विश्वेन कृतं पिधानं
द्वारावलेरासमहं च मुक्तः ॥ २ ॥

(उपजातिवृत्तम्)

तत्रैव यत्राऽऽस्त न भूमिलेशो
व्योमैव सर्वत्र च दृश्यते स्म ।
न जायते स्मापि च तत्र किञ्चिन्-
न विस्मयो वा न च वाऽऽस्त शोभा ॥ ३ ॥

नीहारिका नो न समा च भूमिस्-
तत्र स्थिरं तत्त्वमभूत् प्रकाशम् ।
सीमा न यस्यास्त न चावधिर्वा
न चापि तन्नाम बभूव किञ्चित् ॥ ४ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

प्रेमास्त तद्यन्नहि किञ्चिदेव
कस्माच्चन प्रार्थयतेऽविकारः ।
क्षुब्धं जगद् द्वारमुपागतं सद्
विक्षिप्त धूर्तातितरां च दृप्त ! ॥ ५ ॥

(उपजातिवृत्तम्)

एतैः पदैर्मां सुतरां क्षिणोति
विरम्यतां भोयहमालपामि ।
मस्तिष्कमध्ये मम कन्दुरस्ति
तद्रोटिका जीवनसाधनं ते ॥ ६ ॥

(अनुष्टुब्वृत्तम्)

दिने कस्मिंश्चिदेव स्याद् भोज्या चापि भवेत्त्वया ।
उष्णैव भोज्यतां गच्छेत्तवेत्येव वचो मम ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अचिरप्रारब्धस्य विश्वमहाकाव्यस्य प्रारम्भिकाणि पद्यानि

(उपजातिवृत्तम्)

देशैरनेकैर्लघुभिर्बृहद्भिर्
नानाजनैरध्युषितैर्विचित्रैः ।
अङ्गे गजानां रचितेव भक्ति-
र्विचित्ररूपा जगती विभाति ॥ १ ॥

सन्त्येषु केचित्सुतरां पुराणा
नूलास्तथाऽन्ये विलसन्ति केचित् ।
प्रलत्वनूलत्वसमागमोऽत्र
विचित्रतां काञ्चन तन्तनीति ॥ २ ॥

प्रत्येकमेषु प्रसभं प्रवृत्तं
कालप्रभावात्खलु वृत्तचक्रम् ।
नूलां दिशं यद्भ्रमयाम्बभूव
तदीयमैतिह्यमहो ! बलेन ॥ ३ ॥

तद्वृत्तचक्रस्य निरूपणायां
गीर्वाणवाण्याऽहमभिप्रवृत्तः ।
कार्यस्य कार्यस्य सुदुष्करत्वात्
कुलालचक्रस्थ इव भ्रमामि ॥ ४ ॥

विराट्स्वरूपं ननु विश्वमेतद्
देशा लसन्त्यत्र परश्शताश्च ।
एकैकशोऽपि प्रबलानि वृत्ता-
न्येषु प्रथेरन् बहुसङ्ख्ययैव ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

विद्वानपीदं प्रबलेच्छयैव
कार्यं सुदुःसाधमहं चिकीर्षन् ।
दोर्भ्यां प्रतर्तुं जलधिं विशालं
यादोभिराक्रान्तमभिप्रवृत्तः ॥ ६ ॥

(उपजातिवृत्तम्)

तत् साहसं मे विबुधाः क्षमन्तां
पश्यन्तु मां चापि शिवेक्षणेन ।
न साहसानाश्रयिणो जनाः स्युः
कल्याणभाजो जगतीतलेऽत्र ॥ ७ ॥

काव्येऽत्र संक्षेपधियैव सत्यं
प्रवृत्तिमान् वर्णयितुं यतिष्ये ।
विश्वस्य विश्वस्य विलक्षणानि
वृत्तानि वृत्तानि पुरा युगेषु ॥ ८ ॥

रङ्गस्थली विश्वमिदं विभाति
नानाविधानां खलु सभ्यतानाम् ।
तथैव नानाविधसंस्कृतीनां
क्रीडास्थलीभूतमिदं चकास्ति ॥ ९ ॥

कालेन कालेन बभूवुरासु
बहूनि तावत् परिवर्तनानि ।
तद्वर्णनं स्याद्रुचये जनाना-
मित्यर्थमेवात्र मम प्रवृत्तिः ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ऐतिह्यमालोड्य विभिन्नदेश-
जातस्य सम्यग्विनिबन्धनेऽहम् ।
विश्वाभिधानस्य निजस्य नूल-
काव्यस्य निर्माणविधौ प्रसक्तः ॥ ११ ॥

(अनुष्टुब्वृत्तम्)

उपन्यस्तं मया यद्यदिह काव्ये विचक्षणाः ।
प्रमाणसहितं तत्तन्नान्यथेति वचो मम ॥ १२ ॥

काव्यं सहृदयैरुक्तं हारि सुग्राह्यमेव च ।
विनिर्गता अतो हेतोः काव्यरूपा गिरोऽत्र मे ॥ १३ ॥

सन्तो दृक्पातमात्रेण करुणावरुणालयाः ।
इदं सम्भावयेयुश्चेत् सफलः स्यान्मम श्रमः ॥ १४ ॥

स्निग्धानां स्मरणैः पूतं देशदेशान्तरे स्थिताम् ।
वर्णयत् सांस्कृतीं निष्ठां पत्रकाव्यं समाप्तिमैत् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उपसंहारः

(उपजातिवृत्तम्)

अनेकदेशीयमुदन्तजातं
निरूपयद् बन्धुजनाननेकान्।
स्पृशत्तदीयां कुशलादिवार्ता-
मन्यच्च जिज्ञासितमास्त यत्तैः ॥ १ ॥

परस्सहस्रै रुचिरैर्निबद्धं
पद्यैरिदं चेद्रुचिमादधीत।
सूक्ष्मेक्षिकाणां मम पत्रकाव्यं
तदा भवेन्मे सफलः प्रयत्नः ॥ २ ॥

अवाप्यते दिवगिरा निबद्धं
न पत्रसाहित्यमिति प्रपद्य।
प्रवृत्तिमानासमहं स्वकीय-
पत्रोत्करस्य त्वरितं प्रसिद्धौ ॥ ३ ॥

नात्मप्रसिद्धिर्मम संमताऽस्ति
न वा नवा कीर्तिरभीप्सिता च।
मय्यस्ति यद् वस्तु भवेत्परेषां
तदित्ययं मे मनसोऽभिलाषः ॥ ४ ॥

एवं कदाचित् परिदृश्यते यद्
यथा स्वकीयः स्फुटतामुपैति।
पत्रेण भावः प्रहितेन बन्धून्
तथा न लेखान्तरमाध्यमेन ॥ ५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अतः प्रशंसन्ति बुधप्रवेकाः
सन्देशसम्प्रेषणकार्यहेतौ ।
पत्रादि, तत्रैव भवेन्निबद्धो
भावः स्वको बन्धुभिरात्तभावैः ॥ ६ ॥

(इन्द्रवज्रावृत्तम्)

दूरस्थबन्धूनिदमेव वार्त-
वृत्तादिसम्प्रेषणमाध्यमेन ।
कांश्चित्क्षणान् सान्त्वयितुं समर्थ-
मात्यन्तिकोत्कण्ठितचित्तवृत्तीन् ॥ ७ ॥

(उपजातिवृत्तम्)

पुरा कपोतादिशकुन्तसाध्यं
पत्रादिसम्प्रेषणमास्त यत्तत् ।
अद्यास्ति नानाविधसाधनैस्तु
साध्यं मनस्तोषकरं विचित्रैः ॥ ८ ॥

महत्त्वमस्य प्रविचारयन्तः
सङ्कल्पमेतं हृदये वयं चेत् ।
गीर्वाणवाणीप्रणयेन कुर्मः
सम्प्रेषणे संस्कृतबद्धपत्रे ॥ ९ ॥

बन्धून् स्वकीयान् सुरवाचि रक्तान्
भवेत्तदा संस्कृतवाङ्मयर्द्धिः ।
ऋद्ध्या पुनः संस्कृतवाङ्मयस्य
स्वयं भवेत्संस्कृतविद्वद्वृद्धिः ॥ १० ॥ (युग्मकम्)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

इत्येव सञ्चिन्त्य समृद्धिकामैः
प्रेष्याणि पत्राणि सुहृज्जनान् स्वान्।
गीर्वाणवाण्यैव विशेषतस्तान्
ये सन्ति तस्यां सुतरां प्रसक्ताः ॥ ११ ॥

आङ्ग्लादिभाषान्तरवाङ्मयेषु
तत्तत्सुधीभी रचितो विशालः।
पत्रोत्करस्तैर्गमितः प्रसिद्धिं
नेत्रद्वयासेचनको विभाति ॥ १२ ॥

(उपजातिवृत्तम्)

न संस्कृते यत्परिदृश्यते त-
च्चेतोरुजं काञ्चन तन्तनीति।
अतो ध्रुवं तत्परिहारहेतो-
र्यत्नो विधेयः सुविचारवद्भिः ॥ १३ ॥

मम प्रयासो यदि तद्दिशायां
बुधान् भवेत् प्रेरयितुं समर्थः।
धन्यं तदाऽऽत्मानमवश्यमेव
मन्येय मेऽतः परमस्ति नेष्टम् ॥ १४ ॥

न केवलं पत्रनिबन्धनायां
वाचाऽमराणां स्वमनः प्रदेयम्।
विद्वद्भिरन्यत्र बहुत्र चापि
न यत्र तेषामभवत् प्रयत्नः ॥ १५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अतः प्रशंसन्ति बुधप्रवेकाः
सन्देशसम्प्रेषणकार्यहेतौ ।
पत्रादि, तत्रैव भवेन्निबद्धो
भावः स्वको बन्धुभिरात्तभावैः ॥ ६ ॥

(इन्द्रवज्रावृत्तम्)

दूरस्थबन्धूनिदमेव वार्त-
वृत्तादिसम्प्रेषणमाध्यमेन ।
कांश्चित्क्षणान् सान्त्वयितुं समर्थ-
मात्यन्तिकोत्कण्ठितचित्तवृत्तीन् ॥ ७ ॥

(उपजातिवृत्तम्)

पुरा कपोतादिशकुन्तसाध्यं
पत्रादिसम्प्रेषणमास्त यत्तत् ।
अद्यास्ति नानाविधसाधनैस्तु
साध्यं मनस्तोषकरं विचित्रैः ॥ ८ ॥

महत्त्वमस्य प्रविचारयन्तः
सङ्कल्पमेतं हृदये वयं चेत् ।
गीर्वाणवाणीप्रणयेन कुर्मः
सम्प्रेषणे संस्कृतबद्धपत्रे ॥ ९ ॥

बन्धून् स्वकीयान् सुरवाचि रक्तान्
भवेत्तदा संस्कृतवाङ्मयर्द्धिः ।
ऋद्ध्या पुनः संस्कृतवाङ्मयस्य
स्वयं भवेत्संस्कृतविद्वदृद्धिः ॥ १० ॥ (युग्मकम्)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

इत्येव सञ्चिन्त्य समृद्धिकामैः
प्रेष्याणि पत्राणि सुहृज्जनान् स्वान् ।
गीर्वाणवाण्यैव विशेषतस्तान्
ये सन्ति तस्यां सुतरां प्रसक्ताः ॥ ११ ॥

आङ्ग्लादिभाषान्तरवाङ्मयेषु
तत्तत्सुधीभी रचितो विशालः ।
पत्रोत्करस्तैर्गमितः प्रसिद्धिं
नेत्रद्वयासेचनको विभाति ॥ १२ ॥

(उपजातिवृत्तम्)

न संस्कृते यत्परिदृश्यते त-
च्चेतोरुजं काञ्चन तन्तनीति ।
अतो ध्रुवं तत्परिहारहेतो-
र्यत्नो विधेयः सुविचारवद्भिः ॥ १३ ॥

मम प्रयासो यदि तद्दिशायां
बुधान् भवेत् प्रेरयितुं समर्थः ।
धन्यं तदाऽऽत्मानमवश्यमेव
मन्येय मेऽतः परमस्ति नेष्टम् ॥ १४ ॥

न केवलं पत्रनिबन्धनायां
वाचाऽमराणां स्वमनः प्रदेयम् ।
विद्वद्भिरन्यत्र बहुत्र चापि
न यत्र तेषामभवत् प्रयत्नः ॥ १५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

महाजनैरारचिताः प्रसिद्धैर्-
भाषान्तरेष्वात्मकथाः प्रसिद्धाः ।
न तत्समाः सन्ति गिरा सुराणां
तत्राभियोगो विदुषामभीष्टः ॥ १६ ॥

या अप्यथो दृष्टिपथं प्रयान्ति
न मूलतस्ताः सुरवाङ्निबद्धाः ।
अनूदितास्ताः परवाङ्मयेभ्यस्
ताश्चापि बह्व्यो नहि हन्त सन्ति ! ॥ १७ ॥

श्रीनेहरोर्वाऽप्यथ गान्धिनो वा
तथेतरस्यापि च कस्यचित्स्युः ।
अनूदितास्ता गिरया सुराणां
न संस्कृतेन प्रथमं निबद्धाः ॥ १८ ॥

सन्त्येव देशेऽत्र परश्शता ये
महाजनेति प्रथिमानमाप्ताः ।
विद्वत्प्रवेकाः सुरगीर्निबन्धे-
ऽप्यनन्यसामान्यवचःप्रवाहाः ॥ १९ ॥

कर्तुं क्षमा आत्मकथाप्रबन्ध-
मनेकवृत्तान्तविशेषरम्यम् ।
तैरत्र देयं स्वमनो विशेषाद्
गीर्वाणगीर्वाङ्मयवृद्धिकामैः ॥ २० ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

(इन्द्रवज्रावृत्तम्)

दैनन्दिनस्यापि च वाङ्मयस्य
गीर्वाणवाण्यां सुतरामभावः।
पारस्यभाषादिषु तत्तु रोज़-
नाम्चेति नाम्ना विपुलं चकास्ति ॥ २१ ॥

(उपजातिवृत्तम्)

आङ्ग्लादिभाषासु च डायरीति-
ख्याता अनेकाः कृतयो मनोज्ञाः।
दिने दिने वृत्तमभिप्रवृत्तं
सुधीजनानामुपवर्णयन्ति ॥ २२ ॥

प्रत्येकमह्नो घटते गुरोर्यद्
यज्जीवने कस्यचनापि तत्तत्।
तदीयशिष्याः क्रमशः स्ववाचा
पारस्यदेश्या उपवर्णयन्ति ॥ २३ ॥

यद्यच्च तेषां गुरवो ब्रुवन्ति
यद्यच्च तेऽन्यैः सह चर्चयन्ति।
हितेच्छया वोपदिशन्ति यद्यल्
लिखन्ति शिष्याः स्वगिरा हि तत्तत् ॥ २४ ॥

पारस्यदेशे सुतरां प्रसिद्धः
प्रवर्ततेऽद्यापि शुभः क्रमोऽयम्।
प्राक्कालिकानामपि येन बोधः
सञ्जायते नैकबुधाग्रगाणाम् ॥ २५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एतद्विधा पद्धतिरस्मदीये
न सांस्कृते वाङ्मय इत्यतो नः ।
न नामबोधोऽपि पुरातनानां
सहस्रशः संस्कृतपण्डितानाम् ॥ २६ ॥

(अनुष्टुब्वृत्तम्)

शिष्यै रचितमेतादृग् गुरुसम्बन्धि वाङ्मयम् ।
पारस्यां कीर्त्यते वाचि मल्फूज़ातेति संज्ञया ॥ २७ ॥
तत्रत्यं विपुलं चापि पत्रवाङ्मयमद्भुतम् ।
बुधैर्मक्तूब्निगारीति संज्ञया तत्र कीर्त्यते ॥ २८ ॥

संस्कृतेऽपि भवेदेतद्यदि तर्हि समेधितम् ।
भवेत्तद्वाङ्मयं भूयो मनाङ् मे नात्र संशयः ॥ २९ ॥

अद्यावध्यसमृद्धोंऽशः समृद्धस्तेन सम्भवेत् ।
इति सञ्चिन्त्य सोत्साहं प्रक्रन्तव्यं बुधैरिह ॥ ३० ॥

चिन्तयित्वैतदेवायं स्वकीयः पत्रसङ्ग्रहः ।
पत्रकाव्याभिधानेन प्राकाश्यं गमितो मया ॥ ३१ ॥

इति श्रीचारुदेवाख्यविद्वत्तल्लजसूनुना ।
रचितः पत्रकाव्याख्यः सत्यव्रतेन शास्त्रिणा ॥
अर्पितो भावपुष्पाढ्यः सुहृद्विद्वज्जनेषु च ।
प्रीतये भूयसा भूयात् तेषु श्रद्धासुमाञ्जलिः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अनुक्रमण्यः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एतद्विधा पद्धतिरस्मदीये
न सांस्कृते वाङ्मय इत्यतो नः ।
न नामबोधोऽपि पुरातनानां
सहस्रशः संस्कृतपण्डितानाम् ॥ २६ ॥

(अनुष्टुब्वृत्तम्)

शिष्यै रचितमेतादृग् गुरुसम्बन्धि वाङ्मयम् ।
पारस्यां कीर्त्यते वाचि मल्फूज़ातेति संज्ञया ॥ २७ ॥
तत्रत्यं विपुलं चापि पत्रवाङ्मयमद्भुतम् ।
बुधैर्मक्तूब्निगारीति संज्ञया तत्र कीर्त्यते ॥ २८ ॥

संस्कृतेऽपि भवेदेतद्यदि तर्हि समेधितम् ।
भवेत्तद्वाङ्मयं भूयो मनाङ् मे नात्र संशयः ॥ २९ ॥

अद्यावध्यसमृद्धोंऽशः समृद्धस्तेन सम्भवेत् ।
इति सञ्चिन्त्य सोत्साहं प्रक्रन्तव्यं बुधैरिह ॥ ३० ॥

चिन्तयित्वैतदेवायं स्वकीयः पत्रसङ्ग्रहः ।
पत्रकाव्याभिधानेन प्राकाश्यं गमितो मया ॥ ३१ ॥

इति श्रीचारुदेवाख्यविद्वत्तल्लजसूनुना ।
रचितः पत्रकाव्याख्यः सत्यव्रतेन शास्त्रिणा ॥
अर्पितो भावपुष्पाढ्यः सुहृद्विद्वज्जनेषु च ।
प्रीतये भूयसा भूयात् तेषु श्रद्धासुमाञ्जलिः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अनुक्रमण्यः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अनुक्रमण्यः

१. देशनामानुक्रमणी

अमेरिका ३१,२२३
इटली २१७
कनाडा ३१
कम्बुजदेश १३६
जापान ३३
थाइदेश, थाइप्रदेश ३४,३५,३६,३८,८१,९६,१११,२००,२३४
बेल्जियम ४३,७२
भारतदेश, भारतवर्ष ५८,१२९
मलयेशिया १२९,१४०,१४१
मारिशस १०८
म्यांमार (बर्मा) १२९,१४३,१४५
रूस २४२
लाओस १२९,१३७
शर्मण्यदेश (जर्मनी) ४३,४९,५५,५९,६९ ७८,१०१,१२३,२३२
हंगरी २५२,२५४
हालैण्ड ७३
हिन्देश्या, हिन्देशिया १२९,१३५,१३८

२. नगरनामानुक्रमणी

अयोध्या ९०
इन्दौर ७६
इन्द्रप्रस्थ ४०
उज्जयिनी ४६,२१६
कुरुक्षेत्र ७४,७५
कोशीन्द्ररत्न २३४
क्रुङ्थेव (बैंकाकनगरस्य थाइभाषानाम) ८१
खन्ना १०
खेकड़ा (मेरठ) १५७,१७३
गुरुकुल कांगड़ी १३
चांग्मायी ३६
जकार्ता १४०
ज्ञानपुर ६७
ट्यूबिंगन ४२,६९,१९३,२३७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दरभङ्गा १८४
दानापुर (पटना) ५१
दिल्ली २४,५७,११७,१२४,१८५,२०५, २०७,२०९,२२६,२४६
धार्वाड, धारवाड १८७,२२३
नगरश्रीधर्मराज ९६,९८
नाभा १५८
पटना ७७
पटियाला १२,१५
पाटलीपुत्र ७७
पुरी (क्षेत्र) ४५,५७,६३,११५,१५४,१६८
फिलाडेल्फिया २२४
बुलन्दशहर २२
बैंकाक २६,२९,३१,८०,८३,८६,९३,९५, ९८, १०२, १०४, १०७, ११५, ११७, १२६,१२८,१३१,१५१, २३२,२३७, २५०
भद्रक १२२
भुवनेश्वर ६२
मलक्क १४०
मलेरकोटला ४१
मिथिला १४४
मुज़फ्फ़रपुर ३८
मुरादाबाद १९८
राज्ञीक्षेत्र (रानीखेत) १२
रोहतक १८,४०
लङ्का १३५,१४४
ल्यूवेन ४३
विरामपुर (बदायूं) २१
वृन्दावन १६५,१७२
श्यामला, श्यामलपुरी (शिमला) ६२,६६
श्रीगङ्गानगर ६६

५. ग्रन्थनामानुक्रमणी

अग्निशिखा २४०
इरा ४१
ईशः १६८
कन्काविन १३८
थाइदेशविलासम् ३८
थाइरामायणम् ८७,९३
पत्रकाव्यम् २५८
बृहत्कथामञ्जरी ९४
बृहत्सप्तपदी १५९,१६४
फलक् फलाम् १३३,१३७
भूपरिक्रमणम् १८४
मङ्गलानक्षत्रम् १५८
यात्राप्रसङ्गीयम् १६२
रघुवंशम् २३१
रामकीर्ति (महाकाव्यम्) ९०, १०२, १०७, ११५,१५२,१५७,१६६
वियोगवल्लरी ११०
विश्वमहाकाव्यम् २५६
वेतालपराजयम् १६०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

६.संस्कृतपत्रिकानामानुक्रमणी

थाइभारत २५०
दिव्यज्योतिः ६,८६
श्यामलसुधा २३१
संस्कृतामृतम् २४६
सुप्रभातम् १९१

७. संस्थानामानुक्रमणी

कामेश्वरसिंहसंस्कृतविश्वविद्यालय (दरभङ्गा) १८४
किरोड़ीमल कालेज (दिल्ली) २२५
कैथोलिक विश्वविद्यालय (ल्यूवेन, बेल्जियम) ७२
गोकुलदास हिन्दुकन्यामहाविद्यालय (मुरादाबाद) १९८
चुलालौङ्कौर्न विश्वविद्यालय (बैंकाक) २३२
दिल्लीविश्वविद्यालय १८०
दिल्लीविश्वविद्यालय संस्कृतविभाग २०९, २१७,२२१
दिल्ली संस्कृत अकादमी २४८
पेन्सिल्वेनिया विश्वविद्यालय (अमेरिका) २२४
भारतीय विद्या संस्थान २०५
राजकीय नेहरू महाविद्यालय (शिमला) २३१
श्रीरङ्गलक्ष्मी आदर्श संस्कृतमहाविद्यालय (वृन्दावन) १७२
साहित्य अकादमी २०५
हस्तिनापुरमहाविद्यालय २०७
हिन्दुकालेज २१३

८. विशिष्टफलनामानुक्रमणी

थुर्यन् १०३
मङ्कुट १०३
लीची १०३
लुकडो १०३

९. देवतानामानुक्रमणी

कृष्ण ४८
नारायण ८८,८९,१५२,२३४
बलदेव ४८
बुद्ध २५०
राम ९०,१४७,१५१,१५२
विष्णु ४६,८८
विश्वकर्मा ४७
शक्र ९०
सीता १३३,१३४,१३६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

१०. व्यक्तिविशेषनामानुक्रमणी

अक्षयकुमार जैन २२०
अनोमतन् ८७
इन्दिरा गान्धी ५६
इन्द्रद्युम्न ४६
उज्ज्वला शर्मा १८२
उमाकान्त शुक्ल १७०
उर्वी २८,८३
एगर्मण्ट ४३
कपिलदेव द्विवेदी ६७
कमलापति त्रिपाठी १८५
कमलेश मिश्र ६४
किशोरीलाल २४६
कुन्दनलाल शर्मा १९३
कुम्भकर्ण १३५
कृष्णलाल ९, २६, २९, ३१, ३३, ३५,७१, ८०,८३,८६,९३,९५,९८,१०२,१०४, १०७,११७,१२६,१२७,१७२
कृष्णवल्लभाचार्य १८९
केशवचन्द्र दाश १६८
केशवशर्मा ६२
कैलिवार्त ४३
क्षेमेन्द्र ९४
गिल्बर्ट पालेट् ४३
गुण्डीचा ४६
गोविन्दसिंह १०
गोस्वामी तुलसीदास ९४
गौरकृष्णशास्त्री १६५
चारुदेवशास्त्री ३,६५
चिन्तामणि द्वारकानाथ देशमुख १७८,२२७
जनक १४३,१४४
जामदग्न्य १४४
ज्योतिःस्वरूप मिश्र २१
तस्सनी २३२
ताकाकासी ३२
दिवाकरदत्त शर्मा (शास्त्री) ८, ६५
दशरथ ९०
दशानन ९२
दास १२२
दुर्गादत्त शास्त्री २०, ११०, ११९, १५९, १६४,१६६
देवदत्त भट्टि ४१
धर्मसिंह १८
धर्मेन्द्रकुमार गुप्त १२,१५
धर्मेन्द्रनाथ शास्त्री १७७
नाकामूरा ३२
नारायणदत्त तिवारी २२१
नोदनाथ मिश्र ५१
पायर ४२,४९,५५,७८,१०१,१२३,२३५
पिनाकपाणि माध्यन्दिन ७४
पिशल २१७
पुण्डरीकाक्ष मिश्र ६३
पुष्पा त्रिवेदी २३८
प्रभाकर नारायण कवठेकर ७६
प्रभातचन्द्र शर्मा २२०
बटुकनाथ शास्त्री खिस्ते १७
बॉप २१७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बुद्धदेव शर्मा १३
बुद्ध योद् फा ८१
बेङ्गकयी ९१
ब्रह्मचारी सुरेन्द्र कुमार ३८
मणिनाथ झा ६०
मदनलाल कुमारिया १७९
मारीच १३३,१३४
मार्गरीटा ४४,१०१
मायेदा ३२
मिथिलेशकुमारी मिश्रा ७७
मुनीश्वर झा १८४
मुरारिलाल चतुर्वेदी १७२
यूयामा ३२
रणजीतसिंह १८
रत्नलाल जोशी २२१
रमाकान्त शुक्ल १२८
रवीन्द्र घरबरन २२१
राजेन्द्र नानावटी १६९
राधारमण २१९
रामकरण शर्मा ६९
रामकिशोर मिश्र २२,१५७,१७३
रामकृष्ण शास्त्री 'अव्यय' १९१
रामचन्द्र (हरिशरण) शाण्डिल्य १६२
रावण १४४
लक्ष्मण १३४
लता १६९
वाली १४८
वाल्मीकि ९४
विद्यानिधि शास्त्री ५
विद्यापति १८४
विभु २८
विश्वनाथ शास्त्री १०
विश्वामित्र १४२
वी० के० आर० वी० राव २०५
वेबर २१७
वोल्फगांग मार्गनरॉथ २१७
शरच्चन्द्र २३१
शशि २८
शान्दोरवरेश २५२,२५४
शिवनारायण शास्त्री २४
शिवराममूर्ति १८७
शुकदेवशर्मा 'मुनि' १५८,१६०
शेरसिंह १८२
श्तीतनक्रॅन ५३,५८,१९३,१९४
सच्चिदानन्द काण्डपाल ८
सत्यव्रत ६६
सदानन्द दीक्षित ११४,१२१,१५४
सरूपसिंह १८०
सिद्धार्थ १८२
सिरिन्धरा २००,२४०
सुग्रीव १४५
सुनीतिकुमार चादुर्ज्या ६
सुभद्रा ४८
स्थाणुदत्त ७४
हज़ारीलाल शर्मा विद्यालङ्कार ४०
हिरन्तयक्ष ८७,८९

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

९. विशिष्टशब्दानुक्रमणी

आग्नेयदेश (दक्षिणपूर्व एशियादेशाः) १५२
कलन्तान (मलयेशियादेशभागः) १४०
केडाह् (मलयेशियादेशभागः) १४०
बाली (हिन्देशियादेशभागः) १३९, १४०, १४३
वात् महाथात् (वाट महाधातु)
(थाइदेश-दक्षिणभागस्थ-नगरश्रीधर्मराजस्य प्रसिद्धो बौद्धविहारः) ९९
यूरोप २४४
प्रम्बान् (एतदाख्यानि हिन्देशियादेशीय-जोग्जकर्ता-नगरसमीपस्थानि प्राचीन-शैवमन्दिराणि) १३८
नेकार (नदी) (शर्मण्यदेशीया नदी) २४०
तमन्मिनी (हिन्देशियादेशराजधान्या जकार्ताभिधायाः सुप्रसिद्धमुद्यानम्) १४०
चक्रवालः (एतन्नामा गिरिः थाइरामायणे चर्चितः) ८७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सूक्त्यनुक्रमणी

अतस्तात प्रकर्तव्यो यथाशक्ति परिश्रमः।
कृतेऽतिक्रम्य शक्तिं स शरीरं सादयेन्ननु॥ १५४.६
अनौचित्यकृता दोषा उद्वेगायैव केवलम्॥ ८०.२
अल्पोऽपि शत्रुर्न भवेदुपेक्ष्यः १३६.६२
अवश्यं यातारश्चिरतरमुषित्वाऽपि विषया
अतस्तेष्वासक्तिर्जगति नहि युक्ता कथमपि। ९६.८
आप्तस्य वृत्तमवगत्य भवेन्न कस्य
स्निग्धस्य चेतसि जनस्य मुदः प्रकर्षः॥४०.१
उक्तिविशेषः काव्यं
भाषा या भवति सा भवतु॥ २२२.९
उदन्तो बन्धुजातस्य न जनं कं हि मोदयेत्॥ ८.१
इन्दोः कराणां प्रसरेण विष्वक्
स्यादुत्सवः कैरवकाननस्य॥ २२.५
उर्वी विशाला विभु चापि विश्वं
मार्गा अनेके वितता इह स्युः। २८.१०
काव्यं सहृदयैरुक्तं हारि सुग्राह्यमेव च। २५८.१३
काष्ठं च काष्ठं च यथा पयोधौ
संयुज्यते चापि वियुज्यते च।
तथैव लोकः स्वयमेव लोके
संयुज्यते चापि वियुज्यते च॥ २३६.६
कृशे शरीरे कस्यापि साहाय्यं नोपलभ्यते। १५४.५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

'कृशे कस्यास्ति सौहृदम्' ॥ १५४.५

कोकिलविरुतेषु न रुवन्ति किं विहगाः ॥ २१३.३

क्लेशः फलेनातनुते नवत्वम् ॥ १०६.१३

'क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्। ९५.५

क्षमापराः स्निग्धजना भवन्ति ॥ ३५.३

क्षमाशीला हि साधवः। ६.५,२९.३, ११०.२

चिन्ता चित्तार्तिकारिणी ॥ १०४.४

चिन्तामणिश्चिन्तितमेव सूते ॥ १७८.३

चिरं गुरौ कार्यविधौ न कार्यम् ॥ २७.९

चिराय लब्धा नहि किं प्रवृत्तिः

प्रियस्य बन्धोः प्रियमातनोति ॥ ५.१

जलनिधौ ननु मातु कथं जलं

लसति खे यदि पूर्णकलः शशी ॥६१.२

तन्तुः स्नेहमयः कश्चिच्चान्तर्मर्माणि सीव्यति ॥ ५५.६

तोयगर्भा यथा मेघा धातुगर्भा यथाद्रयः।

कल्याणगर्भा विदुषां तथैव ह्याशिषो मताः।१७.२,२०७.४

तृप्तिर्भवेच्छ्रेयसि नैव कस्यापि १३२.३७

दिव्यं निधिं नु समवाप्य न कः प्रहृष्येत् ॥ १७.१,२०७.४

दीर्घासत्तिर्दीर्घश्रमो दीर्घायासश्च सर्वथा।

अस्माभिः परिहर्तव्या आत्मनः स्वास्थ्यमीप्सुभिः ॥ ८७.११

धन्यास्ते ऋषयो लोके शास्त्रनिर्मलबुद्धयः।

नास्ति येषां यशःकाये जरामरणजं भयम् ॥ ६६.१

न साहसानाश्रयिणो जनाः स्युः

कल्याणभाजो जगतीतलेऽत्र ॥२५७.७

'नहि कस्तूरिकामोदः शपथेन विभाव्यते'। ११०.५

नाग्निना शाम्यति ह्यग्निः क्रोधः क्रोधेन नैव च।

परस्परविरोधो हि परस्परविनाशकृत् ॥५७.५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पुराणमित्येव न साधु सर्वं
न चापि सर्वं नवमित्यवद्यम्। २२४.४
पुस्तकी भवति पण्डितः २३५.३
प्रकाशरूपो नाहि तिग्मरश्मिर्
दीपेन धूपेन च पूज्यते किम्?॥ १९६.५
प्रमादा दुःखकारिणः॥ ३३.३
'प्रसादे सर्वदुःखानां हानिर्जीवस्य जायते'। ९४.१६
प्रेमास्त तद् यन्न हि किञ्चिदेव
कस्माच्चन प्रार्थयतेऽविकारः॥ २५५.५
बन्धूनां कुशलोदन्तः सदा प्रीतिकरो भवेत्॥३८.३ ४५.१, ७७.१
बन्धूनां सत्प्रेमगर्भा गिरो हि
कल्याणानामर्पयित्र्यो भवन्ति॥ १५.१
भक्त्योपास्याश्च गुरवः २१५.११
भावो जन्मान्तरीणो हि स्थिरः सम्बन्ध उच्यते। २३२.६
'यशोधनानां हि यशो गरीयः'॥ ५८.३
यात्येकतोऽस्तशिखरं यदि धर्म एकस्
तत्स्थानमापतति निश्चितमन्य एव।
धर्मद्वयस्य युगपद् व्यसनोदयाभ्यां
पूर्वस्तिरस्क्रियत इत्यति कष्टदायि॥ १००.१९
रागद्वेषादिमग्नानां गुणिनामपि भूरिशः।
काव्यादिविमुखानां हि कालो याति निरर्थकः॥ ९५.४
रामाभिरामचरिते रमते जनौघः॥ १४९.१३७
पत्रेण कुशलोदन्तो लब्धः प्रियजनस्य हि।
किञ्चिदेव भवेदूनः सङ्गमादिति सूरयः॥ ७२.२(८.१, ३८.३)
वस्तुतो बन्धुभावो नो देशकालावपेक्षते। २३२.४
वायुनाऽपि बलवत् प्रविधूताः
सङ्किरन्ति तरवः कुसुमानि॥ ३.२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वितरति यदि सौख्यं पान्थवृन्दाय वृक्षो
भवति सुभृशमेतत्सार्थकत्वं तदैव ॥ ११.६.१७
विद्या तृतीयं मनुजस्य नेत्रम् ॥ १९८.२
विद्याभ्यासो व्यसनमथवा हरिपादसेवनं व्यसनम् ॥१४.७
विद्यां विना नास्ति सुखं नराणाम् । २१४.७
विद्याव्यसनिनां सत्यं शुभाशंसा फलेग्रहिः ।
भवत्येव हि बन्धूनां सौहार्दवशनिःसृता ॥१८.२
विधेरिच्छा बलीयसी ॥७७.२
विपश्चिदुद्घैः सह तात चर्चा
प्रवर्तिता ज्ञानचयं तनोति ॥ १०९.१६
विप्रोषितानां स्वजनस्य वृत्तं
विज्ञायमानं मुदमातनोति ॥ ३३.१
विपश्चितां कामदुघा मताशीः ॥ ११३.२३
विपश्चितां दर्शनमेव पुण्यम् ॥ २१९.४
शरीरकष्टं कष्टाय भवेदिष्टस्य सर्वथा ॥ ८६.३
शास्त्राण्यनन्तपाराणि । ९५.७
शिष्यप्रकर्षो यशसे गुरूणाम् । २७.८
संचालनं संस्कृतपत्रिकाणा-
मसंशयं कष्टपरम्परैव ॥ २४९.८
संयोगकाले मनसि प्रहर्षो
वियोगकाले सुमहच्च दुःखम् ॥ २३६.७
सङ्गः सतां पुण्यतमो जगत्याम् ॥ २२४.२
सङ्गश्च सद्भिर्विरलो जगत्यां । ६३.२
सत्संगतिः पुण्य वशेन सत्यं
सञ्जायते दिव्यसुखप्रदात्री । १०८.१५
समीपता कायमपेक्षते किम् ॥ २३७.९
समन्वयेनैव हि कार्यसिद्धिः । २११.२३
'सम्बन्धमाभाषणपूर्वमाहुः' । २१८.७

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सह्यो भवेद्रम्यतमेऽपि सत्यं
न जातु देशे स्वजनैर्वियोगः ॥ ७३.८
सुकृतोपार्जितानां हि पुण्यानां परिपाकतः।
लोकेऽतिदुर्लभः सत्यं विद्वत्तोषोऽधिगम्यते ॥ १०.७
सुधारसस्य निष्यन्दास्तर्पयेयुर्न कं भुवि ॥ १६४.४
'सूर्ये तपत्यावरणाय सत्यं
भवेत्प्रकाशस्य कुतस्तमिस्रा' ॥ २६.२
स्वयमेव समुद्भूतः पर्वतान्निर्झरो यथा।
अकृत्रिमोऽनुरागो नो देशकालावपेक्षते ॥ ५५.७
स्वस्थे शरीरे कार्याणि कर्तुं शक्यानि नान्यथा। १५४.४
हरति रुचिरगन्धा केतकी लोकचित्तं
न तु सुरुचिररूपः किंशुको गन्धहीनः ॥ १५७.३
'हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा' ॥ २०६.६

सुभाषितं हि काव्यस्य जीवातुः प्रीतये विदाम्।
तत्संग्रहोऽयं प्रीत्यै स्यादध्येतॄणां सुखाय च॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

छन्दोऽनुक्रमणी

अनुष्टुप् ६, ८-१२, १६-१८, २०-२२, २४, २६, २९-३१, ३३, ३८, ४०-४३, ४५, ४९, ५१, ५३, ५५, ५७, ६०-६२, ६४-६७, ६९, ७१-७२, ७४, ७६-७७, ७९-८०, ८३, ८६, ९२-९३, ९५-९६, ९८, १००, १०२, १०४, १०७, ११०, ११३, ११४, ११६-७, १२५-८, १५०, १५४, १५७-१६०, १६४-१६६, १६९-१७३, १८३-४, १८९-१९२, १९५, १९९, २०५-२०७, २०९, २१२, २१४, २१६, २१९, २२१, २२३, २२६, २३१-३२, २४०, २४२, २४८, २५३, २५५, २५८, २६४

आर्या २८, ४९, १९७, २११, २१४, २१९, २२१, २२२

आर्यागीतिः १८९, २१३

इन्द्रवज्रा ४, १५, २२, ३६, ५३, ५८,१७, ५९, ७२, ७८, ८३-८४, ८९, १०५, १०८, १५१-१५३, १६०-१६१, १७७-१८८, १८२, १८७-१८८, १९१, १९३-१९४, १९८-२००, २४४, २४८, २५०, २५१ २५४-२५५, २५७, २६०, २६१, २६३

उपगीतिः १७७

उपजातिः ४-६, २६, ३३, ३५-३७, ४९, ५३, ५६, ५८-५९, ६१-६३, ६८, ७०, ७२, ७३, ७७-७८, ८३-८४, ८७, ८९, ९१-९२, १०१, १०५-१०६, १०८, १११, ११८, १३१, १५०, १५३, १६०, १६२, १६६, १६८, १७८, १८०, १८२, १८५, १८७, १९१, १९३-१९५, १९७-१९८, २००-२०१, २०५, २०८, २११, २१४, २१७, २१९, २२४, २३५-२३६, २३८, २४०, २४२, २४४-२४६, २४८, २५०, २५२, २५४-२५७, २५९-२६३

उपेन्द्रवज्रा ३६, ४९, १७८, २११

गीतिः ६, १४

तोटकम् ११५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दोधकम् २१३
द्रुतविलम्बितम् ४०, ५०, ६१, १२३, १८५, १८९, २३७
प्रहर्षिणी ९०, २३६
भुजङ्गप्रयातम् १९६, २०८
मालिनी ११६, १५७, १७९, १८३, २११
रथोद्धता ९, २३५
रुचिरा १३, २३, १७७
वसन्ततिलका १७, १८, ४०, ६१, १००, १४८, १८१, १८३, १८५, १९२, २०७, २१३, २१६, २१९, २३४
विद्युन्माला २९
वियोगिनी २३७
वैतालीयम् ३०
शार्दूलविक्रीडितम् १८६, २०६, २१६, २२७
शालिनी १५
शिखरिणी ९६
स्वागता ३, ५६, २१६, २३५

जलधिगभीरे हृदये नाना
भावलहर्यः सपदि लसन्ति।
सुरुचिरवृत्तैर्निपुणं बद्धैस्
तच्छुभसूची व्यरचि सुखाय॥

—— ० ——

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

THE AUTHOR

Born on 29th September, 1930, Professor Satya Vrat Shastri had his early education under his father, Professor Charu Deva Shastri. He received record marks in B.A. Hons. in Sanskrit and a First Class First in M.A. in Sanskrit from the Punjab University, and won University Medals. After doing his Ph.D. at the Banaras Hindu University he joined the University of Delhi, where during the thirty-eight years of his teaching career he has held important positions as the Head of the Department of Sanskrit and the Dean of the Faculty of Arts. He was also Vice-Chancellor of Shri Jagannath Sanskrit University, Puri, Orissa. He has the distinction of having been Visiting Professor in six Universities on three Continents, Chulalongkorn and Silpakorn Universities, Bangkok and Northeast Buddhist University, Nongkhai, Thailand, the University of Tübingen, Tübingen, West Germany, the Catholic University, Leuven, Belgium and the University of Alberta, Edmonton, Canada. He has attended and chaired a number of national and international conferences and seminars and delivered more than a hundred lectures in Universities in Europe, North America, Southeast Asia and the Far East.

Both a creative and a critical writer, Prof. Satya Vrat Shastri has to his credit in creative writing in Sanskrit three Mahākāvyas of about a thousand stanzas each, three Khaṇḍakāvyas and one Prabandhakāvya, some of which have become subjects of research for the M. Phil. and Ph.D. degrees in Indian Universities, and five works in critical writing, including a pioneering one, *The Rāmāyaṇa-A Linguistic Study*, and also one hundred research articles. He is the founding editor of two research journals, the *Indological Studies* and the *Śrījagannāthajyotiḥ*.

Among the honours he has won are the Sahitya Akademi Award in 1968, an Award from the Sahitya Kala Parishad, Delhi Administration, Delhi in 1974, the Medallion of Honour from the Catholic University, Leuven, Belgium, the President of India Certificate of Honour, the Śiromaṇi Saṁskṛta Sāhityakāra Award from Govt of Punjab—all in 1985, the Viśiṣṭa Saṁskṛta Sāhitya Puraskāra from the Uttar Pradesh Sanskrit Academy in 1988, the Saṁskṛta Sevā Sammāna from the Delhi Sanskrit Academy, Delhi, the Literary Award from the Bharatiya Bhasha Parishad, Calcutta, the Indira Beharay Gold Medal from the Tilak Maharashtra Vidyapeeth, Poona—all in 1992 and the All India Paṇḍitarāja Jagannātha Padyaracanā Puraskāra from the Delhi Sanskrit Academy in 1993. The International Institute of Indian Studies, Ottawa, Canada elected him Fellow in 1993 and announced for him the 1994 Kālidāsa Award. On July 19, 1993 the Silpakorn University, Bangkok, Thailand conferred on him Doctorate (Honoris Causa).

Eastern Book Linkers
(INDOLOGICAL PUBLISHERS & BOOKSELLERS)
5825, New Chandrawal, Jawahar Nagar, DELHI-11000
Ph. 25

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri